॥ श्रीः ॥

अभिज्ञानशाकुन्तलम् ।

अभि[illegible]रचितया दिङ्मात्रदर्शनसमाख्यया

व्याख्यया समेतम् ।

अनन्तशयनस्थराजकीयाङ्गलविद्यामन्दिरे
संस्कृतद्राविडभाषाप्रधानपदमधितिष्ठता
[illegible] उपाधिधारिणा
अ. रा. राजराजवर्मणा
प्रसाधितम् ।

तच्च
भाषाभिवर्धिनी-पुस्तकशालाध्यक्षेण
अनन्तशयनस्थ "भास्करमुद्रालये"
मुद्रयित्वा प्रकाशितम् ।

[illegible]

मूल्यं रूप्यकद्वयम् ।

PREFACE,



AT the request of certain friends and old pupils of mine, I had about two years ago to undertake a translation of the *Sakuntala* into my mother tongue—Malayalam. But before I set about translating the play I set to work collecting copies of printed editions as well as Manuscripts of the original text, and also the commentaries of Raghavabhatta, Srinivasa and my friend Mr. Saradaranjan Ray. Before any progress could be made, however, in the work of translation, I was perplexed as to which of the various recensions and conflicting interpretations were to be followed. I then recollected that there was in my family-library the Manuscript of an unpublished commentary on the play which I had read and used in my boyhood in studying the *Sakuntala* and of which I had then had a very high opinion. The Manuscript was soon hunted up and I was so captivated by the readings adopted and the interpretations suggested by the commentator that I at once made up my mind to base my rendering of the play into Malayalam solely upon these readings and interpretations.

This commentary is the work of Abhirama and is called by him 'Dingmatra-darsana'. Having published a translation of the *Sakuntala* into Malayalam according to the text embodied in a commentary unknown to the public, I felt it my duty to bring to light the commentary itself in acknowledgment of my indebtedness to it, to say nothing of its intrinsic value. This is my apology for bringing out an edition of the *Sakuntala* with the commentary of Abhirama.

I have not been able to gather any information regarding Abhirama except that he was the pupil of [illegible]

pundit called Rudra who is extolled by the commentator in the prefatory verses as

'उद्भ्रान्तभाष्यामृतवक्त्ररन्ध्र-
कद्रूजविस्मापनवाग्विलासाः'.

From the fact that Abhirama in the third *sloka* in his preface invokes the 'earth gods' (viz, Brahmans) as a class, and implores their grace, it may be inferred that it was not given to him to be a member of that caste. But his quoting freely in his commentary passages from the sacred writings, such as the Smritis and the Puranas, shows that he must have certainly belonged to a high caste. Like king Bhoja, who also opens his Champu-ramayana with a salutation to the Brahmans, Abhirama too might have belonged to either of the other two twice-born castes next to the Brahmans.

Abhirama derives the word नैपथ्य thus:— नेपथ्यमलङ्कारः तदर्थं गृहं नैपथ्य Now in Southern India Sanskrit books written or printed in the Malayalam or Grantha characters invariably have नेपथ्य for toilet and नैपथ्य for the dressing room, whereas in further North books printed in Nagari characters—in Bombay, Calcutta and other places-spell the word meaning a dressing room as नेपथ्य and makes the other word a derivative from this as नेपथ्ये कृतं कर्म नैपथ्यम्। Again Abhirama designates the Prologue (usually called प्रस्तावना) as स्थापना and explains it as स्थापनात् काव्यार्थस्य सूचनात् स्थापना। Another noteworthy peculiarity is that the king's Chamberlain is called कांचुकीय and not कञ्चुकिन. Again Abhirama's reading of the text evinces a greater general agreement with the South Indian recension than with any other. If these facts go to prove anything, it must be that Abhirama must have belonged to the Madras Presidency.

Nor does the Colophon at the end of each Act furnish us with any data for determining the author's pedigree, attainments in general or other writings; for, in the

---

* Page 2

two Manuscripts that I have used for the present e[illegible] the Colophon reads only as इत्यभिरामविरचितेऽभिज्ञानशाकुन्तलदिङ्मात्रदर्शने .... Abhirama's commentary is replete wi[illegible] quotations from poems, lexicons and standard works [illegible] Rhetoric, Grammar and Dramaturgy. But in the [illegible]ority of cases the quotations are anonymously introd[illegible] The following authors and works have been cited i[illegible] भरतमुनि. केशव. वामन. वाहट. अमरसिंह. भोज. धनिक. [illegible] (the dramatist); and भारत, भागवत. अनर्घराघव, वैजयन्[illegible] माघकाव्य. आश्रमवर्णन (?) and स्मृति. The definition[illegible] of Speech are drawn from the Kavyaprakasa. [illegible] evidence it would appear that Abhirama should [illegible] ished after the fourteenth century.

Mr. P. N. Patankar in the introduction [illegible] of the *Sakuntala*, refers to four commentar[illegible] play :—

1. प्रवेशिका by Srikrishnanatha
2. अर्थद्योतनिका by Raghavabhat[illegible]
3. कुमारगिरिराजीय by Kataya Vema.
4. शाकुन्तलव्याख्या by Srinivasa.

The commentaries are enumerated in t[illegible] order of merit. Srinivasa is thus the ablest of [illegible] known commentators of the *Sakuntala* and [illegible] he is also the latest as there are allusions in h[illegible] ary to the other commentaries. In my opinio[illegible] ed Srinivasa must now yield up his place [illegible] Abhirama. Whether Abhirama himself has de[illegible] any help from the other commentators or not, is not [illegible] he has not taken care to refer to the views of [illegible] people, be it to refute them or to support his own [illegible]retations.

Dingmatra-darsana is not a running comment[illegible] Pravesika giving synonyms for every word i[illegible] Nor does Abhirama, like Srinivasa, soar to the h[illegible] pedantic extravagance torturing the text to yiel[illegible] me

(१) एव्वं विणास विरअ...
(२) अइ विणास विरअ...

प्रवागे'-त्यादिवाक्यार्थस्यानुवादरूपतया प्रतीयते । नात्यधर्मोऽगमनसूचाप्रवेशदानार्थः । एतन्नामेत्यव्ययमसदर्थोऽनुवादद्योतकः ।

The actual existence of a difference in reading is admitted only once or twice as at p. 164: - वर्णस्वाम्नग्लानतां and पर्णस्वाम्नग्लानता ।. In this particular instance a third reading पर्णाम्यन्नग्लानता seems to me to be more acceptable. As for the well-known interpolations, they have not received even a passing notice at the hands of Abhirama.

Besides the manuscript of the commentary in my family library I have, as already hinted, used another kindly lent to me by Mr. Rama Pisharody of the Ernakulam College. Both these Manuscripts are in palm leaves and fairly correct, and as they generally supplemented each other my task as editor of the Dingmatra-darsini has been comparatively easy. The text of the play is based on a paper Manuscript from the private library of H. H. the Maharaja of Travancore with, of course, some slight alterations made here and there to fit in with the readings adopted by the commentator. In this connection I wish to acknowledge my indebtedness to Mr. A. Krishna Pisharody, one of my assistants in H. H. the Maharaja's College, for patiently bearing the burden of preparing the press-copy of both the text and commentary.

In conclusion I would invite the attention of scholars to the commentary of Abhirama on the *Sakuntala* and leave it in their hands for such treatment as it may deserve.

H. H. The
Maharaja's College.
Trivandrum.
10th April 1913.

A. R. Rajaraja Varma.

॥ श्रीः ॥

अभिज्ञानशाकुन्तलम्

सव्याख्यानम् ।

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च हो[illegible]

ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य [illegible]

हेरम्बस्याङ्घ्रिकमल[illegible] शरणम् ।

विशदीकुर्वे[illegible] करुण[illegible] ॥ १ ॥

उद्भ्रान्त[illegible] ।

[illegible] ॥ २ ॥

विद्याचतुर्दश[illegible]

[illegible] ॥ ३ ॥

[illegible] ।

[illegible] प्रयोगे [illegible] ॥ ४ ॥

अनघा गुणसम्पूर्णा [illegible] ।

[illegible] जयति [illegible] ॥ ५ ॥

नाटकं यदभिज्ञानशाकुन्तलमिति [illegible] ।

तत्राभिधेयदिङ्मात्रमभिरामेण लिख्यते ॥ ६ ॥

मत्सर[illegible] गुणदोष[illegible] कलहंसाः ।

सन्द[illegible] ॥ [illegible] ॥

अथ कविकुलशेखरः कालिदासः प्रसुप्त[illegible] श्रुतस्मृत[illegible]

[illegible], मित्रसम्मितेभ्य इतिहास[illegible], कान्तासम्मित[illegible]

काव्येष्वभिनेयार्थेभ्यः [illegible]

सम्पादनयोग्यतया [illegible] राजपुत्र[illegible]

यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ १ ॥

[नान्द्यन्ते प्रविशति सूत्रधारः]

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) आर्ये! यदि नेपथ्यविधानमवसितम् इतस्तावदागम्यताम् ।

अभिनेयार्थकाव्यविशेष नाटकाभिर्काव्पुरविघ्नपरिसमाप्त्यर्थं तदारम्भोचितनान्दीद्वारा समुचितेष्टदेवतामनुसन्दधाति **या सृष्टि**रित्यादिना -या तनुः स्रष्टुराद्या सृष्टिः । सृज्यत इति सृष्टिः । या स्रष्टुः प्रथमसृज्यभूतेत्यर्थः । आदिसृज्यत्वमपामसाधारणो धर्मः । "अप एव ससर्जादौ" । तासां प्रपञ्चभरणं प्रति साधनत्वमंशस्य तत्कर्तृत्व च । यदुक्तमनेनैव महाकविना—"अष्टाभिर्यस्य कृत्स्न जगदपि तनुभिर्बिभ्रतो नाभिमानः" इति । अतोऽयमर्थ —हे सामाजिकाः! प्रत्यक्षाभिः सलिल हुतवह यजमान-सूर्य-सोमाकाश-पृथिवी वायु सर्वाभिरष्टाभिर्मूर्तिभिरिदं विश्वं बिभ्रत् भगवान् महेश्वरो युष्मान् नाट्यर सास्वादविरोधिभ्यो विघ्नेभ्यो रक्षत्विति । चन्द्रनामाङ्कितोऽय नान्दीश्लोकः । यदुक्त "नान्दीश्लोको विध तव्यश्चन्द्रनामाङ्क एव सः" इति । "नान्दीश्लोके तथा यत्न. कर्तव्यः कविभिस्सदा । यथैव चन्द्रनामाङ्को लक्ष्यते व्यज्यतेऽथवा । चन्द्रायत्ततया नाट्यप्रवृत्तस्सम्पदाय" इति च । वाक्याष्टकालङ्कृतश्च । यदुक्त—'पदैर्द्वादशभिः षड्भिरष्टाभिर्वाप्यलङ्कृतां मध्यमस्वरसंयुक्तां यो नान्दीमुदीरयेत् । तत्तस्याकैर्भवेन्नान्दीवाक्यैः क्वापि विवक्षया' इति ।

एव पूर्वरङ्गाङ्गभूतां नान्दीं विधाय काव्यार्थं सूचयितुमारभते **नान्द्यन्ते प्रविशति सूत्रधार** इति । यदुक्त—"पूर्वरङ्ग विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपरः काव्यार्थं स्थापयेन्नटः ॥" इति । नान्द्यन्ते नान्द्याः "देवतादिनमस्कारमङ्गलारम्भपाठके. । या क्रिया नन्द्यते नाट्यारम्भे नान्दीति सा स्मृता ॥" इति लक्षितायाः । "सभापतिः सभा सभ्या गायका वादका अपि । नटी नटश्च मोदन्ते यत्रान्योन्यानुरञ्जनात् ॥ अतो रङ्ग इति ज्ञेयः पूर्व यत्स प्रकल्प्यते । तस्मादय पूर्वरङ्ग इति विद्वद्भिरुच्यते ॥" इति लक्षितस्य पूर्वरङ्गस्याङ्गभूतायाः । "यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके । तथाप्यवश्यकर्तव्या नान्दी विघ्नप्रशान्तये ॥" इति वचनादवश्यकर्तव्यायाश्च । अन्ते समाप्तौ । प्रविशति । रङ्गमिति शेषः । सूत्रधारः सूत्रं भरतशास्त्र ग्रन्थतोऽर्थतः प्रयोगतश्च धारयतीति सूत्रधारः । **नैपथ्येति** । नेपथ्यमलङ्कारः तदर्थं गृह नेपथ्यम् । 'आकल्पवेषौ नेपथ्ये' इत्यमरः । अवलोक्य आहेति शेषः । 'क्वचु कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत्' इति वचनात् काव्यार्थसूचने भारतीवृत्तेरङ्गीकरणीयत्वात् तद्भेदभूतमामुख-

(प्रविश्य)

नटी—अज्ज! इअह्मि ।

सूत्रधारः—आर्ये! अभिरूपभूयिष्ठा परिषदेषा । अद्य खलु कालिदासग्रथितवस्तुना नवेन नाटकेनोपस्थातव्यमस्माभिः । तत् प्रतिपात्रमाधीयतां यत्नः ।

---

१. आर्य! इयमस्मि ।

मत्राङ्गीक्रियते । "या वाक् प्रधाना नृवरप्रयोज्या स्त्रीवर्जिता संस्कृतपाठ्ययुक्ता । स्वनामधेयैर्भरतैः प्रयोज्या सा भारती नाम भवेत्तु वृत्तिः ॥" इति भारतीवृत्तिलक्षणम् । "भेदास्तस्यास्तु विज्ञेयाश्चत्वारोऽङ्गत्वमागताः । प्ररोचनामुखं चैव वीथी प्रहसनं तथा ॥" इति तद्भेदलक्षणम् । तत्र 'सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् । स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥' इत्यामुखलक्षणम् । तत्रेह सूत्रधारो नटीं स्वकार्यमाह । तदारभते **आर्ये** इत्यादि । नेपथ्यस्य अलङ्कारस्य विधानमनुष्ठानं नेपथ्यविधानम् । अवसितम् **यदी**ति । तस्य वैकल्यं मा भूदिति भावः । तस्य प्रधानाभिनेयत्वात्तद्वैकल्ये अभिनेयस्य वस्तुनोऽपि वैकल्यप्रसङ्गात् । यदुक्तं भरतमुनिना "अभिभावयति यस्माच्च नानार्थान् हि प्रयोगतः । शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः । आङ्गिको वाचिकश्चैव आहार्यः सात्त्विकस्तथा । ज्ञेयश्चाभिनयो विप्राश्चतुर्धा परिकल्पितः । आहार्याभिनयो नाम ज्ञेयो नेपथ्यजो विधिः । तस्य कार्यः प्रयत्नस्तु नाट्यस्य शुभमिच्छता ॥" इति । **आर्य! इयमस्मि** । आगतेति शेषः । किं कर्तव्यमिति भावः । सा स्वकार्यमाह । नाट्येन परिषदाराधनं स्वकार्यम् । तत्र परिषदो वैदग्ध्यातिशयेन नाटकेन तामाराधयितुमुक्तप्रयोगे प्रमादस्खलितमाशङ्क्य तत्परिहारोपायमाह **आर्ये** इति । अभिरूपा विद्वांसो भूयिष्ठा बहुतरा यस्यां सा अभिरूपभूयिष्ठा । 'अभिरूपस्तु पण्डिते' । अभिरूपा बुधमनोज्ञयोरित्यमरः । हेतुभावगर्भं विशेषणमेतत् । खल्विति वाक्यालङ्कारे । कालिदासग्रथितवस्तुना कालिदासेन परमेश्वरीपर्यायपादारविन्दाराधनलब्धवरेण प्रसिद्धेन च या कालिदास इति प्रसिद्धेन महाकविना ग्रथितं रसानुगुण्येन निबद्धं वस्तु इति नः । इति हासादिप्रसिद्धं यस्मिन्नस्ति कालिदासग्रथितत्वात् । तेन रसानुगुणा वस्तुघटना ध्वन्युक्ताः । "विभावभावानुभावसञ्चार्यौचित्यचारुणः । विधिः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा ॥ इतिवृत्तवशायातां त्यक्त्वाननुगुणां स्थितिम् । उत्प्रेक्ष्याप्यन्तराभीष्टरसोचितकथोन्नयः ॥ सन्धिसन्ध्यङ्गघटनं रसादिव्यक्त्यपेक्षया । न तु केवलया शास्त्रस्थिति

नटी — सुविहिदप्पओअदाए अज्जस्स ण किं वि परिहाइस्सदि ।

सूत्रधारः — भवतु कथयामि ते भूतार्थम् ।

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ २ ॥

नटी — एव्वमेदं । अणन्तरकरणिज्जं दाव अज्जो आणवेदु ।

---

१. सुविहितप्रयोगतया आर्यस्य न किमपि परिहास्यते ।
२. एवमेतत् । अनन्तरकरणीयं तावदार्य आज्ञापयतु ।

सम्पादनेच्छा । उदात्तो [illegible] । रसाद्यर्थस्याविश्रान्तेरनुसन्धानम-हितम् ॥ अलङ्काराणां [illegible] रसादीनां व्यञ्जकत्वे निब-न्धनम् ॥" इति । तथा [illegible] "प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकं चैव । राजर्षिवंश्यचरितं तथैव दिव्याश्रयोपेतम् ॥ नानाविभूतिसंयुतमृद्धिविलासादिभिर्गुणै-श्चापि । अङ्कप्रवेशकाढ्यं भवति हि तन्नाटकं नाम ॥" इति मुनिना लक्षितम् । विशेषणाभ्यां नाटकस्य रसप्रधानत्वमभ्युक्तम् [illegible] । [illegible] च । तत आह [illegible] । प्रतिपात्रं [illegible] प्रतिपत्त्या नटः पात्रान्तरयुक्ते । पात्रे पात्रे [illegible] । आर्याभिगमनाय । प्राप्तकाले लोट् । अत्र [illegible] । अस्माभिरपि आर्याय-त्ताम् । अस्माकं सावधानस्य [illegible] । [illegible] माहसुविहिदेति । सुविहितः सम्यक् शिक्षितः सहकारिषु सर्वासु [illegible] । प्रयोगो येन स सुविहितप्रयोगः । [illegible] इति तत्स्तुतिपरमेतत् । यदुक्तं — 'शिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता । यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ॥' इति । आर्यस्य सुविहितप्रयोगतया अस्माभिः प्रयोक्ष्य-माणे किमपि न परिहास्यते [illegible] । [illegible] न करिष्यते इत्यर्थः । प्रयोगस्य साधुत्वे [illegible] न प्रमाणं अपि तु विदुषां परितोष एव प्रमा-णमित्याह [illegible] । [illegible] भूतार्थं परमार्थं न वेत्सि । इदानीं सावधानमाकर्णयेति भावः । विदुषां प्रयोगरहस्यवेदिनां सामाजिकानां प्रयोगविज्ञान

सूत्र—किमन्यत् । अस्याः परिषदः श्रुतिप्रसादनहेतोः अमुमेव नातिचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयतान्तावत् । सम्प्रति हि ।

*सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥ ३ ॥

नटी—[गायति]

ईसिचुम्बिआइ भमरेहिं सुउमारकेसरसिहाइम् ।
ओदंसयन्ति दयमाणा पमदाओ सिरीसकुसुमाइम ॥ ४ ॥

प्रयोगस्य विज्ञानं विशेषेण ज्ञानम् । विज्ञानं प्रयोगम् । सुशिक्षितं प्रयोगविज्ञानं [illegible] । 'अभिनवकारदन्तच्छेदकान्तः कपोलः' इत्यादिवत् । अहं सुशिक्षितं प्रयोग [illegible] कानां परितोषात् आ साधिवति न मन्ये इत्यर्थः । न साधिवति मन्यसे इ[illegible] वैपरीत्यकटाक्षेणैवमुक्तम् । साधिवति न मन्तव्यमिति भावः । साधुमननाभाव [illegible] **बलव**दिति । बलवदत्यर्थं 'यत्नवत्सुप्रकिमुतरवत्यर्तीवचातिसये' इत्यमरः । [illegible] शिक्षितानामपि प्रयोक्तृणां चेतः आत्मनि आत्मप्रयोगे अप्रत्ययम् अविश्वा[illegible] । **एवम् एतत्** खलु आधेय एवेति भावः । अनन्तरकरणीयम् । [illegible] तया कर्तव्यम् । **किमन्य**दिति । अनेन ऋतुविषयस्य गानस्य स्वतन्त्रि[illegible] । श्रुतिप्रसादनहेतोः श्रोत्रेन्द्रियं प्रसादयितुमित्यर्थः । प्रयोजनस्य हेतुत्वेना[illegible] प्रयोजकत्वात् । यदुक्तं प्रयोजनं नाम तत्सम्पादककर्तुप्रयोक्तृताप्राणतयैव [illegible] । प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति च । असुं कार्यद्वारा प्र[illegible] । नातिचिरप्रवृत्तं नवावतारम् । अत एवोपभोगक्षमम् । अधिकृत्य विषयीकृ[illegible] भोगयोग्यत्वमुपपादयति **सुभगे**ति । अवगाहस्नावेनैवानुपयोगात् क्रीडार्थ[illegible] मति । सुभगसलिलक्रीडा इत्यर्थः । प्रच्छाये प्रसृतायां तरुच्छायायाम् । [illegible] निद्रा येषु । छाया बाहुल्ये इति नपुंसकत्वम् । परिणामे सायं रमणीयास्तथा । **इसी**ति ।

* सुभगः प्रियः सलिलावगाहो जलक्रीडा येषु । जलक्रीडोचित[illegible] 'चक्षुष्यः सुभगः कान्तो दयितो वल्लभः प्रियः' इति यादवः । अन्यत्रा[illegible] त्वा ते श्रवणसुभगं गर्जितं' (मेघसन्देशे) इत्यादौ सुभगशब्दमाश्रित्य [illegible] महाकवि ।

सूत्र—आर्ये! साधु गीतम् । अहो रागनिविष्टचित्तवृत्तिरालिखित इव सर्वतो रङ्गः । वयमिदानीं कतमं प्रयोगमाश्रित्यैनमाराधयामः ?

नटी—णं[२] अज्जमिस्सेहिं पुढमं एव्व आणत्तम् अहिण्णाणसाउन्दलं णाम अपुव्वं णाडअं पओए अहिअरीयदुत्ति ।

---

१. ईषच्चुम्बितानि भ्रमरैस्सुकुमारकेसरशिखानि ।
अवतंसयन्ति दयमानाः प्रमदाश्शिरीषकुसुमानि ।

२. नन्वार्यमिश्रैः प्रथममेवाज्ञसमभिज्ञानशाकुन्तलं नामापूर्वं नाटकं प्रयोगेऽधिक्रियतामिति ।

ईषच्चुम्बितानि सुकुमारकिञ्जल्काग्रत्वेन यथाकाममवस्थातुमशक्यत्वादीषदास्वादितमधूनि । अवतंसयन्ति कर्णाभरणं कुर्वन्ति । दयमानाः सौकुमार्यातिशयप्रयुक्तया म्लानिशङ्कया दयां कुर्वत्यः । अत्र दिवसानामुपभोगयोग्यतया शिरीषकुसुमानां आलम्बनविभावपरिपोषकतया च तत्कारणस्य ग्रीष्मस्य शृङ्गारोपयोगितया उत्कर्षातिशयो व्यज्यते । **साधु गीतम्** । त्वयेति शेषः । गानसौष्ठवेन विस्मित आह—**अहो इति**। रागानविष्टत्वनेन चित्तवृत्तेर्वैषयान्तरसंस्पर्शराहित्यं व्यज्यते । तेन बाह्यकरणानां निष्पन्दत्वं च । तन्निमित्तेयमालिखितत्वोत्प्रेक्षा । रङ्गः रङ्गवासी जनः । **इदानी**मिति रङ्गप्रसादने कृते सतीति भावः । **प्रयोगः** । प्रयुज्यत इति प्रयोगो नाट्यम् । यदुक्तं मुनिना—‘अनुभावविभावानां वर्णन काव्यमुच्यते । तेषामेव प्रयोगस्तु नाट्य गीतादिरञ्जितम् ॥’ इति । कतममिति तस्य दशविधत्वात् । यदुक्तम्—‘अवस्थानुकृतिर्नाट्य रूपं दृश्यतयोच्यते । रूपक तत्समारोपाद्दशधैव रसाश्रयम् ॥ नाटक सप्रकरणं भाणः प्रहसनं डिमः । व्यायोगसमवाकारौ वीथ्यङ्केहामृगा इतीति । **आर्यमिश्रै**रिति । मिश्रशब्दः पूज्यवाची । आज्ञप्तमिति । ननु कथमिदानीं विचार्यत इति भावः । नन्वभिज्ञानशाकुन्तलमिति नाटकस्य नाम र्वमनुक्तं तत् कथं तस्यानुवादः । उच्यते । कालिदासग्रथितवस्तुना नवेनेति विशेषणद्वयाच्चलनावगतत्वात् । पूर्वमवधृतस्यान्यथात्वे हेतुमाह **आस्मान्नाति** । विस्मृतेर्हेतुमाह **तवेति** । गीतरागेण गीतस्य गानस्य रागेण राग औज्ज्वल्यम् । ——ण । ‘धैर्यावलम्बिनमपि त्वरयति मां मुखवाद्यरागोऽय’मिति । हरति हृदय-

सूत्र—सम्यगनुबोधितोऽस्मि । अस्मिन् क्षणे विस्मृतं मया खलु तत् ।
तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।

(नेपथ्ये कर्णं दत्वा)

एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥ ५ ॥

[इति निष्क्रान्तौ]

स्थापना ।

मिति हारी । हृतः व्याक्षिप्तचित्तः दूरनीतश्च । **कर्णं दत्वे**ति श्रुत्वेत्यर्थः । एवं नटी स्वकार्यं ब्रुवन् मृगयामटतः प्रयोक्तव्यनाटकनायकस्य दुष्यन्तस्य रथध्वनिमाकर्ण्याह **एष** इति । पुरा देशान्तरेतीतस्य सूत्रधारेण तदानीं श्रवण नाट्यधर्मेण तस्य तद्देश्य-तदानीन्तनत्वात् । यथोत्तररामचरिते " सूत्रधारः—एषोऽस्मि कविवशादायोध्यकस्तदा-नीन्तनश्च सवृत्तः इति । आमुखाङ्गभूतः प्रयोगातिशयोऽयम् । यदुक्तम्—" एषोऽयमित्यु-पक्षेपात् सूत्रधारप्रयोगतः । पात्रप्रयोगो यत्रैष प्रयोगातिशयो मत इति । **स्थापने**ति । स्थापनात् काव्यार्थस्य सूचनात् स्थापना । अथ " एषामन्यतमेनार्थं पात्रं वाक्षिप्य सूत्र-भृत् । प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत् ॥" इत्युक्तरीत्या इतिवृत्तप्रयोगमारभते। 'इतिवृत्त हि नाट्यस्य शरीर सम्प्रकीर्तित'मिति 'तत्पुनराधिकारिकप्रासङ्गिकभेदेन द्विविधम् । यदुक्तं—"वस्तु च द्विधा तत्राधिकारिक मुख्यमङ्गं प्रासङ्गिकं विदु"रिति । तत्राधिकारिकम् "अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः । तान्निवर्त्यमभिव्याप्य वृत्तं स्यादाधिकारिकम् ॥" इति । प्रासङ्गिक पताकाप्रकरीभेदेन द्विविधं " सानुबन्धं पता-का स्यात् प्रकरी च प्रदेशभा"गिति । एव त्रिविधं तत्प्रत्येक त्रिविधम् । " प्रख्यातोत्पाद्य-मिश्रत्वभेदात्त्रेधापि तत्त्रिधा " इति । 'प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितं मिश्र तु सङ्करात् " इति । तत्रेह प्रख्यातमाधिकारिकमारभ्यते । इह सोमवंशमौक्तिकमणिर्धी-रोदात्तो दुष्यन्त इति प्रख्यातो राजर्षिर्नायकः । तस्य महाभारतप्रख्यातस्य महत इति-वृत्तस्यैकदेशो मृगयाप्रसङ्गायातकण्वाश्रमान्तिकगमनादिः पुत्रलाभान्तो रसानुगुणो नाट-कस्य शरीरम् । प्रबन्धव्यापितया प्राधान्येन व्यज्यमानः शृङ्गारो रसस्यात्मा । अन्ये रसास्तदुपकारकाः । यदुक्तम्—" एको रसोऽङ्गीकर्तव्यो वीरः शृङ्गार एव वा " इति । कामानुबन्धो धर्मः कार्यम् ' कार्यन्त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि चे'ति । पुत्रलाभोऽत्र

[ततः प्रविशति मृगानुसारी चापहस्तो राजा रथेन सूतश्च]

सूतः—(राजानं मृगं चावलोक्य) आयुष्मन्!

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥ ६ ॥

धर्मः । 'तपो वाप्यथवा यज्ञो यच्चान्यत्पावनं महत् । तत्सर्वं न सम तात सन्तत्येति सतां मतम् ॥' इति । 'उत्तमं सर्वधर्माणां तस्मात् पुत्रं न तु त्यजेत्' इति च भारतोक्तेः । स पुनरादौ "पुत्रमेवगुणोपेतं चक्रवर्तिनमाप्नुहि" इत्युपक्रान्तः, मध्ये "अस्मात्परम्वत यथा श्रुतिसम्भृतानि को नः कुले निवपनानि करिष्यतीति । नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबन्ती" त्यनुसंहितः, अन्ते "मातलिः- दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान् वर्धते । राजा—अभूत्सम्पादितस्वादुफलो मेऽद्य मनोरथः" इत्युपसंहृतश्च । तस्य कामानुबन्धित्वं स्पष्टम् । इतिवृत्तस्यादित आरभ्य सरसत्वादिहादावेवाङ्कः क्रियते । यदुक्तम्—"आदौ विष्कम्भकं कुर्यादङ्कं वा कार्ययुक्तितः" इति । "यदा तु सरसं वस्तु मूलादेव प्रवर्तते । आदावेव तदाङ्कः स्यादामुखाक्षेपसंश्रयः ॥" इति कार्ययुक्तिः । "प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः । अङ्को नानाप्रकारार्थसंविधानरसाश्रयः ॥" इत्यङ्कलक्षणम् । तत्र 'एष राजेव दुष्यन्त' इत्यामुखसूचितस्य नायकस्य प्रवेशमाह **तत इति** । ततः सूत्रधारनिर्गमनानन्तरम् । रथेन मृगानुसारीत्यन्वयः । राज्ञः प्रावेशिकीं दशां स्तुवन् प्रभावातिशयं प्रतिपादयत्यायु**ष्मन्नि**त्यादिना । कृष्णसारे त्वयि च चक्षुः ददत् कृष्णसारं त्वां च पश्यन्नित्यर्थः । मृगानुसारिणं भयपलायमानं यज्ञमृगमनुसर्तुं शीलवन्तम् । "अथ विध्वा मृगं सोऽथ बाणेन नतपर्वणा । पृष्ठतो धनुरादाय चचार गहने वने । यथा हि भगवान् रुद्रो विध्वा यज्ञमृगं दिवि ॥" इति भारतोक्तेः । साक्षात् प्रत्यक्षम् । 'साक्षात् प्रत्यक्षतुल्ययो' रित्यमरः । पिनाकिनमिति । विशेष्यं विशेषणकृत्यमपि करोति । महाकविवाचः कामधेनुत्वात् । अधिज्यपिनाकमीश्वरमित्यर्थः । कृष्णसारे अधिज्यकार्मुके त्वयि च चक्षुर्ददन्मृगानुसारिणमधिज्यपिनाकं प्रत्यक्षेश्वरं पश्यामीति फलितोऽर्थः । अत्रेवशब्दश्रवणेनोपमाबुद्धिरुत्प्रेक्षाबुद्धिश्च न कार्या । तथा हि इवशब्दस्य यथाश्रुत्यन्वये पिनाकिनं पश्यामीवेत्यत्र "यथेववाशब्दा यत्परास्तस्यैवोपमानताप्रतीति"रिति वचनात् पश्यामीति तिङन्तमुपमानं स्यात् । तस्योपमानत्वं 'नोपमानं तिङन्तने' त्याप्तैर्निषिद्धम् । तस्मान्नोपमा । तथा च पिनाकिनं पश्या- ... पिनाकिदर्शनक्रियाकर्तृत्वं ह्युत्प्रेक्ष्यं स्यात् । 'आत्मावस्था हि नोत्प्रेक्ष्या'

राजा—सूत! दूरममुना सारङ्गेण समाकृष्टा वयम्। अयमिदानीमपि—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ ७ ॥

इत्युत्प्रेक्षापि न स्यात्। इवशब्दस्य भिन्नक्रमत्वे त्वां पश्यन्नहं पिनाकिनमिव पश्यामीति वाक्यार्थमध्ये पश्यन्नित्यनूद्यमानायां दर्शनक्रियायां सत्यां कथमुपमोत्प्रेक्षे स्याताम। त्वां पिनाकिनमिव पश्यामीत्युपमायाः परिपाटी। त्वां प्रत्यक्षं पिनाकिनमिव पश्यामीत्युत्प्रेक्षायाः। इत्यलं बहुना। सर्वथात्रोपमोत्प्रेक्षे न स्तः। [1]अतोऽत्रेवशब्दोऽवधारणे। 'इव सम्भावनायां स्यादुपमानेऽवधारणे' इति। कः पुनरत्रालङ्कारः। उच्यते। अशक्यवस्त्वन्तरकरणात्मा विशेषोऽत्रालङ्कारः। विशिष्टराजदर्शनं कुर्वता तेनैव यत्नेनाशक्यस्य तादृशपिनाकिदर्शनस्यापि क्रियमाणत्वात्। "विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः। एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा॥ अन्यत्प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः। तथैव करणञ्चेति विशेषस्त्रिविधः स्मृतः॥" इति। अत्रालङ्कारेण राज्ञः प्रभावातिशयलक्षणं वस्तु व्यज्यते। अथ लक्षीकृते कृष्णसारे दूरगते सति तत्स्वभावं ब्रुवन् राजा प्रोत्साहयति सारथिं **सूतेत्यादि**। समाकृष्टाः। अत्रानयने समाकर्षणत्वमध्यवसीयते। तेनामृग्यत्वं व्यज्यते। दूरमध्वानमानीता इत्यर्थः। इदानीमपि न केवलं प्रयाणारम्भे। ग्रीवाया भङ्गेन भङ्गसदृशेन सातिशयेन वलनेन पश्चादवलोकनार्थेन अभिरामं दर्शनीयं यथा भवति तथा। स्यन्दने बद्धदृष्टिः स्यन्दनं पश्यन्। पश्चार्धेन अपरकायेन। शरपतनभयात् इदानीमिदानीमत्र शरः पतिष्यतीति भयात्। भूयसा बहुतरम्। पूर्वकायं प्रविष्टः अल्पमपि वैदूर्यं लब्धुमतितरां सङ्कोचितपृष्ठभागः। अर्धमवलीढैश्चर्वितैः। उदग्रं वेगातिशयशालि प्लुतं प्लवनं यस्य। अत्र हे सूत! वयममुं सारङ्गं दूरमनुगताः। तत्कारणभूतप्राणापायभयहेतुकोऽमुष्य वेगातिशयः पूर्ववदेवावतिष्ठते इति फलितोऽर्थः। तेनैयता रथवेगेन दुरासदोऽयमिति व्यज्यते। तेन तूर्णं चोदयाश्वानिति च। अयमेवात्र प्रतिपाद्योऽर्थः। इह महाकविः प्रायेण प्रतिपिपादयिषितानर्थान् व्यङ्ग्यतया प्रतिपादयति। अत

१. अतोऽत्रेवशब्दो वाक्यालङ्कारः। कः पुनरत्रालङ्कारः। उच्यते। } इति क्वचित् पाठो दृश्यते

सूतः—उत्खातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः । तेन मृग एष विप्रकृष्टान्तरः संवृत्तः । सम्प्रति समदेशवर्तिनस्ते न दुरासदो भविष्यति ।

राजा—तेन हि मुच्यन्तामभीशवः ।

सूतः—यदाज्ञापयत्यायुष्मान् । (रथवेगं निरूप्य) आयुष्मन् ! पश्य पश्य । एते—

मुक्तेषु रश्मिषु निरायतपूर्वकाया निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया धावन्त्यमी मृगजवाक्षमयेव रथ्याः ॥

एवास्य महाकवित्वम् । यदुक्तम् । "व्यङ्ग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवीनां महाकवित्वलाभो न वाच्यवाचकरचनामात्रेण" इति । स्वभावोक्तिरलङ्कारः । विस्मयतः सारङ्गस्य क्रियारूपवर्णनात् । 'स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्' इति । सारङ्गदूरीभावहेतुमाह **उत्खातिनी**ति । उत्खातिनी विषमा । इति हेतौ । "इति हेतुप्रकरणप्रकारादिसमाप्तिषु" इत्यमरः । रश्मिसंयमनात् । ल्यब्लोपे पञ्चमी । रश्मीनां प्रग्रहाणां संयमनं कृत्वेत्यर्थः । "किरणप्रग्रहौ रश्मी" इत्यमरः । विप्रकृष्टं दूरम् अन्तरमवकाशो यस्य स विप्रकृष्टान्तरः । 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये' इत्यमरः । तर्हि दुरासद एवायमित्यत्राह **सम्प्रती**ति । **तेन हीति** तर्हीत्यस्यार्थेऽव्ययम् । अभीशवः रश्मयः । प्रग्रहाः । पश्येति द्विरुक्तिर्विस्मयात् । **मुक्तेष्वि**ति । नितरामायता निरायताः । निष्कम्पाः वेगवायुना कर्णस्तम्भितत्वान्निश्चलाः चामराणां कर्णचामराणां शिखा अग्राणि येषाम् । निभृता निश्चला ऊर्ध्वा ऊर्ध्वाग्राः कर्णा येषाम् । आत्मोद्धतैः आत्मभिः स्वैः खुराहतैः । अलङ्घनीयाः अप्राप्याः । मृगजवे अक्षमा ईर्ष्या मृगजवाक्षमा तया । रथ्याः अश्वाः । अत्र रथ्यगतत्वेन मृगजवे प्रत्यक्षमावत्त्वमुत्प्रेक्ष्यते । धावनं निमित्तम् । झटिति मृगासक्तिः फलम् । हेतूत्प्रेक्षेषा । धावतां रथ्यानां संस्थानवर्णनात् स्वभावोक्तिश्च । तयोरेकत्र वाक्ये परस्परनिरपेक्षं समवेतत्वात् संसृष्ट्यलङ्कारोऽयम् । "सैषा संसृष्टिरेतेषां भेदेन यदिह स्थितिः" इति । **सत्यमि**ति । अतीत्यातिक्रम्य । हरितः सूर्यस्य । 'हरिन्त सूर्येऽपि सूर्याश्वे' इति वैजयन्ती । हरीन्

१. हरितः सूर्याश्वान् । हरीनिन्द्राश्वांश्च । 'हरिदश्वोष्णरश्मयः' इति सूर्यपर्यायेषु 'जम्भभेदी हरिहयः' इतीन्द्रपर्यायेषु चामरः । न परं सूर्याश्वान् अपि त्विन्द्राश्वानप्यतिवर्तन्त इति भावः—प्रसाधकः ।

राजा—सत्यम् । अतीत्य हरितो हरींश्च वर्तन्ते । तथा हि—

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसन्धानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात् ॥ ९ ॥

सूतः—आयुष्मन्! अस्य खलु ते बाणपातवर्तिनः कृष्णसारस्यान्तरे तपस्विन आगताः ।

अश्वान् । "अक्रमकटमण्डूकवणवासवावणवः । तुरङ्गामहशातांशुयमाश्च हरयो दश ॥" इति । हरितो हरींश्च । चशब्दोऽपिशब्दार्थे । अनेन वेगातिशय उक्तः । उक्तमर्थमुपपादयति **तथा हीति** । हिर्हेतौ । वाजिनां वेगातिशयवत्त्वादित्यर्थः । **यदालोक** इति । तथा हि रथवेगात् मे किञ्चिद्वस्तु क्षणमपि दूरे न पार्श्वेऽपि नेत्यन्वयः । उक्तमर्थमुपपादयति यदालोक इति । यद्गिरिशृङ्गाद्यालोके दर्शनसमये सूक्ष्मं तत् सहसा तत्क्षणमेव विपुलतां स्थूलत्वं व्रजति । यत् आलोकेऽर्धे विच्छिन्नं तत् सहसा केनापि कृतसन्धानमिव भवति । अत्रार्धविच्छिन्नत्वविशिष्टपदार्थगतत्वेनोत्प्रेक्ष्यमाणात्कृतसन्धानत्वादप्रस्तुतात्तन्निमित्तभूतमविच्छिन्नत्वं प्रस्तुतं प्रतीयते । अतः यद्वस्तु नदीस्रोतः प्रभृति दर्शनसमयेऽर्धे विच्छिन्नं तत् तत्क्षणमेवाविच्छिन्नं भवतीत्यर्थः । यद्वक्ष्यत्यत्र तरणवेगवर्णने "सन्तानं तनुभावनष्टसलिला व्यक्तं व्रजन्त्यापगाः" इति । यत् गिरितटनदीकूलादि । प्रकृत्या स्वतो वक्रम् । तदपि तत्क्षणमेव नयनयोः समरेखं भवति आलोके ऋजु भवतीत्यर्थः । अत्रालोके सूक्ष्मस्य वस्तुनस्तत्क्षणमेव विपुलतागमनमनुपपद्यमानम् उपपादकतया आलोके दूरवर्तित्वं तत्क्षणमेव समीपवर्तित्वं च कारणभूतमाक्षिपति । तथैवालोकेऽर्धविच्छिन्नस्य तत्क्षणमेवाविच्छिन्नभावोऽपि । प्रकृत्या वक्रस्य तत्क्षणमेव समरेखत्वं पुनरालोके समीपवर्तित्वं तत्क्षणमेव दूरवर्तित्वं चाक्षिपति । अतो दूरवर्ति सर्वं तत्क्षणमेव समीपवर्ति भवति समीपवर्ति दूरवर्ति चेत्यर्थः । अत्र पदत्रये पर्यायोक्तमलङ्कारः । कार्यात् कारणस्य प्रतीयमानत्वात् । "पर्यायोक्तं विना वाच्यवाचकत्वे वचस्तु यत्" इति । त्रयाणां पूर्ववाक्यार्थानामुत्तरवाक्यार्थं प्रति हेतुत्वेन समर्थकत्वात् काव्यलिङ्गं च । "काव्यलिङ्गं हेतोर्वाक्यपदार्थता" इति । कृतसन्धानमिवेत्युत्प्रेक्षा च । इषुलक्ष्ययोर्मध्ये मुनीन् दृष्ट्वाह **अस्येति** । बाणस्य पातो बाणपातः । पतत्यस्मिन्निति पातः पतनोचितदेशः । तस्मिन् वर्तनशीलस्य । कृष्णसारस्य । अर्था-

राजा—तेन हि प्रतिगृह्यन्तां वाजिनः ।

सूतः—आयुष्मान् यदाज्ञापयति ।

[रथं स्थापयति]

(प्रविश्यात्मना तृतीयो)

वैखानसः—राजन् ! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

तत् साधुकृतसन्धानं प्रतिसंहर सायकम् ।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि ॥ १० ॥

राजा—एष प्रतिसंहृतः ।

[इति यथोक्तं करोति]

वैखा—

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव ।
पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि ॥ ११ ॥

दस्माकं च । अन्तरे मध्ये । प्रतिगृह्यन्तां नियम्यन्ताम् । **प्रविश्य** । आहेति शेषः । आत्मना स्वेन । तृतीयः त्रिसंख्यापूरकः । शिष्याभ्यां सहित इत्यर्थः । यथानर्घराघवे "तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनासौ तृतीयः" इत्यत्र सीतालक्ष्मणसहित इति । आश्रमतः महाशिष्यः समिदर्थं प्रस्थितो मुनिः कश्चित् । मुनिमृगमनुधावन्तं वीक्ष्य नृपं हन्तुकामं तम् । वनमृगबुध्या नूनं हन्तुमना नृपतिरेनमिति मत्वा । परमार्थमभिदधानो निरुणद्धि निषिद्धकरणात्तम् ॥ **राज**न्निति । न हन्तव्य इति द्विरुक्तिः सम्भ्रमेण । **तदि**ति । तत् तस्मात् । साधुकृतसन्धानं सन्धानस्य साधुत्वेन वधाभिसन्धिर्व्यज्यते । अज्ञानाद्वधार्थं संहितं सायकं संहरेत्यर्थः । आर्तत्राणाय आर्तान् त्रातुम् । तुमर्थाच्च भाववचनादिति चतुर्थी । वः पौरवाणाम् । अत्राप्रस्तुतात् सामान्यात् प्रस्तुतो विशेषः प्रतीयते । अतस्तव सायकः प्राणापायभयात् आर्तममुं त्रातुम् । सस्यादिलोपाभावादनागस्यस्मिन् प्रयोक्तुं नेत्यर्थः । **प्रतिसंहृत** इति । भूतकालेन नियोगकरणाविलम्बो व्यज्यते । उचितकारित्वेन प्रीयमाणस्तत्प्रशंसापुरस्सरमभिलषितं वस्त्वाशास्ते **जन्मेति** । पुरोर्वंश इत्यनेन तस्य पितृनियोगकरणनिष्ठतया पित्रे स्वयौवनं दत्वा तस्य जरास्वीकरणलक्षण उत्कर्षो व्यज्यते । यदुक्तं—"सम्बन्धमात्रमर्थानां समासो ह्यवबोधयेत् नोत्कर्षमपकर्षं वा वाक्यात्तूभयमप्यदः" इति । युक्तरूपं

उभौ--(बाहू उद्यम्य) चक्रवर्तिनं पुत्रमाप्नुहि ।

राजा--(सप्रणाम) प्रतिगृहीता आशीः ।

वैखा--राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य महर्षेः कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते । न चेदन्यकार्यातिपातः प्रविश्यात्र प्रतिगृह्यतामातिथिसत्कारः । अपिच ।

रम्यास्तपोधनानामपगतविघ्नाः क्रियाः समवलोक्य ।
ज्ञास्यसि कियद् भुजो मे रक्षति मौर्वीकिणाङ्क इति ॥ १२ ॥

राजा--अपि सन्निहितोऽत्र कुलपतिः ?

वैखा--इदानीमेव दुहितरं शकुन्तलामतिथिसत्कारायादिश्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः ।

युक्ततरम् । इदं स्वार्थं विहायास्मन्नियोगकरणम् । पुरुवंशजस्य युक्तत्वम् पुरुवद्वर्तनात् । यदुक्तं--"येनास्य पितरो याता येन याताः पितामहाः । तेन मार्गेण गन्तव्यं तत्रस्थो नावसीदति ॥" इति । एवंगुणोपेतम् एवंविधैर्गुणैरुपेतम् । चक्रवर्तिनं सार्वभौमम् । बाहूद्यमनमाशीर्वादमुद्रा । प्रतिगृहीतेत्यनेनादरातिशयो व्यज्यते । चिकीर्षितम् प्रति त्वरमाणस्तन्निवेदयन्नवसरोचितं सत्करोति । **राजन्निति** । एष इत्यभिनये । कुलस्य मुनिगणस्य पतिः रक्षिता कुलपतिः । 'कुलं वंशे सजातीयगणे च स्यान्निकेतने' इति केशवः । अनेन कण्वस्य तपःप्रभावः तपोवनस्य मुनिगणान्वितत्वं च व्यज्यते । यदुक्तं भारते "स काश्यपतपोगुप्तमाश्रमप्रवरं शुभं यतिभिर्वालखिल्यैश्च वृतं मुनिगणान्वितम् ॥" इति । अनुमालिनीतीरं मालिन्यास्तीरे । यदुक्तम् "अलङ्कृतं द्वीपवत्या मालिन्या रम्यतीरया" इति । अनेनाश्रमस्योत्कर्षातिशयो व्यज्यते । तेन प्रवेष्टव्यत्वं च । अन्यशब्दोऽर्थान्तरकार्यपरामर्शी । अन्यस्य कार्यस्यातिपात इति । अतिपातः कालविलम्बः । **अपिचेति** वाक्यार्थसमुच्चये । येन न केवलमतिथिसत्कारस्वीकरणमेव भुजकर्तृकरक्षणज्ञानमपि कर्तव्यमिति । **रम्या** इति । अपगतविघ्नत्वात् समुचितदेशकालद्रव्यसहायतया क्रियमाणत्वाद्रम्याः । मौर्व्याः तदाघातेन सञ्जातः किणो मौर्वीकिणः । स अङ्कश्चिह्नं यस्य स मौर्वीकिणाङ्कः । 'किणो रूढव्रणस्थाने' इति केशवः । 'अङ्कश्चिह्नेऽन्तिकोरस्योः' इति च । अनेन रक्षाविषयः क्लेशो व्यज्यते । तस्य विशिष्टफललाभात्तदपगमश्च । "क्लेशः फलेन हि पुनर्नवतां विधत्ते" इति । **अपि सन्निहित** इति । अपिः प्रश्ने । इदानीमेवेत्येवकारेण कुलपतिदर्शनालाभं प्रत्यनुशोचन

राजा--भवतु तां द्रक्ष्यामि। विदितभक्तिं मां सा महर्षेः करिष्यति।

वैखा--साधयामस्तावत्।

[सशिष्यो निष्क्रान्तः]

राजा--सूत! चोदयाश्वान्। पुण्याश्रमदर्शनेन तावदात्मानं पुनीमहे।

सूतः--यदाज्ञापयत्यायुष्मान्।

[भूयो रथवेगं रूपयति]

राजा--(समन्तादवलोक्य) अकथितोऽपि विज्ञायत एव यथायमाभोगस्तपोवनस्येति।

सूतः--आयुष्मन्! कथमिव?

राजा--किन्न पश्यति भवान्? इह हि।

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।

व्यज्यते। कुलपतावसंनिहितेऽप्यतिथिसत्कारस्य निर्विच्छेद इत्याह **अतिथिसत्कारा**येति। प्रातिकूल्यं दैव तद्धेतुकमसुखम्। भवतु तथास्तु। कुत इत्याह **तामिति।** किं तेनेत्याह विदितभक्तिमिति। विदिता भक्तिर्यस्य स विदितभक्तिः तम्। महर्षेरिति कर्तरि षष्ठी। महर्षिणा **विदितभक्ति**र्मात यावत्। साधयाम इति। गच्छाम इत्यस्य ग्राम्यत्वात्। आश्रमदर्शनं सूतमभ्यन्तरीकरोति पुण्येति। आत्मानं मनः। **अकथित** इति। आभोगः परिपूर्णता। यथेति सम्यगर्थे। अयमाभोगः अकथितोऽपि तपोवनस्येति यथावत् ज्ञायत एवेत्यर्थः। ज्ञानसाधनं पृच्छति **कथमिवे**ति। किं न पश्यति भवान्। यदि पश्यति तर्हि स्वयमेव जानातीति भावः। ज्ञानसाधनान्याह **इह हीत्या**दिना। इह तरूणामधः नीवाराः सन्ति हि। तत्र तत्सद्भावे संगतिमाह **शुके**ति। शुकैः कोटरं नीयमानेषु तन्मुखे स्खलितत्वात्ततश्च्युताः। सूच्यन्ते ज्ञायन्ते। यथा"भेदं सूच्यन्ते न, स्थिते तमस्यद्रयोऽपि सूच्यन्ते न" * इति। इह क्वचित् प्रस्निग्धा

* इत्यत्रेत्यर्थः।

विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ॥ १३ ॥

सूतः—सर्वमुपपन्नम् ।

राजा—(स्तोकमन्तरं गत्वा) सूत! तपोवनवासिनामुपरोधो मा भूत् । तदेतावत्येव रथं स्थापय । यावदहमवतरामि ।

सूतः—धृताः प्रग्रहाः । अवतरत्वायुष्मान् ।

राजा—(अवतीर्य) विनीतवेषप्रवेश्यानि तपोवनानि नाम । इदं तावत् गृह्यताम् (इति सूतायाभरणानि धनुश्चोपनीय) यावदाश्रमवासिनः प्रत्यवेक्ष्याहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः ।

सूतः—तथा करोमि ।

[इति निष्क्रान्तः]

राजा—(परिक्रम्य) इदमाश्रमद्वारम् । यावत् प्रविशामि । (प्रविश्य निमित्तं सूचयन्)

उपला इंगुदीफलभिद इति सूच्यन्ते । प्रस्निग्धत्वादिंगुदीफलभिद एते इति ज्ञायन्त इत्यर्थः । इंगुदीतैलेन हि मुनीनामभ्यंगो दीपश्च । यद्वक्ष्यति "तपस्विनां इंगुदीतैल-मिस्साचिक्कणसीससस्स" इति । "इङ्गुदीस्नेहकृतान्नदीपा" इत्यन्यत्र च । "इंगुदी तापसतरु"रित्यमरः । इह मृगा विश्वासोपगमात् । विश्वासस्य हिंसाद्यभावविषयस्य । उपगमात् । अभिन्नगतयः भेदं विशेषं न प्राप्ता पूर्ववदेवावस्थिता गतिर्गमनं येषां ते । तथा शब्दं रथनेमिध्वनिं सहन्ते । रथनेमिध्वन्यसहना न धावन्तीति भाव । इह तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः । शिखा अग्राणि । निष्यन्दोऽधस्तोयनिष्यन्दः । **आर्द्रपृष्ठाः** आर्द्रः स्नानेन सरसः पृष्ठभागो येषाम् । यदुक्तं कादम्बर्याम् । "स्नानार्द्रपृष्ठतया विगतश्रमेषु वाजिषु" इति । एवं धर्मावाप्त्यै तपोवनं प्रविशतः क्षितीशस्य । कामावाप्तिं शंसत्प्रास्पन्दत दक्षिणो बाहुः । तदनुक्रान्तमाह **निमित्तं सूचयन्**निति । तस्य निमित्तत्वमेष्यतः फलस्य ज्ञापकत्वात् । कलत्रावाप्तिर्हि तस्य फलम् । यदुक्तमनेन "तस्य स्फुरति पौलस्त्यः सीतासङ्गमशंसिनि । निचखानाधिकक्रुद्धः शरं सव्येतरे भुजे ॥" इति । एवं सञ्जातसुनिमित्तस्तेन किमिदुन्निमितकल-

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥ १४ ॥

नेपथ्ये---इदो सहीओ ।

राजा---(कर्णं दत्वा) अये दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते । यावदत्र गच्छामि । (परिक्रम्यावलोक्य च) एतास्तपस्विकन्याः स्वप्रमाणानुरूपैः सेचनघटैः बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते । अहो मधुरमासां दर्शनम् ।

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ १५ ॥

१. इतस्सख्यौ ।

त्रेषणावासनो देशानौचित्येन तस्य निष्फलत्वमाशङ्क्य परिहरति **शान्त**मिति । शान्तत्वं मुख्यतया मुनिजने । तदाश्रये आश्रमपदे उपचरितम् । शान्तमुनिजनाकीर्णमित्यर्थः । स्फुरति स्पन्दते बाहुः । प्राधान्याद्दक्षिणः । चशब्दो विरोधद्योतकः । फलद्वारा विरोधः । अत आह कुतः फलमिहास्येति । इहास्य फलं न भवतीत्यर्थः । अथवेत्युक्तपक्षाक्षेपे इह सम्भवतीत्यर्थः । कुत इत्याह **भवितव्याना**मिति । इहार्थवेति सर्वत्रोक्तपक्षाक्षेपे दृश्यते अये इति कौतुके । वृक्षवाटिकामिति षष्ठ्यर्थे द्वितीया । इवेति प्रतीतिमात्रे । स्वप्रमाणानुरूपैरित्यनेनाग्राम्यत्वं व्यज्यते । तासां सन्दर्शनेन प्रीयमाणचक्षुरिन्द्रियस्तेन सञ्जातविस्मय आह **अहो** इति । मधुरं सादृश्याल्लक्षणेयम् । यथा मधुरस्य सितादेरास्वादो जिह्वां तथासां दर्शनमस्माकं चक्षुर्नितरामाह्लादयतीत्यर्थः । तासां दर्शनमाधुर्यनिमित्तस्य लावण्यस्यान्तःपुरसीमन्तिनीलावण्यादाधिक्यं प्रतिपादयन्निदर्शनेन तस्य तस्य विस्मयावहत्वमाह **शुद्धान्ते**ति । शुद्धान्तशब्दोऽत्र वपुरन्वयानुपपत्त्या बाधितान्तःपुरलक्षणमुख्यार्थः सम्बन्धादाश्रयाश्रयिभावलक्षणात्तदाश्रितं वधूजनं लक्षयति । सुलभाङ्गसंस्कारोपकरणत्वं प्रतीयते । तेन मलहानगुणाधानादिना संस्कृताङ्गत्वं च । इदमस्मन्नयनामृतायमानम् । वपुः लावण्यम् । "वपुश्शरीरे लावण्ये जले दीप्तौ च सज्जने" इति केशवः । आश्रमवासिनः जनस्य तपस्विकन्यानाम् ।

यावदेनां छायामाश्रित्य प्रतिपालयामि ।

[विलोकयन स्थितः]

[ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला]

शकु—ईदो सहीओ ।

एका--हला सउन्दले! तुवत्तो वि तादकस्सवस्स अस्समरुक्खा पियदरत्ति तक्केमि । जं णेण णोमालिआकुसुमपेलवा तुमं पि एदाणं आलवालपूरणे णिउत्ता ।

१. इतः सख्यौ ।

२. हला शकुन्तले! त्वत्तोऽपि तातकाश्यपस्याश्रमवृक्षाः प्रियतरा इति तर्कयामि । यदनेन नवमालिकाकुसुमपेलवा त्वमपि एतेषाम् आलवालपूरणे नियुक्ता ।

अत्राङ्गसंस्कारोपकरणराहित्य व्यज्यते । तेन तत्पराङ्मुखत्व च । यदीति सिद्धानुवादे । यथा 'सगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम्' इत्यादौ । दूरीकृताः गुणाधिक्यादधःकक्ष्यां नीताः । खल्वित्यवधारणे । उद्यानलताः । अत्रानवरतसेकदोहलादिसंवर्धितत्वं वनलताभिरित्यत्र तद्राहित्यं च व्यज्यते । इदं वपुः अस्य वपुषोऽन्यत्रासम्भवादेतद्वपुस्सदृशं वपुरित्यर्थः । आश्रमवासिनो जनस्य इद वपुः शुद्धान्तदुर्लभं यदि वनलताभिः गुणैः उद्यानलता दूरीकृताः खल्वित्यन्वयः । अत्र तपस्विकन्यालावण्यस्यान्तःपुरवधूजनलावण्यादाधिक्य पूर्ववाक्यार्थः । वनलतागुणानामुद्यानलतागुणेभ्य आधिक्यमुत्तरवाक्यार्थः । उभयत्र व्यतिरेकोऽलङ्कारः । "उपमानाद्यदन्यस्य व्यतिरेकस्स एव सः" इति । पूर्ववाक्यार्थे उत्तरवाक्यार्थस्यारोप्यमाणत्वान्निदर्शना च । यदुक्तं—"यत्र तु प्रकृतवाक्यार्थे वाक्यार्थान्तरमारोप्यते सामानाधिकरण्येन तत्र सम्बन्धानुपपत्तिमूला निदर्शनैव युक्ता" इति । सा चोपमापर्यवसायिनी । यदुक्तं "निदर्शना अभवद्वस्तुसम्बन्ध उपमापरिकल्पकः" इति । अतोऽयमर्थः—वनलतागुणानामुद्यानलतागुणेभ्य आधिक्यमिव तपस्विकन्यालावण्यस्यान्तःपुरवधूलावण्यादिदमाधिक्यम् अहो आश्चर्यमेतदिति । अथ वाक्षांग्रपक्षेणिसेचनाय समुद्यता । प्रियंवदानसूयाख्ये सख्यौ प्राह शकुन्तला **इदो** इति । रहसि सम्भूय वर्तमानास्ताः सौहार्दप्रयुक्तेन विश्वासेन क्रीडया परस्परं स्वैरं सल्लपन्ति **हलेत्यादि** । हला

शकु--हला पिअंवदे! ण केवलं तादणिओओत्ति मम वि सोदरसिणेहो एदेसु।

[वृक्षसेचनं रूपयति]

राजा--(विलोक्य) कथमियं सा कण्वदुहिता। असाधुदर्शी खलु तत्रभवान् काश्यपः। य इमामाश्रमभरणे नियुङ्क्ते।

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया समिल्लतां च्छेत्तुमृषिर्व्यवस्यति ॥ १६ ॥

भवतु पादपान्तरित एव विश्वस्तां तावदेनां पश्यामि।

[तथा करोति]

---

१. हला प्रियंवदे! न केवलं तातनियोग इति ममापि सोदरस्नेह एतेषु।

इति सखीनां परस्पराह्वाने। 'हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति' त्यमरः। त्वत्तोऽपि प्रियतरा इत्यन्वयः। त्वमपीत्यपिर्भिन्नक्रमः। नवमालिकाकुसुमपेलवापीति। आलवालपूरणे न केवलं सेकमात्रे। तातस्य न निर्बन्ध इत्याह **ण केवल**मिति। इतिहेतौ। किं तर्हि क्रियत इत्याह **मम वीति**। सोदरस्नेहः तत्सदृशस्नेहः। सखीवचनेन कण्वदुहिता शकुन्तलेयमिति जानन्नाह **कथमि**ति। सा या वैखानसमुखाच्छ्रुता। अथ विस्मयावेशेन तां दृश्यबुध्यावलोकयंस्तद्रूपामृतपानप्रीयमाणचक्षुरिन्द्रियद्वारा तदासक्तचित्तः कामकलापरिशीलनसमुचिते काले तां धर्मकलां परिशीलयन्तीमालोक्य तत्प्रयोजकस्य मुनेरविमृश्यकारितामाह असाध्विति। कामकलापरिशीलनमुक्तं राजशेखरेण "उत्तालालकभञ्जनानि कबरीभारेषु शिक्षारम्भो दन्तानां परिकर्म नीविनहनं भ्रूलास्ययोग्याग्रहः। तिर्यग्लोचनवल्गितानि वचसां च्छेकोक्तिसंक्रान्तयः स्त्रीणां म्लायति शैशवे प्रतिकलं कोऽप्येष कालक्रमः॥" इति। साधु सम्यक् द्रष्टुं विचारयितुं शीलमस्येति साधुदर्शी तस्मादन्योऽसाधुदर्शी। अविमृश्यकारीत्यर्थः। खलुरवधारणे। तत्रभवानिति पूज्यवाची। काश्यप इति कण्वस्य गोत्रनाम। तत्रभवान् काश्यप इत्यभिजनादयो गुणा अस्मिन्ननुपयोगिन आसन्निति भावः। उक्तमर्थमुपपादयति **इमामि**ति। इमां लोकातिक्रान्तरामणीयकाम्। आश्रमभरणे तपस्विजनोचिते। नियुङ्क्ते न तु कदाचित् न्ययुङ्क्तेति। एवं मुनेर्योग्यायोग्यविचाराभावमुक्त्वा शक्याशक्यविचाराभावमाह **इद-**

शकु—अणसूए! आअदपिणद्धेण वक्कलेण पिअंवदाए जन्तिआ विअह्मि । ता सिढिलेहि दाव णम् ।

[अनसूया शिथिलयति]

प्रियं—एत्थ पओहरवित्थारइत्तअं अत्तणो जोव्वणं उवालब्भ ।

राजा—काममननुरूपमस्या वयसो वल्कलम् । न पुनरलङ्कारश्रियं न पुष्यति । कुतः—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति

१. अनसूये! आयतपिनद्धेन वल्कलेन प्रियंवदया यन्त्रितेवास्मि । शिथिलय तावदेनम् ।

२. अत्र पयोधरविस्तारयितृकमात्मनो यौवनमुपालभस्व ।

मिति । इदं नवमालिकाकुसुमपेलवम् । किलेति वाक्यालङ्कारे । अव्याजमनोहरं निसर्गरमणीयम् । तपःक्षमं तपसि तपश्चरणे क्षमं शक्तम् । नीलोत्पलपत्रधारया समिल्लताच्छेदनव्यवसाय इव एतद्वपुषस्तपःक्षमत्वसाधनेच्छेत्यर्थः । निदर्शनेयम् । अभिनवयौवनप्रयुक्तया स्तनमुकुलयोः प्रतिक्षणप्रवृध्या तन्निबद्धस्य वल्कलस्य सातिशयेन सश्लेषेणावशाङ्गलतिका तत्तत्वतोऽसंविदाना आह **अणसूए** इति । आयतं दृढम् । यथा "स च विधमत्यायतन म्नेहात्तिष्ववददकमत्यायततः" इति । आयतं यथा भवति तथा पिनद्धेन । वल्कं वल्कलमास्त्रियामित्यमरः । यन्त्रिता निरुद्धप्रसारा । तयानवगम्यमानां स्तनाभिवृद्धिमुक्तिभंग्या प्रबोधयति **एत्थेति** । अत्र वल्कलबन्धदार्ढ्ये । यौवनमिति न मामिति भावः । अनेनालम्बनविभावपरिपोषविधायिषु मूर्धाभिषिक्तो यौवनारम्भ उक्तः । एवं पादपान्तर्हितस्तां स्वैरमालोकयन् तस्या अभिनवयौवनप्रतिक्षणप्रवर्धमानयोः कुचकुड्मलयोरननुरूपं वल्कलमालोक्य तस्यालङ्कारत्वं साधयन् तदाकृतेर्लोकोत्तरतां प्रतिपादयति **काम**मिति । काममित्यकामानुमतौ । 'अकामानुमतौ कामम्' इत्यमरः । वल्कलमस्या वयसोऽननुरूपं काममित्यन्वयः । वयसः औचित्याद्यौवनस्यालङ्कारार्हस्य । अननुरूपम् । अनलङ्कारत्वात् । अकामानुमतौ हेतुमाह न पुनरिति । पुनश्शब्दो विशेषद्योतकः । विशेषमाह अलङ्कारश्रियं न पुष्यति नेति । अलङ्कारेण या श्रीः ताम् । पुष्यति करोति । यथानर्घराघवे 'नयनयोरनागुष्यं पुष्यन्त्यवतमसमुच्चैर्जमुलचः' इति । सम्भाव्यनिषेधनिवर्तने द्वौ नञौ । कुत इत्युक्तवक्ष्यमाणयोर्ज्ञाप्यज्ञापकभावद्योतकः । उक्तमर्थमुपपादयति इयं तन्वी वल्कलेनाप्यधिकमनोज्ञेति । वल्कलान्वये पर्वस्मात-

इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ १७ ॥

शकु—एसो वादेरिदपल्लवंगुलीहिं तुवरावेदि विअ मं केसररुक्खओ। जाव णं सम्भावेमि।

[परिक्रामति]

प्रियं—हला सउन्दले एत्थ एव्व मुहुत्तअं चिट्ठ। जाव तुए उवणदाए लदासणाहो विअ केसररुक्खओ पडिभादि।

---

१. एष वातेरितपल्लवांगुलीभिस्त्वरयतीव मां केसरवृक्षः। यावदेनं सम्भावयामि।

२. हला शकुन्तले! अत्रैव मुहूर्तं तिष्ठ। यावत्त्वयोपनतया लतासनाथ इव केसरवृक्षः प्रतिभाति।

धिकं दर्शनीया। स एव ह्यलङ्काराणां धर्मः। यत् स्वत उत्कृष्टस्य स्वान्वये उत्कर्षातिशयाधानम्। वल्कलेनापीत्यपिरननुरूपत्वस्मारकः। सरसिजमित्यादिवाक्यार्थद्वयमस्योपपादकमेव। अनुविद्धं सम्पृक्तम्। मलिनम् असितम्। लक्ष्म कलङ्कः। लक्ष्मापि लक्ष्मीं तनोति। हिमांशुर्लक्ष्मणापि दर्शनीय इत्यर्थः। उभयत्र प्रतिवस्तूपमा। "प्रतिवस्तूपमा तु सा सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः" इति। एषा चोपमापर्यवसायिनी। अतः यथा सरसिज शैवलेन यथा हिमांशुर्लक्ष्मणा तथेयं तन्वी वल्कलेनाधिकमनोज्ञा। अतो वल्कलमस्या अलङ्कारश्रियं पुष्यत्येवत्यर्थः। अत्र सरसिजसाम्येन कुचयोस्संस्थानसौष्ठवं हिमांशुसाम्येन कुचमण्डलस्य बहललावण्यपरिपूर्णत्वं च व्यज्यते। एवं वल्कलस्यालङ्कारकार्यकरत्वमुपपाद्य कार्यकरत्वेनाक्षिप्तं तस्य तदाकृतिसम्बन्धिनमलङ्कारभावं विशेषरूपं सामान्येनोपपादयति **किमिव हीति**। मधुराणां सकललोकचक्षुरिन्द्रियाह्लादकारिणीनाम्। आकृतीनां सर्वं मण्डनमेवेत्यर्थः। अत्र प्रतिवस्तूपमार्थान्तरन्यासयोस्संसर्गात संसृष्टिरलङ्कारः। **एसो** इति। अत्र पल्लवेष्वंगुलित्वमारोप्यते। अतः केसरवृक्षेऽर्भकत्वमर्थादायाति। त्वरयतीत्यनेन त्वराकारणमाह्वानं लक्ष्यते। केसरवृक्ष एवार्भको वातान्दोलितपल्लवांगुलिसंज्ञया मामाह्वयतीवेत्यर्थः। **परिक्रामति**। परिक्रमणमत्र केसरान्तिकगमनम्। तदन्तिकगतां तामाह **हला** इति। कुत इत्याह **जाव** इति। रुक्खओ इति प्राकृते स्वार्थे कः। सनाथः सहितः। यावदिति यस्मादर्थे। लतासाम्येन सौन्दर्यातिशयो व्यज्यते। प्रत्यक्षस्तुतिमसहमानाह

शकु—अदो क्खु सि पिअंवदा ।[1]

राज—प्रियंवदा तथ्यमाह । न पुनः प्रियमिति । अस्याः खलु-

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥ १८ ॥

अन—हला सउन्दले! इअं सअंवरवहू सहआरस्स तुए किदणामहेआ वणजोसिणित्ति णोमालिआ । णं विसुमरिदासि ।[2]

शकु—जइ अप्पाणं विसुमरिस्सम् ।[3] (लतामुपेत्यावलोक्य च) हला रमणीओ इमस्स पाअवमिहुणस्स वइअरो संवुत्तो । णवकुसुमजोव्वणा वणजोसिणी बद्धपलदाए उवहोअक्खमो सहआरो ।

(इति पश्यन्ती तिष्ठति)

---

१. अतः खल्वसि प्रियंवदा ।

२. हला शकुन्तले! इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका । एनां विस्मृतासि ।

३. यद्यात्मानं विस्मरिष्यामि । हला रमणीयोऽस्य पादपमिथुनस्य व्यतिकरः संवृत्तः । नवकुसुमयौवना वनज्योत्स्ना बद्धफलतया उपभोगक्षमः सहकारः ।

अदो इति । अतः एवं प्रियभाषणात् । प्रियवदा प्रियवदानामधेया । सख्योक्तं लतासाम्यमनुभूयाह **न पुन**रिति । सत्यत्वमुपपादयत्यस्या इति । अङ्गेषु सन्नद्धं सञ्जातं यौवनं कुसुममिवेत्यन्वयः । अङ्गेष्विति बहुवचनेन यौवनकार्यस्य माधुर्यसौकुमार्यादेः सर्वाङ्गीणता व्यज्यते । यदुक्तं राजशेखरेण "विधत्ते मोल्लेखं कतरदिह नाङ्गं तरुण्याः" इति । सन्नद्धपदेन सकललोकहृदयोन्माथकत्वं च । अन्तिकस्थं सहकारं स्वयमेवोपपन्नं कुर्वतीं नवमालिकामुद्दिश्याह **हला** इति । अत्र काक्वा प्रश्नः । किं विस्मृतवत्यसि । सहकारे वरत्वमर्थादायाति । सहकारावस्थेति भावः । **जइ** इति । यद्येनां विस्मृतास्मि तर्ह्यात्मानं विस्मरिष्यामीत्यर्थः । एतद्विस्मरणमात्मविस्मरणमिव न शङ्कनीयमिति भावः । **हला** इति । व्यतिकरस्संश्लेषः । रमणीयत्वमुपपादयति णवेति । नवकुसुमानां यौवनं विकासो यस्याः । नवं कुसुमं रजो यस्य तन्नवकुसुमं तादृशं यौवनं यस्या इति

प्रियं--(सस्मितम्) अणसूए! जाणासि किं सउन्दला वणजोसिणीम् अदिमत्तं पेक्खदित्ति।

अन--णं खु विभावेमि। कहेहि।

प्रियं--जह वणजोसिणी अत्तणो सदिसेण पाअवेण सङ्गआ अविणाम एव्वं अहं वि अत्तणो अणुरूवं वरं लहेअं ति।

शकु--एसो णूणं तुह अन्तग्गओ मणोरहो।

[कलशमावर्जयति]

राजा--अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्। अथवा--

---

१. अनसूये! जानासि किं शकुन्तला वनज्योत्स्नामतिमात्रं पश्यतीति।

२. न खलु विभावयामि। कथय।

३. यथा वनज्योत्स्ना आत्मनः सदृशेन पादपेन सङ्गता अपि नामैवम् अहमप्यात्मनोऽनुरूपं वरं लभेयेति।

४. एष नूनं तवान्तर्गतो मनोरथः।

च। बद्धं फलं कुसुमपरिणामो युवता च यस्य स बद्धफलः। वात्सल्येन वनज्योत्स्नां सावधानमालोकयन्तीं शकुन्तालामुद्दिश्य सपरिहासमाह **अणसूए** इति। विभावयामि जानामि। **लभेयेती**ति। मन्येति शेषः। लज्जया वरप्रसङ्गमसहमानाह **एसो** इति। न ममेति भावः। आवर्जयति सेकार्थमधोमुखं करोति। अथ क्रमेण तां प्रत्यङ्कुरिताभिलाषस्तस्या गम्यागम्यविचारे मुनिकन्यकाया अपि पाक्षिकं गम्यत्वमस्तीत्यवधार्य गम्यत्वपक्षस्य सम्भावनां प्रार्थयते। **अपि नामे**ति। स्यादिति सम्भावनाप्रार्थनयोर्लिङ्। अपि नामेति तद्योतकः। भूतप्राणता चात्र लिङः। प्रार्थ्यमानस्यातीतत्वात्। सवर्णादन्यदसवर्णं तादृशं क्षेत्रं कलत्रमसवर्णक्षेत्रम्। तस्मिन् सम्भवो जन्म यस्याः सा। 'क्षेत्रं पत्नीशरीरयो'रित्यमरः। ब्राह्मणानां चतुर्षु वर्णेषु विवाहस्य विहितत्वान्मुनेरसवर्णक्षेत्रत्वमपि सम्भवति। सवर्णक्षेत्रमात्रसम्भवत्वस्य व्यपोहः। क्षत्रियस्य क्षत्रियादिषु त्रिषु वर्णेषु विवाहस्य विहितत्वात्। "शूद्रस्य भार्या शूद्रैव सा च स्वा च विशः स्मृते। ते च स्वा च क्षत्रियस्य ताश्च स्वा चाग्रजन्मन" इति

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥१९॥

तथापि तत्त्वत एनामुपलप्स्ये ।

शकु---(ससम्भ्रमं) सलिलसेअसम्भन्तो णोमालिअं उज्झिअ वअणं मे महुअरो अहिपडइ ।

(भ्रमरबाधां रूपयति)

राजा---(विलोक्य सस्पृह)

---

१. सलिलसेकसंभ्रान्तो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिपतति ।

स्मृतेः । अत्र कारणादप्रस्तुतात् कार्यं प्रस्तुतं प्रतीयते । अपि नामेयं मम भार्या स्यादिति । **अथ वे**ति । अलं प्रार्थनयेति भावः । कुत इत्याह **असंशय**मिति । संशयस्याभावोऽसंशयम् । अव्ययीभावः । इयं क्षत्रपरिग्रहक्षमा असंशयम् । अत्र सामान्याद्विशेषः प्रस्तुतः प्रतीयते । इयं मत्परिग्रहयोग्या ध्रुवमित्यर्थः । कुत इत्याह आर्यं मे मनः अस्यामभिलाषि यदिति । आर्यमधर्मपराङ्मुखम् । मनोऽभिलाषस्य प्रामाण्यमाह **सता**मिति । सतां प्रमाणमित्यन्वयः । सन्तोऽन्तःकरणप्रवृत्तिं प्रमाणत्वेनाङ्गीकुर्वन्तीत्यर्थः । 'वेदः स्मृतिः सदाचारस्स्वस्य च प्रियमात्मनः । सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतमिति । आर्यमित्यात्मगुणकथनं न दोषः* । वास्तवत्वात् । 'स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः' इति वचनात् । एवं गम्यत्वे निश्चितेऽपि परितोषमलभमानः तत्प्रकारं जिज्ञासुराह **तथापी**ति । यद्यप्यात्मतुष्टिलक्षणेन प्रमाणेनेयं गम्येति निश्चयस्तथापि तत्त्वतः वस्तुवृत्तेन उपलप्स्ये ज्ञास्यामि । इदानीमवस्थाभेदेन विभावमभिनवीकरोति । **सलिले**ति । सलिलस्य सेकेन क्षरणेन तदुत्थेन ध्वनिना सम्भ्रान्तः । अथ मधुकरपीडापर्याकुलतया विशेषदृश्यां तां विलोक्य प्रवृद्धाभिलाषो राजा नवमालिकां विहाय तद्वदनाभिमुख ततस्तया कातरतया तरलतारमवलोकितमत एवेन्दीवरधिया तस्या दृष्टिं पुनः पुनः स्पृशन्त दृष्टेः कर्णान्तविश्रा-

---

* वस्तुतस्तु । अस्यात्मगतत्वान्नाविष्करणम् । स्वगुणज्ञानाभावश्चासिद्धः । अभिमततरावाप्तिचिन्तनेर्ष्यादशां चित्तवृत्तिगतिश्च नियतं सम्भवति । असंशयमिति कण्ठेन उक्तेरुत्कटसम्भावनायामेव कवेस्तात्पर्यमित्यपि द्रष्टव्यम् ।

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधुरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥ १९ ॥

शकु—हला परित्ताअह इमिणा दुव्विणीदेण मं अहिभूअमाणम् ।

---

१. हला परित्रायेथाः अमुना दुर्विनीतेन मामभिभूयमानाम् ।

न्तत्वात्तदान्तिकेऽपान्दावराधयव मधुरझङ्कारमुच्चरन्त तथवाभिनवसारभलाभनाधरा-कृतकुसुमामोदमधराकिसलयमाभिमृशन्त मधुकरमाभिमुखीकृत्य कार्यसमारोपद्वारा तस्मिन् कामुकत्वमारोप्य तस्य स्वव्यतिरेकमाह **चलापांग**मिति । हे मधुकर त्वमनया चलापाङ्गं चलो लोलतारकोऽपाङ्गो यथा भवति तथा दृष्टः दृश्यबुध्या विलोकितः । अनेनानुरागानुभावभूतं तरलाख्यं वीक्षणमुक्तम् । 'तरलं तदिति प्राहुर्लोलतारकनीनिकम्' इति । एवं विशिष्टवीक्षणविदिततदनुरागः सुकृतशतैकलभ्यं कटाक्षवीक्षणसुखमनुभूयानुरागिणीं वेपथुमतीमेनां बहुशो बहुवारं स्पृशस्यालिङ्गसि । वेपथुमतीमिति तत्कालविशेषणम् । वेपथुस्सात्विको विकारः । "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरसादोऽथ वेपथुः वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विका मताः" इति । इवशब्दोऽत्रावधारणे । अथालिङ्गनसमयजनितेन सात्विकविकारेणास्यानुरागस्य क्रमोत्कर्षमवधार्य रहस्याख्याय्येव कर्णान्तिकचरो मृदु स्वनसि मन्त्रयसे । तथैव रहस्यमाख्यायास्मदभिलषितानुकूलेयमिति मत्वा करं व्याधून्वत्या अस्या रतिसर्वस्वं रतिनिधानभूतम् अधरमधरामृतं पिबस्यास्वादयसि । करं आधून्वत्या इति पानसमयविशेषणेन माधुर्यातिशयप्रयुक्ताग्रहातिरेकहेतुकमधरस्य निर्दयग्रहणं व्यज्यते । तेन रससर्वस्वदानं च । रतिसर्वस्वमित्यनेन कर्तव्यावशेषाभावश्च । खलुरेवार्थे । यत एवम् अतस्त्वमेव कृती । एवमनेकजन्मार्जितसुकृतशतैकलभ्यानामस्माभिश्चिराभिलषितानामस्याः कटाक्षवीक्षणगोचरीभावादीनां तवायत्नसिद्धत्वात्त्वमेव कृती सुकृती । वय तत्त्वान्वेषात गम्यत्वनिश्चिकीर्षया हताः आयासमात्रपात्रीभूता जाताः । अत्र क्षुद्रकार्यसमारोपनिबन्धना समासोक्तिः व्यतिरेकश्च । "परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिरिति ।" तत्र समासोक्त्या व्यतिरेक उत्थाप्यते । स पुनरुत्थाप्यमान उत्थापिकायामस्याः शोभामात्रहर्तेति व्यतिरेकस्योत्थानेऽङ्गं समासोक्तिः समासोक्तेश्चमत्कारकारित्वे व्यतिरेक इति तयोः परस्परमङ्गाङ्गि-

उभे—(सास्मितं) को अह्मे परित्तादुम् । दुस्सन्तम् अक्कन्द । राअरक्खिदाणि तवोवणाणि णाम ।

राजा—अवसरोऽयमात्मानं दर्शयितुम् । न भेतव्यं न भेतव्यम् (इत्यर्धोक्ते) राजभावस्त्वभिज्ञातो भवेत् । भवत्वेवं तावदभिधास्ये ।

शकु—एस दुट्ठो ण विरमइ ता अण्णदो गमिस्सम् । (पदान्तरे स्थित्वा सदृष्टिक्षेपं) कहं इदो वि मं अणुसरइ ।

राजा—(सत्वरमुपेत्य)

क: पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ? ॥ २० ॥

[सर्वा राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः]

अन—अज्ज ण क्खु किञ्चि अच्चाहिदम् । इअं णो पिअसही महुअरेण आउलीकिअमाणा कादरीभूदा । [शकुन्तलां दर्शयति]

१. के आवां परित्रातुम् । दुष्यन्तमाक्रन्द । राजरक्षितानि तपोवनानि नाम ।

२. एष दुष्टो न विरमति तदन्यतो गमिष्यामि । कथमितोऽपि मामनुसरति ।

३. आर्य न खलु किञ्चिदत्याहितम् । इयं नौ प्रियसखी मधुकरेणाकुलीक्रियमाणा कातरीभूता ।

भावात् सङ्करालङ्कारोऽयम् । **का अह्मे** इति । आवां न परित्राणसमर्थे इति भावः । तर्हि किं करवाणीत्याह **दुस्सन्तं** इति । **अवसरोऽयमि**ति । प्राभावस्त्वमनवसानार्थत्वेनापदेश्यत्वात् । **अथवे**ति । एवं न वक्तव्यमित्यर्थः । कुत इत्याह **राजभाव** इति । पदान्तरे स्थानान्तरे । **क** इति । पौरव इत्यनेन धर्मतश्शासनं व्यज्यते । अनादरे सप्तमी । पौरवमनादृत्येत्यर्थः । अविनयं तत्कार्यमकृत्यम् । मुग्धासु प्राप्तिमूढासु । अनेन सुकरत्वं व्यज्यते । तपस्विकन्यास्वित्यनेनात्याहितं च । **न किञ्चि-दत्याहित**मिति । महद्भयं नास्तीत्यर्थः । "अत्याहितं महाभीत्यां प्राणसंशयकर्मणी"ति । किं तर्हीत्याह **इय**मिति । इयमित्यभिनये । साध्वसात् अतर्कितोपनतमहापुरुषदर्शनजनितात् । मनस्संक्षोभपूर्वोऽङ्गसादस्साध्वसः । अवचनात् आ...

राजा—(शकुन्तलाभिमुखो भूत्वा) अपि तपो वर्धते ।

[शकुन्तला साध्वसादवचना तिष्ठति]

अन—दाणीं अदिहिविसेसलाहेण । हला सउन्दले ! गच्छ उडजम् । फलमिस्सं अग्घं उवहर । इदं पादोदअं भविस्सदि ।

राजा—भवतु । भवतीनां सूनृतयैव गिरा कृतमातिथ्यम् ।

प्रियं—तेण हि इमस्सिं दाव पच्छाअसीदलाअं सत्तपण्णवेदिआअं अज्जो उपविसिअ परिस्समविणोदणं करेदु ।

राजा—ननु यूयमप्यनेन कर्मणा परिश्रान्ताः ।

प्रियं—हला सउन्दले उइदं णो पज्जुपासणं अदिहीणम् । उपविसह्म ।

---

१. इदानीमतिथिविशेषलाभेन । हला शकुन्तले गच्छोटजम् । फलमिश्रमर्घ्यमुपहर । इदं पादोदकं भविष्यति ।

२. तेन ह्यस्यां तावत् प्रच्छायशीतलायां सप्तपर्णवेदिकायामार्य उपविश्य परिश्रमविनोदनं करोतु ।

३. हला शकुन्तले उचितं नः पर्युपासनमतिथीनाम् । अत्रोपविशामः ।

चना । तस्यामवचनायां स्वयं प्रतिपत्तिः । **अतिथिविशेषलाभेने**ति । तपो वर्धत इत्याद्यानि । विशिष्टोऽतिथिरतिथिविशेषः । लाभेनेत्यनेन प्रीत्यतिशयो व्यज्यते । एवं प्रतिपत्तिमूढां तामतिथिसत्काराय त्वरयति **हले**ति । इदं सेकार्थं सम्भृतम् । तस्याः क्षणिकमपि विग्रहमसहमान आह **भवत्वि**ति । सूनृतया । 'सूनृतं प्रिये' इत्यमरः । आस्तामर्घ्यपाद्यादिः भवतीनां मधुरभाषणेनैव सत्कृतोऽस्मीति भावः । अतिथिविषयोचितमासनदानादिकमारभते **तेन ही**ति । प्रच्छायेन शीतलायाम् । अनेन प्रलोभनं व्यज्यते । तेनोपवेशे प्रीतिश्च । ताभिः सह स्वैरासिकां कांक्षन्नाह **नन्वि**ति । युष्माकमपि परिश्रमविनोदावसरोऽयं तद्युष्माभिरप्युपवेष्टव्यमिति भावः । ससाध्वसां तां तत्पूर्वदृष्टेन महापुरुषेण सहोपवेशेऽनुकूलयति **हले**ति । **स्वगत**मिति । "सर्वेषां

[सर्वे उपविशन्ति]

शकु---(स्वगत) किण्णु खु इमं पेक्खिअ तवोवणविरोहिणो विआरस्स गमणीअह्मि संवुत्ता ।

राजा—(सर्वा विलोक्य) अहो समवयोरूपरमणीयं सौहार्दं भवतीनाम् ।

प्रियं---(जनान्तिकं) अणसूए! को णु खु चदुरगम्भीराकिदी महुरं पिअं आलवन्तो पभवन्तो दक्खिण्णं वि करेइ ।

१. किन्नु खल्वमुं दृष्ट्वा तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता ।

२. अनसूये को नु खलु चतुरगम्भीराकृतिर्मधुरं प्रियमालपन् प्रभवन् दाक्षिण्यमपि करोति ।

नियतस्यैव श्रव्यमश्रव्यमेव च । सर्वश्रव्यं प्रकाशं स्यादश्रव्यं स्वगतं मतमिति । अथ दर्शनीयाकृते राज्ञो दर्शनेनाङ्कुरितरतिभावा काममुखममविदाना विमृशति **किण्णुखु** इति । अमुं दृष्ट्वेति हेतुभावगर्भम । अस्य दर्शनादित्यर्थः । विकारस्य मनसश्चक्षुरिन्द्रियद्वारा रूपलक्षणविषयानुभवौन्मुख्यरूपस्य । विषयपराङ्मुखं हि तपोवनवासिजनमनः अतः आह तपोवनविरोधिन इति । मधुरभाषणेन ता आवर्जयति **अहो** इति । रूपम् वपुस्सौन्दर्यं स्वभावश्चेति त्रयोऽर्था विवक्षिताः । "अथ रूपं नपुंसकं स्वभावाकृतिसौन्दर्यवपुष्षु श्लोकशब्दयो"रिति केशवः । सौहार्दं सख्यम । "त्रिपताकाकरेणान्यानपवार्यान्तरा कथाः । अन्येनामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम" इति जनान्तिकलक्षणम् । तस्यान्यैरश्रवणं नाट्यसमयः । "आमन्त्रोक्तं च यद्वाक्यं न शृण्वन्ति परस्परम् । अनुक्तं श्रूयते यत्तु नाट्यधर्मस्तु तत् स्मृतम" इति । राजस्तत्त्वं सखीनुविचारयति **अणसूए** इति । पभवन्तो इति पाठः । चतुरा दर्शनीया गम्भीरा चाकृतिर्यस्य । गाम्भीर्यं हृदयं मुख्यतया । तद्व्याञ्जकायामाकृतावुपचरितम् । गाम्भीर्यव्यञ्जिकेत्यर्थः । अत्राभिगम्यत्वाधृष्यत्वे व्यज्येते । प्रभवन प्रभुः । दाक्षिण्य परच्छन्दा-

अन—सहि मह वि एत्थ कोदूहलम्। पुच्छिस्सं दाव णं (प्रकाशं) अज्ज महुरालापजणिदो विस्सासो मं मन्तावेदि। कदमो अज्जेण राएसिवंसो अलङ्करीअदि? कदमो विरहपउउस्सुअजणो किदो देसो? किंणिमित्तं वा सुउमारो तवोवणपरिस्समस्स अत्ता पत्तदम् उपणीदो?।

शकु—(स्वगत) हिअअ मा उत्तम्म। एसा तुए चिन्तिदं मन्तेदि अणसूआ।

राजा—(स्वगतं) कथमिदानीमात्मानं निवेदये। कथं वा आत्मानमपहरामि। भवत्वेवं तावदेनां वक्ष्ये। (प्रकाश) भवति! पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोऽहमाश्रमिणामविघ्नक्रियोपलम्भाय धर्मारण्यमिदमागतः।

१. सखि ममाप्यत्र कौतूहलम्। प्रक्ष्यामि तावदेनम्। आर्य! मधुरालापजनितो विश्वासो मां मन्त्रापयते। कतम आर्येण राजर्षिवंशोऽलंक्रियते? कतमो विरहपर्युत्सुकजनः कृतो देशः? किंनिमित्तं वा सुकुमारस्तपोवनपरिश्रमस्यात्मा पात्रतामुपनीतः?

२. हृदय मा उत्ताम्य। एषा त्वया चिन्तितं मन्त्रयतेऽनसूया।

नुवर्तनम्। अपिः प्रभुत्वदाक्षिण्ययोर्विशेषद्योतकः। प्रश्नमवतारं करोति **अज्जे**ति। क्रमेण लोकोत्तरगाकारगाम्भीर्यादिभिस्तस्य राजर्षित्वमवधार्य तत प्रकाशयन्ती वंशविषयादीन् पृच्छति **कदमो** इति। आत्मा देहः। राजतत्त्वजिज्ञासया प्रश्नमशक्यतया च खिन्ना हृदयमाह **हिअअ** इति। चिन्तितं प्रष्टव्यत्वेन निरूपितम्। सख्यैव पृष्ट आत्मापहारस्याधर्म्यत्वादात्मनिवेदनम्. आत्मनिवेदनस्य ग्राम्यत्वात् प्रकृतविघातकत्वाच्चात्मापहारम् उभयमपि चिकीर्षुस्तस्योपायं विमृशति **कथमि**ति। कथमिति विमर्शे। वाशब्दस्समुच्चये। अपहारोऽन्यत्वेन कथनम्। तदधर्म्यम्। "योऽन्यथासन्तमात्मानमन्यथा सत्सु भाषते स पापकृत्तमो लोके तेन आत्मापहारकः" इति स्मृतेः। विमृश्य किंचिदुपायमवधार्याह **भवत्वि**ति। भवतीति। हे भवति पौरवेण राज्ञा दुष्यन्तेन धर्माधिकारे धर्मरक्षारूपेऽधिकारे। नियुक्तस्सोऽहमाश्रमिणाम् अविघ्नक्रियोपलम्भाय अविघ्नानां क्रियाणामुपलम्भाय। निर्विघ्ना वा न वेति ज्ञातुम्। इद धर्मारण्यमागतः। राज्ञो दुष्यन्तस्य धर्मसचिवोऽहं धर्मरक्षार्थमिहागतः। आत्मापहारानुगुणोऽयम्। पौरवेण राज्ञा इल्लनाम्ना मम पित्रा धर्माधिकारे स्वधर्मरूपे प्रजापालनलक्षणे नियुक्तोऽभिषेकपूर्वं स्थापितो दुष्यन्त इति प्रसिद्धोऽहमाश्रमिणाम-

अन—सणाहा दाणीं धर्मचारिणो ।

[शकुन्तला शृङ्गारलज्जां नाटयति]

सख्यौ—(उभयोराकारं विदित्वा जनान्तिकं) हला सउन्दले जइ अज्ज तादो सण्णिहिदो भवे ।

शकु—तदो किं भवे ? ।

सख्यौ—इमं जीविदसव्वस्सेण वि अदिहिं किदत्थं करए ।

शकु—अवेह किं वि हिअए करिअ मन्तेथ । ण वो वअणं सुणिस्सम् ।

राजा—वयमपि तावद्भवत्योः किञ्चित् सखीगतं पृच्छामः ।

---

१. सनाथा इदानीं धर्मचारिणः ।

२. हला शकुन्तले यद्यद्य तातः सन्निहितो भवेत् ।

३. ततः किं भवेत् ।

४. अमुं जीवितसर्वस्वेनाप्यतिथिं कृतार्थं कुर्यात् ।

५. अपेतं किमपि हृदये कृत्वा मन्त्रयेथे । न युवयोर्वचनं श्रोष्यामि ।

विघ्नक्रियोपलम्भाय धर्मारण्यमिदमागत इत्यात्मनिवेदनानुगुणोऽन्तर्गतोऽर्थः । **सणाहा** इति । नाथेन रक्षित्रा सह वर्तमानास्सनाथाः । शृङ्गारेण काममुखेन लज्जा शृङ्गारलज्जा । यदुक्तम्—"लज्जा त्वन्तरुद्भवमन्मथविकारजुगुप्सापर्यायरूपा मदनविजृम्भैव शृङ्गाररसतरङ्गिणी यथावस्था तांस्तान् विलासान् नेत्रगात्रविकारपरम्परारूपान् सूते" इति । **उभयोरि**ति । आकारमिङ्गितं मान्मथविकाररूपम् । 'आकारस्त्विङ्गिताकृती' इत्यमरः । उभयोः परस्परानुरागमवधार्येत्यर्थः । अवधृतं सूचयन्त्यावाहतुः **हले**ति । लज्जया तद्वचनमसहमाना मध्ये गरोपमाह **तदो** इति । उभे वाक्यशेषमाहतुः **इमं** इति । अत्र त्वं हि तस्य जीवितसर्वस्वम् । त्वया कृतार्थं कुर्यादिति व्यज्यते । यद्वक्ष्यति "सा खलु भगवतः कुलपतेरुच्छ्वसित"मिति । व्यङ्ग्यमवगम्याह **अवेहे**ति । युवामितोऽपसरतामित्यर्थः । कुत इत्याह **किं वो**ति । न श्रोष्यामि नाङ्गीकरिष्यामि । ततस्तस्यास्तत्त्वज्ञानमारभते **वयमपी**ति । यदुक्तं—"तथापि तत्त्वत एनामुपलप्स्ये" इति । अपि तावदित्यनेन यथा भवत्यावस्मद्गतं तथा वयमपीति व्यज्यते । पृच्छाम

सख्यौ--[1]अणुग्गहो विअ अब्भत्थणा ।

राजा--भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः । इयं च वां सखी तदात्मजेति कथमेतत् ? ।

अन--[2]सुणादु अज्जो । अत्थि कोसिअत्ति गोत्तणामहेओ महप्पहावो राएसी ।

राजा--अस्ति श्रूयते ।

अन--[3]तं सहीए णो पहवम् अवगच्छ । उज्झिअसरीराए वड्ढुणादिहिं उण तादकस्सवो से पिदा ।

राजा--उज्झितशब्देन जनितकुतूहल आ मूलाच्छ्रोतुमिच्छामि ।

अन--[4]सुणादु अज्जो । पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स जादसङ्केहिं देवेहिं मेणआ णाम अच्छरा णिअमविग्घकारिणी पहिदा ।

---

१. अनुग्रह इवाभ्यर्थना ।

२. शृणोत्वार्यः । अस्ति कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः ।

३. तं सख्या नौ प्रभवमवगच्छ । उज्झितशरीराया वर्धनादिभिः पुनस्तातकाश्यपोऽस्याः पिता ।

४. शृणोत्वार्यः । पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य जातशङ्कैर्देवैर्मेनका नामाप्सरा नियमविघ्नकारिणी प्रहिता ।

इति । भवत्यौ तन्निवेदयतामिति भावः । **अणुग्गहो** इति । इवेत्यवधारणे । आर्यस्य प्रार्थनास्माकं हितैवेति भावः । पृच्छति **भगवा**निति । शाश्वते ब्रह्मणि नैष्ठिकब्रह्मचर्ये । प्रकाशः प्रसिद्धः । तस्य न व्यभिचार । कथमेतत् सङ्गच्छत इति शेषः । कौशिक इति गोत्रनामधेयः कुशिकगोत्रापत्य विश्वामित्रः । प्रभव जनकम् । **उज्झि**तेति । प्रसवानन्तरं जनन्या त्यक्त शरीर यस्याः । पिता । "शरीरकृत् प्राणदाता यस्य चान्नानि भुञ्जते । क्रमेण ते त्रयोऽप्युक्ताः पितरो धर्मसाधने ॥" इति भारतोक्तेः । एवं पितरि ज्ञाते मातृजिज्ञासयाह **उज्झितशब्दे**नेति । शब्दग्रहणमर्थस्य सम्यग्ज्ञाना-

राजा--अस्त्येतदन्यसमाधिभीरुत्वं देवानाम् । ततः ।

अन--[१]तदो वसन्तोदारसमए ताए उम्मादइत्तअं रूपं दक्खिअ ।

[इत्यर्धोक्ते लज्जया विरमति]

राजा--भवत्वतः परस्तात् गम्यत एव । सर्वथाप्सरस्सम्भवैषा ।

अन--[२]अहइम् ।

राजा--उपपद्यते ।

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ? ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ २१ ॥

[शकुन्तला लज्जया अधोमुखी तिष्ठति]

राजा--(स्वगतं) लब्धावकाशो मे मनोरथः । किन्तु सख्या परिहासोदाहृतां वरप्रार्थनामस्याः श्रुत्वा द्वैधीभावकातरं मे मनः ।

---

१. ततो वसन्तोदारसमये तस्या उन्मादयितृकं रूपं दृष्ट्वा ।

२. अथकिम् ।

भावः । जनितकुतूहल इति पाठः । आ मूलात् आदित आरभ्य । **अस्तीति** । अन्येषां स्वव्यतिरिक्तानाम । अनेनाभिसन्ध्यविचारो व्यज्यते । अतः परस्तात वचनशेषः गम्यत एव न वक्तव्यमिति भावः । अवगतमाह **सर्वथे**ति । अप्सरःशब्देन सामान्यवाचिना विशेषो लक्ष्यते मेनकासम्भवेति । उक्तमनुवदति **अथकि**मिति । उपपद्यते । कुत इत्याह **मानुषीष्वि**ति । अत्र रूपेण रूपवत्याक्षिप्यते । एवंविधसौन्दर्यवत्या अस्या मानुषीषु सम्भवो न स्यादित्यर्थः । प्रभया चञ्चल ज्योतिः विद्युत । दृष्टान्तोऽलङ्कारः । रूपस्य प्रभायां, रूपवत्या अस्या ज्योतिषि, मानुषीणां वसुधातले सम्भवस्योदये च प्रतिबिम्बनात् । "दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्" इति । लज्जया प्रत्यक्षस्तुतिनिमित्तया । तत्वज्ञानेन गम्येयमिति निश्चित्याह **लब्धे**ति । मनोरथोऽभिलाषः । "वाञ्छा लिप्सा मनोरथ" इत्यमरः । लब्धावकाशत्वं विषयौचित्यात । अन्यपरानुरागशङ्कया पुनरपि गम्यत्वं प्रति सन्दिहान आह **किन्त्वि**ति । परिहासोदाहृतां 'जह वणजोसिणी'त्यादिरूपाम् । द्वैधीभावस्संशयः वरप्रार्थना सत्या वा न वेत्येवरूपः । कातरं विषयानौचित्यभीरु । सस्मितावलोकनं हृदयज्ञानसूचनार्थम् । आकारेङ्गितादि॰

प्रियं—(सस्मितं शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा) किं[1] पुणो वि वत्तुकामो विअ अज्जो ।

[शकुन्तला सखीमङ्गुल्या तर्जयति]

राजा—सम्यगुपलक्षितं भवत्या । अस्ति सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम् ।

प्रियं—अलं विआरिअ । अणिअन्तणणिओओ तवस्सिजणो णाम ।[2]

राजा—इति सखीं ते विज्ञातुमिच्छामि—

वैखानसं किमनया व्रतमा प्रदानाद्व्यापाररोधि मदनस्य निषेवितव्यम् ?
अत्यन्तमेव मदिरेक्षणवल्लभाभिराहो निवत्स्यति समं हरिणाङ्गनाभिः ? ॥

प्रियं—अज्ज धम्मचरणे वि परवसो अअं जणो । गुरुणो उण अणुरूववरप्पदाणे सङ्कप्पो ।[3]

राजा—दुरापेयं खलु प्रार्थना (स्वगत)

---

१. किं पुनरपि वक्तुकाम इव आर्यः ।

२. अलं विचार्य । अनियन्त्रणनियोगस्तपस्विजनो नाम ।

३. आर्य धर्मचरणेऽपि परवशोऽयं जनः । गुरोः पुनरनुरूपवरप्रदाने सङ्कल्पः ।

भिर्विवक्षामवधार्याह **किमि**ति । तर्जनं धार्ष्ट्यप्रसङ्गभयात् । उपलक्षितं लक्षणैरुन्नीतम् । **सच्चरिते**ति । न कार्यान्तरापेक्षयेति भावः । **अल**मिति । प्रष्टव्यं पृच्छेति भावः । **अणियन्तणे**ति । अनियन्त्रणोऽप्रतिबन्धो नियोगो यस्मिन् । सन्दिह्यमानं तस्या अन्यवराभिलाषं निश्चिकीर्षुराह **इती**ति । इतीति वक्ष्यमाणपरामर्शी । **वैखानस**मिति । मनसः काममुखोन्मुखीकरणं मदनस्य व्यापारः तं रोद्धुं शीलवत् । अनेन तस्यास्तदधिकारित्वं व्यज्यते । तेन प्रदानात् पूर्वं समाप्यतव्यम् । अत्यन्तम् आमृति । यथास्यैव "किं वा नवात्यन्तवियोगमोघे" इति । मदिरैः सुन्दरैरीक्षणैः । स्वेक्षणसादृश्यात् वल्लभाभिः । समं सह । इयमित्यर्थादायाति हरिणसहवासो वैखानसव्रतमेव । अतोऽस्या मुनिव्रतं यावद्विवाहं यावज्जीवं वेति फलितोऽर्थः । **धम्मे**ति । अपिना किमुत कामचरणं इति । अयं जनः इयम् । परवशः गुर्वधीनः । तर्हि गुरोर्मतं किमित्याह **गुरुणो** इति । **दुरापे**ति । **प्रार्थना** । प्रार्थ्यत इति प्रार्थना प्रार्थ्यमानोऽर्थः । अनुरूपो वर इति यावत् । सखीवचनेनान्यानुरागाभाव निश्चिन्वंस्तदाशङ्काकातरं हृद-

भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥ २३ ॥

शकु—अणसूए गमिस्सं अहम् ।[1]

अन—किंणिमित्तम् ।[2]

शकु--इमं असम्बन्धप्पलाविणीं पिअंवदं अज्जाए गोदमीए णिवेद-इदुम् ।[3]

अन--सहि ण जुत्तं अकिदसक्कारं अदिहिविसेसं उज्झिअ अस्सम-वासिणो जणस्स सच्छन्ददो गमणम् ।[4]

[शकुन्तला कुपिता प्रस्थिता]

---

१. अनसूये गमिष्याम्यहम् ।

२. किंनिमित्तम् ।

३. इमामसम्बन्धप्रलापिनीं प्रियंवदां आर्यायै गौतम्यै निवेद-यितुम् ।

४. सखि न युक्तम् अकृतसत्कारमतिथिविशेषमुज्झित्वा आश्र-मवासिनो जनस्य स्वच्छन्दतो गमनम् ।

यमाह **भवे**ति । हे हृदय सम्प्रति साभिलाषं भव यथेष्टं तामभिलष । कुत इत्याह सन्देहनिर्णयो जातः । सन्दिह्यते इति सन्देहः । सन्दिग्ध इत्यर्थः । सन्दिग्धस्य निर्णय उत्पन्न इति । सन्देहनिर्णययोः प्रकारमाह आशङ्कसे इति । यद्रत्नम् अग्नि स्पर्शाक्षमम् आशङ्कसे तदिदं स्पर्शक्षमम् । स्पर्शाक्षममपि रत्नमस्ति । "न खलु परिभोगयोग्य दैवतरूपाङ्कितं रत्नम्" इति । अत्राप्रस्तुतात् सदृशात् सदृशान्तरं प्रस्तुतं प्रतीयते । यां त्वमन्यानुरागादगम्यामाशङ्कसे सा तदभावात् गम्यैवेत्यर्थः । अप्रस्तुतप्रशंसा-लङ्कारः । "अप्रस्तुतप्रशंसा स्याद्या सैव प्रस्तुताश्रया । कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ॥ तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधे"ति । वरालापजनितया लज्ज-यावस्थातुमसमर्था सरोषमाह **अणसूए** इति । असम्बन्धप्रलापिनीं सम्बन्धरहित प्रलपनशीलाम् । गौतमीति मातृस्थानीया काचित्तापसी । राज्ञः छन्दमनुवर्तमाना गमनं निरुन्धे **सही**ति । गमनमिति । अतो मा गा इति भावः । आत्मानं मन । चेष्टाप्रतिरूपिका चेष्टासदृशी । "तुल्यसङ्काशनीकाशप्रतिरूपका" इत्यमरः । मनोज्ञान-

राजा--(स्वगतं) कथं गच्छति । (ग्रहीतुमिच्छन्निगृह्यात्मानं) अहो चेष्टाप्रतिरूपिका कामिनो मनोवृत्तिः । तथाहि--

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥ २४ ॥

प्रियं--(शकुन्तलामुपरुध्य) हला[1] ण जुत्तं गन्तुम् ।

शकु--(सभ्रूभङ्गं) किंणिमित्तम्[2] ।

प्रियं--रुक्खसेअणाणि[3] मे दुवे धारेसि । सिञ्चेहि । एहि दाव । अत्ताणं मोचिअ तदो गमिस्ससि ।

[इति बलादेनां निवर्तयति]

राजा--भद्रे वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये । तथा ह्यस्याः ।

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।

---

१. हला न युक्तं गन्तुम् ।

२. किन्निमित्तम् ।

३. वृक्षसेचने मे द्वे धारयसि । सिञ्च । एहि तावत् । आत्मानं मोचयित्वा ततो गमिष्यसि ।

रिच्छा । सामान्येनोक्तं विशेष उपयोजयति । **अहं हीति** । अनुयास्यन्ननुयातुमिच्छन् मुनितनयामित्यत्यन्तानौचित्यं व्यज्यते । वारितप्रसरः निरुद्धानुयानः । इवेति "प्रतीतिमात्रे" । अनुगम्य प्रतीतिनिवृत्त इति मे प्रतिभातीत्यर्थः । **रुक्खेति** । मे मह्यम् । धारेरुत्तमर्ण इति सम्प्रदानत्वम् । धारयसि ऋणत्वेन धत्से । ततः ऋणात् । तद्विरहमसहमान आह **भद्रे** इति । वृक्षसेचनादेव । अर्थादनुष्ठितात् । लक्षये लक्षणैस्तर्कयामि । तान्याह **स्रस्तेति** । स्रस्तांसौ सातिशयनतांसौ । अतिमात्रे नैसर्गिकलौहित्यापेक्षया । वेपथु कम्पम् । प्रमाणाधिकः दीर्घः । बद्धं सञ्जातम् । कर्णशिरीषरोधि कर्णाभरणमागण्डविलम्बिकेसरं शिरीषकुसुमं रोद्धुं शीलवत् । जालकं समूहः । घर्माम्भसां स्वेदबिन्दूनाम् । संगिनि शिथिले । पर्याकुलाः अंसलम्बिनः । अत्र स्वभावोक्त्या रति-

बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः ॥ २९ ॥

तदहमेनामनृणां करोमि ।

[अंगुलीयकं दातुमिच्छति]

[उभे नाममुद्राक्षराण्यनुवाच्य परस्परं विलोकयतः]

राजा—अलमस्मानन्यथा सम्भाव्य । राज्ञः परिग्रहोऽयम् ।

प्रियं—तेण हि णारुहदि एदमङ्गुलीविओअस्स । तव वअणेण एव्व अणिरिण्णा णाम एसा । (किञ्चिद्विहस्य) हला सउन्दले मोइदासि अणुकम्पिणा अज्जेण । अहव महाराएण । गच्छ दाणीम् ।

शकु—(स्वगतं) जइ अत्तणो पहविस्सं । (प्रकाशं) का तुमं विसज्जिदव्वस्स वा रुद्धिदव्वस्स वा ।

---

१. तेन हि नार्हत्येतदङ्गुलिवियोगम्य । तव वचनेनैवानृणा नामैषा । हला शकुन्तले मोचितास्यनुकम्पिनार्येण । अथवा महाराजेन । गच्छेदानीम् ।

२. यद्यात्मनः प्रभविष्यामि । का त्वं विसृष्टव्यस्य वा रोद्धव्यस्य वा ।

केलिविरतिपरिश्रममनुस्मारयन्त्या आलम्बनविभावोऽभिनवीक्रियते । **तदि**ति । यस्मादियमृणमोचनाशक्ता तस्मात् । नामाङ्किता मुद्रा अगुलीयकं नाममुद्रा । दुष्यन्तस्स्वयमेवायमिति परस्परालोकनम् । **अल**मिति । अन्यथा नाय राजसचिवः राजा स्वयमेवेति । सम्भावना ऊहः । तर्हि कथं नाममुद्रेत्याह **राज्ञ** इति । **नार्हति** । स्वामिप्रसादस्यावमानप्रसङ्गादिति भावः । तत् कथमृणमोक्ष इत्याह **तवे**ति । **महाराएणे**ति । अगुलीयस्य तदीयत्वात् महाराज एवायमिति व्यज्यते । किञ्चिद्विहासश्च तदभिप्रायः । **प्रभविष्यामी**ति । तर्हि गमिष्यामीति शेषः । आत्मनः मनस । यदि मनोऽमुं विहाय गन्तुं विधेयं तर्हि गमिष्यामीत्यर्थः । वियोगासहत्वाद्गन्तुमसमर्था तदकरणे निमित्तमुत्पादयति **का तुमम्** इति । वाशब्दस्समुच्चये । भावे तव्यः । न त्वं मम विसर्जननिरोधयोस्स्वामिनी । अतस्त्वया विसृष्टा न गच्छामीति भावः । एवं क्रमेण तां प्रति

राजा—(शकुन्तलां विलोक्य स्वगतं) किन्नु खलु यथा वयमस्याम् एवमियमप्यस्मान् प्रति स्यात्। अथवा लब्धावकाशा मे प्रार्थना। कुतः।

वाचं न मिश्रयति यद्यपि मे वचोभिः
कर्णं ददात्यभिमुखं मयि भाषमाणे।
कामं न तिष्ठति मदाननसम्मुखीना
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥ २६ ॥

आकाशे—भोस्तपस्विनस्सन्निहितास्तपोवनसत्वरक्षायै भवत। प्रत्यासन्नः किल मृगयाविहारी दुष्यन्तः।

तुरगखुरहतस्तथाहि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु।
पतति परिणतारुणप्रकाशश्शलभसमूह इवाश्रमद्रुमेषु ॥ २७ ॥

अपिच—

तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः
क्रीडाकृष्टव्रततिवलयासङ्गसञ्जातपाशः।

प्रवृद्धाभिलाषो मर्यायमनुरागिणी वा न वेति विकल्पयति **किन्न्वि**ति। **अथवे**ति। अलं विकल्पेनेत्यर्थः। कुत इत्याह लब्धेति। प्रार्थना अनुरागः अनुरागस्यावकाशला-भोऽनुरागिण्यामेव स्यात्। अतो मर्यायमनुरागिण्येवेत्यर्थः। कुत इत्याह **वाच**मिति। सा मम वचोभिः वाचमात्मीयां न मिश्रयति। मम वचसां प्रतिवचनं न ददातीत्यर्थः। मयाभिमुखं भाषणे कर्णं ददाति सावधानमनास्सम्भाषणं शृणोति। मदाननसम्मुखीना मदाननाभिमुखी। अत्र सम्भाषणे कर्णदानं दृष्टेरनन्यविषयत्वं च शुश्रूषादिदृक्षाव्यञ्ज-कावनुरागानुभावौ। पात्रप्रवेशं विना वचनमाकाशः। सत्वरक्षायै सत्वस्य सत्वकार्यस्य धर्मस्य। यदि वा सत्वानां जन्तूनाम्। **तुरगे**ति। परिणतेनास्तोन्मुखेनारुणेन सूर्येण तत्प्रभया प्रकाश उज्वलः। शलभानां खद्योतानाम्। **तीव्रे**ति। तीव्रेणाघातेन प्रहा-रेण तरुविषयेण प्रतिहते भग्ने तरुस्कन्धे तरोर्मध्यप्रदेशे लग्नः निमग्नः एको दन्तो यस्य। "अस्त्रीप्रकाण्डः स्कन्धस्स्यान्मूलाच्छाखावधेस्तरो" रित्यमरः। अत्र वनगजग-तत्वेन मूर्तविघ्नत्वमुत्प्रेक्ष्यते। तत्त्वाघातादिर्निमित्तम्। आश्रमनाशस्यावश्यंभावः फलम्।

मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं व्रजति च गजः स्यन्दनालोकभीतः ॥ २८॥

[सर्वाः कर्णं दत्वा किञ्चिदिव संभ्रान्ताः]

राजा—(स्वगतं) अहो धिक् पौरा मदन्वेषिणस्तपोवनमुपरुन्धन्ति। भवतु प्रतिगमिष्यामस्तावत्।

अन---अज्ज इमिणा आकण्णिदवुत्तन्तेण पज्जाउलह्म। अणुजाणाहि णो उडजगमणाअ।

राजा—असंभ्रमं गच्छन्तु भवत्यः। वयमप्याश्रमबाधा यथा न भविष्यति तथा प्रयतिष्यामहे।

[सर्वा उत्तिष्ठन्ति]

अन---अज्ज असंभाविदसक्कारं भूओ वि पेक्खणणिमित्तं उज्झागो।

राजा--मा मैवं दर्शनेनैव भवतीनां सत्कृतोऽस्मि।

[शकुन्तला सव्याजं विलम्ब्य सखीभ्यां सह निष्क्रान्ता]

राजा---मन्दोत्सुकोऽस्मि नगरगमनं प्रति। यावदानुयात्रिकान्

---

१. आर्य अनेनाकर्णितवृत्तान्तेन पर्याकुलाः स्मः। अनुजानीहि नः उटजगमनाय।

२. आर्य असंभावितसत्कारं भूयोऽपि प्रेक्षणनिमित्तमुज्झामः।

राजानमावर्जयति **अज्जेति**। संभावनं सत्कारः असंभावितः सत्कारः तत्साधन फलमूलादिर्यस्मै सोऽसभावितसत्कारः। भूयोदर्शनं निमित्तं यथा भवति तथा। भूय आगत्यास्माकं सत्कारोऽवश्यं स्वीकर्तव्य इति भावः। मा मा एवं अकृतसत्कारमिति मा वादीः। कुत इत्याह **दर्शनेनैवे**ति। अनेन दर्शनस्यान्तःकरणसन्तर्पणत्व व्यज्यते। **सव्याज**मिति। व्याजप्रकारो वक्ष्यते दर्भाङ्कुरेणेत्यादिना। तत्सन्निधिपरित्यागमसहमान आह **मन्देति**। मन्दं उत्सुकः मन्दोत्सुकः अनुत्सुक इति यावत्। नगरं न गमिष्यामीति भावः। गमनाभावे प्रतिपत्तिमाह **याव**दिति। आनुयात्रिकान् अनुचरान्। तत्रा-

समेत्य नातिदूरे तपोवनस्य निवेशयेयं। न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्त्तयितुं। मम हि--

गच्छति पुरश्शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ २९ ॥

[इति निष्क्रान्ताः सर्वे]

प्रथमोऽङ्कः

ऽयशक्त आह **न खल्विति**। शकुन्तलायां व्यापारश्शकुन्तलाव्यापारः अङ्गप्रत्यङ्गचंक्रमणलक्षणः। यदि वा शकुन्तलायाः व्यापारः स्निग्धवीक्षणमन्दगमनादिरनुरागद्योतकः। आत्मानं मनः। उक्तमुपपादयति **मम हीति**। असंस्तुतमपरिचितं अर्थात् प्रियतमावियोगे। चीनांशुकं चीनदेश्यपट्टांशुककृता पताका।

इत्यभिरामविरचितेऽभिज्ञानशाकुन्तलदिङ्मात्रदर्शने

प्रथमोऽङ्कः।

द्वितीयोऽङ्कः।

[ततः प्रविशति विदूषकः]

विदू--(निश्वस्य) [1]भो दिट्ठह्मि एदस्स मिअआसीळस्स रण्णो वअस्सभावेण णिव्वुण्णो। अअं मिओ अअं वराहो अअं सद्दूलोत्ति मज्झन्दिणे गिह्मविरलपाअवच्छाआसु वणराईसु आहिण्डीअदि। पत्तसङ्करकसाआणि कदुह्णाणि गिरिणईजलाणि पीअन्ति। अणिअदवेलं सुल्लमंसभूइट्ठं आहारं अह्णीअदि। तुरआणुधावणकण्डइअसत्थिणो रत्तिं वि मे णिआमं सइदव्वं णत्थि। तदो महन्ते एव्व पच्चूसे दासीपुएत्तेहिं सगणिलुद्धएहिं वणग्गहणकोलाहलेण पडिबोहेह्मि। एत्तएणव्व पीडा ण णिक्कमइ। तदो

१. भोः दृढमस्म्येतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णः। अयं मृगोऽयं वराहोऽयं शार्दूल इति मध्यंदिने ग्रीष्मविरलपादपच्छायासु वनराजिष्वाहिण्ड्यते। पत्रसङ्करकषायाणि कदुष्णानि गिरिनदीजलानि पीयन्ते। अनियतवेलं शूल्यमांसभूयिष्ठ आहारोऽश्यते। तुरगानुधावनकण्टकितसक्थः रात्रावपि मे निकामं शयितव्यं नास्ति। ततो महत्येव प्रत्यूषे दास्याःपुत्रैः श्वगणिलुब्धकैर्वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि। एतावतैव पीडा न निष्क्रामति। ततो गण्डस्योपरि पिटका संवृत्ता। ह्यः

एवं धर्मारण्ये नायकयोर्लब्धदर्शनोत्सवयोः। नयनप्रीतिश्चित्तासंगश्चोभौ प्रदर्शितौ सम्यक्॥ अङ्कारंभे दीनां स्वावस्थां विमृशता वयस्येन। अधुना संसूच्येते नेतुस्सङ्कल्पजागरणे॥ यदुक्तं—"नयनप्रीतिः प्रथमं चित्तासंगस्ततोऽथ सङ्कल्पः निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः उन्मादो मूर्च्छा मृतिरित्येतास्स्मरदशा दशैव स्युः" इति। नृपतेर्नर्मसचिवस्सह तेन वनं गतः। क्षुत्पिपासादिभिर्दुःखैर्निर्विण्णः प्राह **भो** इति। भो इति चिन्तायां। चिन्तानिश्वासौ निर्वेदानुभावौ। "तत्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमानना। तत्र चिन्ताश्रुनिश्वासवैवर्ण्योच्छ्वासदीनताः"। इति। दृढं सातिशयं। निर्विण्णत्वं कुत इत्याह **अयमि**ति। इतीति। उक्त्वेति शेषः। आहिण्ड्यते भ्राम्यते। अत्र कालदेशावस्थाभिरातपपीडा व्यज्यते। तया क्षुत्पिपासे च। तत्प्रतिकाराभावमाह **पत्रे**ति। पत्राणां जीर्णपतितानां सङ्करेण तद्रसमिलितत्वेन कषायाणि तुवराणि। 'तुवरस्तु कषायोऽस्त्री'त्यमरः। कदुष्णानीषदुष्णानि। शूले कृत्वा कृतपाकं शूल्यं। तादृशं मांसं भूयिष्ठं बहुतरं यस्मिन्। आह्रियत इत्याहारः। भोज्यं। आहारमिति प्राकृते पुन्नपुंसकयोगनियमात्। अश्यते। यदुक्तमारण्यपर्वणि। "हत्वन् कृष्णमृगांश्चैव मेध्या-

गण्डस्स उपरि पिडआ संवुत्ता । हिओ किल अह्मेसु ओहीणेसु तत्तहोदो मिआणुसारेण अस्समपदं पविट्ठस्स दाव सउन्तला णाम कण्णआ मम उदरस्स अधण्णदाए दंसिदा । सम्पदं णअरगमणस्स कहं वि ण करेदि । अज्ज वि तं एव्व चिन्तअस्स पहादं अच्छीसु । का गई । जाव णं किदाआरपदिकम्मं वअस्सं पेक्खामि । (परिक्रम्यावलोक्य) एसो बाणासणहत्थाहिं जवणिआहिं वणपुप्फमालाधारिणीहिं परिवुदो इदो एव्व आअच्छइ वअस्सो । होदु अङ्गभङ्गविअलो विअ भविअ चिट्ठिस्सं । जइ एव्वं वि णाम विस्समं लहेअम् ।

[इति दण्डकाष्ठमवलम्ब्य स्थितः]

किलास्मास्ववहीनेषु तत्रभवतो मृगानुसारेणाश्रमपदं प्रविष्टस्य तावच्छकुन्तला नाम कन्यका ममोदरस्याधन्यतया दर्शिता । साम्प्रतं नगरगमनस्य कथामपि न करोति । अद्यापि तामेव चिन्तयतः प्रभातमक्ष्णोः । का गतिः । यावदेनं कृताचारप्रतिकर्माणं वयस्यं पश्यामि । एष बाणासनहस्ताभिर्यवनिकाभिर्वनपुष्पमालाधारिणीभिः परिवृत इत एवागच्छति वयस्यः । भवतु अङ्गभङ्गविकलो नाम भूत्वा स्थास्यामि । यद्येवमपि नाम विश्रमं लभेय ।

न्यान् वनेचरान् उन्मथ्य विविधैर्बाणैर्ब्राह्मणेभ्यो न्यवेदयत्" । इति । "ब्राह्मणार्थे पराक्रान्ताश्शुद्धैर्बाणैर्महारथाः निघ्नन्तो भरतश्रेष्ठा मेध्यान् बहुविधान् मृगान्" इति च । अन्नपानवैकल्यमुक्त्वा निद्रावैकल्यमाह **तुरगेति** । तुरगस्य राज्ञारूढस्यानुधावनेन कण्टकितं सञ्जातकण्टके निमग्नकण्टके सक्थिनी ऊरू यस्य । हेतुभावगर्भमेतत् । शयितव्यमिति भावे तव्यः । निकामशब्देन स्वाच्छन्द्यस्य वैकल्यमुक्तम् न त्वभावः । अत आह तत इति । महत्येव प्रत्यूषे प्रभातारम्भे । दास्याःपुत्रैरित्येकं पदम् । आक्रोशे अलुक् । निकृष्टैरित्यर्थः । शुनां गणः श्वगणः श्वगणोऽस्त्येषामिति श्वगणिनः । श्वगणिनश्च ते लुब्धकाश्च श्वगणिलुब्धकाः तैः । वनग्रहणं वनशोधनम् । तदुक्तं 'लुब्धकैश्च श्वगणिभिरपास्तम्तेनव्यालपराबाधश्चललक्षपरिचयार्थं मृगयारण्यं गच्छे'दिति । अत्र निर्वेदस्य हेतुर्वनराज्याहिण्डनादिः । तस्य हेतुर्वयस्यभावः । अथ परिजनाच्छ्रुतं राज्ञश्शकुन्तलाकामुकत्वं हृदि निधायाह । **एतावतेति** । एतावता उक्तेन दुःखानुभावेन । पीडा दुःखानुभवलक्षणा । न निष्क्रामति न पर्यवस्यति । इतः परमपि दुःखानुभवः स्यात् । ततस्तस्मात् । पिटका विस्फोटः । "विस्फोटः पिटकस्त्रिषु" इत्यमरः । पीडाया उपरि पीडा गण्डस्योपरि पिटकेवानिदुम्सहेत्यर्थः । पीडान्तरस्य हेतुमाह ह्य

[ततः प्रविशति यथानिर्दिष्टपरिवारो राजा]

राजा—

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि ।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥ १ ॥

इति । अवहीनेषु मार्गभ्रष्टेषु । दर्शितेति । अत्र राजकर्तृके शकुन्तलादर्शने निजोदर-निर्भाग्यतायाः प्रयोजककर्तृत्वारोपेण निर्वेदस्वरूपभूतस्त्ववमानना व्यज्यते । दर्शनस्य पीडाहेतुत्वमाह **साम्प्रत**मिति । कुत इत्याह **अद्यापी**ति । अद्यापि दर्शनादिन एव । **प्रभातमक्ष्णो**रिति । अनेन निद्राभाव उक्तः । यथानर्घराघवे । "धिक् चिन्तया रज-निरक्षिषु नः प्रभाता" इति । का गतिः किं मे शरणम् । एवं शरणमन्विच्छन् चिकीर्षित-मनुसन्धायाह **याव**दिति । आचारस्सन्ध्योपासनादिः । प्रतिकर्म तच्छेषभूतं मण्डनम् । "प्रतिकर्म प्रसाधन"मित्यमरः । बाणासनहस्ताभिरिति । यथा कर्पूरमञ्जर्याम । 'करदि-अक्कोअण्डइओ तंबुल्लकरङ्कवाहिणीओ' इति । यवनिकाभिः आसन्नपरिचारिकाभिः । वनपुष्पमालाधारिणीभिरिति देशौचित्यात् । किमपि शरणमवधार्याह **भवन्वि**ति । अङ्गमात्रविकलः सर्वाङ्गविकलः । 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः । किं तत इत्याह **यदी**ति । एवं दयितामेव ध्यायन् निष्क्रम्य नृपतिराश्रमतः । तन्नातिदूरविपिनप्रदेश-विनिवेशितानुचरः । तस्मिन् मनोरथैर्नीत्वा निस्संवेशो निशीथिनीं । समाप्य मन्त्र्यानियम संशान्तमृगयारतिः । कुलशीलवयोरूपैरनुरूपां शकुन्तलां । ध्यायन् समागमोपायचिन्ता-व्यापृतमानसः । गुर्वधीना हि सा नात्र गुरुस्सन्निहितस्ततः । अचिरात् सङ्गमस्तस्या न स्यादिति विचिन्तयन् । उत्कण्ठतोऽनुवेलं मर्यायमनुरागिणीति सञ्चिन्त्य । आशाबन्धेन मनागाश्वस्य प्राह **काम**मिति । काममकामानुमतौ । तत्र हेतुमाह **मनस्त्वि**ति । तद्भा-वेति । तस्या भावस्यानुरागस्य दर्शनेन पर्यालोचनेनाश्वसितु शीलवत् । उक्तमुपपादयति **अकृतार्थ** इति । मनसिजे अकृतार्थेऽपि । नायकयोस्सयोजनं हि मनसिजस्यार्थः अन-स्तयोस्समागमे लब्धे सति हि मनसिजस्य कृतार्थता स्यात् । अतस्समागमे अलब्धे-ऽपीत्यर्थः । अत्र मनसिजस्य संयोजनार्थ उत्साहो व्यज्यते । तेन तन्निमित्ता पीडा च । उभयप्रार्थना परस्परानुरागः । अयमर्थः । समागमे अलब्धे मदनातुरयोरपि नायक-योरन्योन्यानुरागो रतिं कुरुत इति । एवं तदनुरागचर्वणया किञ्चिदाश्वसन् 'उपायं चिन्तयन् प्राज्ञोऽप्यपायमपि चिन्तयेत्' इति नयेनाश्वासनोपायभूतस्य तदनुरागस्यापायं

…त्मानं कृत्वा एवं तिमात्मसंभावनेष्टजनचित्तवृत्तिः प्रार्थयिता जनो विडम्ब्यते। तथा हि —

स्निग्धं वीक्षितमन्यतोऽपि नयने यत् प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत् किल मत्परायणमहो कामी स्वतां पश्यति ॥ २ ॥

चिन्तयन्नाह **एवमि**ति। एवं तस्या मयि रागोऽस्तीत्येवम्। आत्माभिप्रायेण सम्भाविता इष्टजनस्य दयितायाश्चित्तवृत्तिर्येन। प्रार्थयिता कामुकः। विडम्ब्यते। विडम्बना हासकारणम्। हासकारणं क्रियते इत्यर्थः। यथा "अलङ्करोति हि जरा नृपवैद्यद्विजन्मनः विडम्बयति वेश्यास्त्रीमल्लचारणनर्तकान्"। इति। अत्राप्रस्तुतात् सामान्यात् प्रस्तुतो विशेषः प्रतीयते। प्रार्थयिताह विडम्ब्य इति। तस्या मयि रागोऽस्तीत्येतदात्माभिप्रायसम्भावनमेव। अतस्तेनाश्वसन्नहं सुधियां परिहासपात्रमस्मीत्यर्थः। यत एवं ततस्तस्याः स्निग्धवीक्षितादीनां मत्परायणत्वमपि न सम्भवतीत्याह **तथा हीत्या**दिना मत्परायणमित्यन्तेन। हिर्हेतौ। '**स्निग्धं** तद्यस्य विषयस्तत्प्रभामिलितो भवे दिति। वीक्षितं यातमिति भावे क्तः। सव्याजं विलम्ब्य निष्क्रान्तेति यदुक्तं तत्र यद्व्याजरूपं वीक्षितं तदाह वीक्षितमिति। वक्ष्यति च "आसीद्विवृत्तवदना च" इति। अन्यतोऽपि अन्यत्र कुत्रचित्। अत्र वीक्षितस्य स्वस्मिन् यादृच्छिकत्वमुक्तम्। स्निग्धत्वस्य स्वाभाविकत्वं च। विलम्ब्य निष्क्रान्तेत्यत्र यन्मन्दगमनमासीत्तदाह **यातमि**ति। विलासः स्त्रीणां शृङ्गारजः क्रियाविशेषः। 'तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु' इति। मा गा इत्युपरुद्धया 'सहि ण जुत्तं गन्तुम्' इति। सासूयमुक्ता 'का तुवं विसज्जिदव्वस्स वा' इति। किलेत्यसम्भाव्ये। 'वार्तासम्भाव्ययोः किले'त्यमरः। मत्परायणं मयि परायणं तत्परम्। 'परायणमभिप्रेते तत्परे परमाश्रये' इति वैजयन्ती। अर्थान्मय्यनुरागाविष्करणतत्परमित्यर्थः। वक्ष्यति च "मिथः प्रस्थाने शालीनतयापि काममाविष्कृतो भावः" इति। तथा ह्यन्यतोऽपि नयने प्रेषयन्त्या तया अर्थान्मय्यपि स्निग्धं वीक्षितमिति यत्, तया नितम्बयोर्गुरुतया विलासादिव मन्दं यातमिति च यत्, मा गा इत्युपरुद्धया तया सा सखी सासूयमुक्तेत्यपि यत् सर्वं मत्परायणं किलेत्यन्वयः। तदनुरागस्यात्माभिप्रायसम्भावितत्वात् तस्या मयि यादृच्छिकं स्वतः स्निग्धं वीक्षितं नितम्बगौरवहेतुकं विलाससदृशं न तु विलासरूपं मन्दगमनं गमनोपरोधहेतुकं सखीविषयसासूयवचनं च एतत् सर्वं मय्यनुरागाविष्करणतत्परमित्येतदसम्भाव्यमिति फलितोऽर्थः। अथ स्वस्यान्यथाप्रतीतिं सामान्येनोपपादयति **अहो** इति। कामी कामिजनः। स्वतां आत्मीयताम्। अर्थात् काम्यमानस्य। तस्मिन् …पि मय्येव इह तत्स्वत्वीयता स्यान्न काम्यमाने सति। अयमर्थः — कामी जनः

विदू—(तथा स्थित एव) भो वअस्स ण मे हत्था पसरन्ति वाआमत्तएण जइक्किअसि ।

राजा—(सस्मितं) कुतोऽयं गात्रोपघातः ?

विदू—कुदो इत्ति भणासि सअं मे अक्खी आकुलीकदुअ अस्सुकालणं पुच्छसि ।

राजा—न खल्वहमवगच्छामि ।

विदू—जं वेदसो कुज्जलीलं विडम्बेइ तं किं अत्तणो पहावेण आदु णईवेअस्स ।

राजा—नदीवेगस्तत्र कारणम् ।

विदू—ममं भवं एव्व ।

राजा—कथय ।

---

१. भो वयस्य न मे हस्तौ प्रसरतः । वाङ्मात्रेण जयीक्रियसे ।

२. कुत इति भणसि । स्वयं मे अक्षिणी आकुलीकृत्याश्रुकारणं पृच्छसि ।

३. यद्वेतसः कुब्जलीलां विडम्बयति तत् किमात्मनः प्रभावेण उत नदीवेगस्य ।

४. मम भवानेव ।

काम्यमानं वस्तु लाभात् पूर्वमेव लब्धमिति मन्यते आश्चर्यमेतदिति । अत्र काममिथ्याशङ्कौत्सुक्यस्य शान्तिः । [illegible] कृता । [illegible] हस्तयुगं [illegible] कुतोऽयमिति । [illegible] विकृतमाह कुदो इति । अत्र काक्वा प्रश्नः । पुच्छसि इति । [illegible] स्वयं कारणं [illegible] कारणं पृच्छसीत्यर्थः । अजानन्निवाह न खल्विति । कुब्जलीलाविडम्बने प्रभावात् । भवानेवेति । गात्रोपघाते कारणमित्यर्थः । कुत इत्याह यन्नेति । येनेत्यव्ययं यदित्यर्थः । गहने आकुलदेशे दुःसञ्चरेऽरण्ये । वनचरवृत्तिना वनचराणां वृत्तमिव वृत्तिर्व्यापारः आजीवोपाया यस्य तेन । भवितव्यमिति भावः । महाराजस्य तवात्यन्तमनुचितमेतादृश

विदू --जेण तुए राअकज्जाणि उज्झिअ तादिसे आउलदेसे वणअरवत्तिणा होदव्वं। जं सच्चं पच्चहं सावअसमुस्सारणेहिं संखोहिदसन्धिबन्धाणं गत्ताणं अणीसोह्मि संवुत्तो। ता पसादइस्सं विसज्जदु मं आवण्णं एक्काहं वि विस्सामिदुं दाव।

राजा—(स्वगत) अयञ्चैवमाह, ममापि काश्यपसुतामनुस्मृत्य मृगयाविक्लवं चेतः। कुतः।

न नमयितुमधिज्यमस्मि शक्तो धनुरिदमाहितसायकं मृगेषु।
सहवसतिमुपेत्य यैः प्रियायाः कृत इव मुग्धविलोकितोपदेशः ॥३॥

---

१. येन त्वया राजकार्याण्युज्झित्वा तादृशे आकुलदेशे वनचरवृत्तिना भवितव्यम्। यत्सत्यं प्रत्यहं श्वापदसमुत्सारणैस्संक्षोभितसन्धिबन्धानां गात्राणामनीशोऽस्मि संवृत्तः। तत् प्रसादयिष्यामि विसृजतु मामापन्नमेकाहमपि विश्रमितुं तावत्।

व्यज्यते। छद्मनाङ्गीकृतमङ्गवैकल्यं मध्ये विश्रमलाभे उपयोगं गमयन्नाह **यत्सत्य**मिति। सत्यमेवेत्यर्थः। श्वापदेति। 'व्याघ्रादयो वनचराः पशवश्श्वापदा मताः' इति केशवः। **अय**मिति। एवं मृगयातिप्रसङ्गस्तवानुचित इति। अपिश्चार्थे। अयमेवमाह च मम चेतः काश्यपसुतामनुस्मृत्य मृगयाविक्लवमपीत्यन्वयः। अत्र यौगपद्येन मृगयोपसंहारस्य सौकर्यं व्यज्यते। अनुस्मृत्येति हेतुभावगर्भम्। विक्लवं शिथिलधैर्यम्। मम चेतः प्रियानुस्मरणात् मृगयायां विक्लवं स्यादित्यर्थः। वैक्लव्यस्य कार्यमाह **न नमयितु**मिति। मृगेषु सारङ्गजातिषु। चेतोवैक्लव्यस्य मृगविशेषविषयत्वं तत्कारणस्य काश्यपसुतानुस्मरणस्य तत्रैव सम्भवात्। तत्र तत्सम्भवे हेतुमाह **सहे**ति। उपेत्येति क्रियाविशेषवाचिना तत्सामान्यं लक्ष्यते। सहवासं कृत्वेत्यर्थः अनेन पात्रगुणो व्यज्यते। तेन विलोकितसौन्दर्यसर्वस्वसंक्रमणं संक्रान्तस्य विशेषश्च। अत्र मृगगतत्वेनोत्प्रेक्ष्यमाणात् प्रियाविषयमुग्धविलोकितोपदेशकर्तृत्वादप्रस्तुतात् निमित्तभूत प्रियाविलोकितसादृश्य प्रियानुस्मरणहेतुत्वेन प्रस्तुत प्रतीयते। येषां विलोकितं प्रियाविलोकितसदृशमिति। सदृशवस्तुदर्शनं ह्यनुभूतसदृशवस्त्वन्तरस्मारकम्। यतोऽयं मृगयां परिवदति मम चेतः प्रियानुस्मरणान्मृगयायां विक्लवञ्च अतोऽद्यैव मृगयोपसंहर्तव्येति भावः।

विदू—(राज्ञो मुखं विलोक्य) अत्तभवं किं वि हिअए करिअ मन्तेदि। अरण्णे मए रुदिअं आसि।

राजा—(सस्मितं) किमन्यत् अनतिलङ्घनीयं सुहृद्वाक्यमिति स्थितोऽस्मि।

विदू—चिरं जीव।

[गन्तुमिच्छति]

राजा—तिष्ठ। सावशेषं मद्वचनम्।

विदू—आणवेदु भवम्।

राजा—विश्रान्तेन भवता ममान्यस्मिन्ननायासे कर्मणि सहायेन भवितव्यम्।

विदू—किं मोदअखण्डिआअम्।

राजा—यत्र वक्ष्यामि।

विदू—गहीदो क्खणो।

राजा—कोऽत्रभोः।

१. अत्रभवान् किमपि हृदये कृत्वा मन्त्रयते। अरण्ये मया रुदितमासीत्।

२. आज्ञापयतु भवान्।

३. किं मोदकखण्डिकायां?

४. गृहीतः क्षणः।

रुदितमासीदिति। तवान्यचित्ततया मद्वचनं निष्फलमासीदित्यर्थः। **किमन्य**दिति। इति स्थितोऽस्मि विचार्य निश्चितोऽस्मि। गमनमनुज्ञातमिति कृत्वाह **चिर**मिति। इच्छति आरभते। सावशेषं मे वचः तदाकर्ण्य गन्तव्यमिति भावः। दयितासमागमोपायचिन्तां हृदि निधायाह **ममे**ति। अन्यस्मिन्। मृगयायाः। अनायास इति प्रलोभनार्थम्। अतो विश्रम्य त्वरितमागन्तव्यमिति भावः। खण्डिका खण्डनम्। **यत्र वक्ष्यामि**। तत्रेति शेषः। क्षणः विश्रामावसरः "निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः" इत्यमरः। कोऽत्रभोः विद्यत इति शेषः। आज्ञावचनोत्कण्ठा इति। आज्ञारूपं वचनं उत्कण्ठा त्वरा यस्य। मृगयातिप्रसङ्गेन दूयमानमना अपि स्वाभिच-

(प्रविश्य)

दौवारिकः---आणवेदु भट्टा ।

राजा---रैवतक! सेनापतिस्तावदाहूयताम् ।

दौवा---तह (निष्क्रम्य सेनापतिना सह प्रविश्य) एसो आणावअणुक्कण्ठो इदो दिण्णदिट्ठी चिट्ठइ । उवसप्पदु अज्जो ।

सेनापतिः---(राजानं विलोक्य) दृष्टदोषापि मृगया स्वामिनि केवलं गुण एव संवृत्तः । तथा हि देवः ।

अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं
रविकिरणसहिष्णु स्वेदलेशैरभिन्नम् ।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्ति ॥ ४ ॥

(उपगम्य) जयतु स्वामी । गृहीतश्वापदप्रचारमरण्यम् । किमद्याप्यवस्थीयते ? ।

---

१. आज्ञापयतु भर्ता ।

२. तथा । एष आज्ञावचनोत्कण्ठ इतो दत्तदृष्टिस्तिष्ठति । उपसर्पत्वार्यः ।

त्वानुवृत्यर्थं तान् प्रत्युत्साहवान् मुहुः । सेनापतिराहूतो भूपतिना तत्समीपमुपसर्पन् । तस्याकृतिविशेषं समरयन्नाह **दृष्टदोषेति** । दृष्टो लोके दोषो यस्याः । **अनवरतेति** । तथा हि देव एवंविधं गात्रं बिभर्तीत्यन्वयः । अनवरतेन ज्याघातेन क्रूरः कठिनः पूर्वः प्रकोष्ठो यस्य । पूर्वः प्रकोष्ठः । यथा "उपचितनिकिणश्यामौर्वीविमर्दैः पूर्वबन्धः" इत्यन्यत्र । अभिन्नमसम्पृक्तम् 'भिन्नं विदीर्णे सम्पृक्ते' इत्यमरः । अपचितं क्षीणमेदः । व्यायतत्वात् लम्बत्वात् । अलक्ष्यम् । व्यायामसमुद्गतत्वादवयवोपयुक्तत्वात् न लक्ष्यमित्यर्थः । यदुक्तं — मृगयायामनु व्यायामः श्रमो निःस्वेदनाशः" इति । प्राणेन बलेन सारं स्थिरत्वं । "प्राणस्तु प्रभवे जीवे जीवने पवनात्मनि अन्तिमे वायुभेदे च बलान्तर्यामिणोरपि" इति वैजयन्ती । वनगजवत् अनवरत । धनुर्ज्यायाआस्फालनेन वप्रक्रीडया क्रूरः पूर्वभागो गात्र यस्य । अन्यत् सर्वं साधारणम् । हृदयमजानन्निति प्रेत्स हर्यति हृष्टेति । प्रचरन्त्यस्मिन्निति प्रचारः । गृहीतः शोधितः श्वापदानां प्रचारः [illegible] यस्मिन् तत् गृहीतश्वापदप्रचारम् । अवस्थीयते । तूष्णीमित्यर्थात् । मृग-

राजा—भग्नोत्साहः खलु कृतोऽस्मि मृगयापरिवादिना माढव्येन ।

सेना—(जनान्तिकम्) सखे स्थिरप्रतिज्ञो भव । अहन्तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये । (प्रकाशम्) प्रलपत्वेष वैधेयः । ननु प्रभुरेव निदर्शनम् । पश्य ।

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपु-
स्सत्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षस्स च धन्विनां यदिषवस्सिध्यन्ति लक्ष्ये चले
मिथ्या हि व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥ ५ ॥

विदू—अत्तभवं पकिदिं आपण्णो । तुमं दाव अडवीदो अडविं आहिण्डिय दाणीं णासिआलोलुअस्स जिण्णरुक्खस्स मुहे पडिओ होहि ।

---

१. अत्रभवान् प्रकृतिमापन्नः । त्वन्तावदटवीतोऽटवीमाहिण्ड्येदानीं नासिकालोलुपस्य जीर्णर्क्षस्य मुखे पतितो भव ।

याया अनारम्भे कारणमाह **भग्नेति** । स्वाभिप्रायं निवेदयन्नाह **सखे** इति । प्रतिबन्धमुपरोधं मृगयाविषयः । **प्रलपत्विति** । "प्रलापोऽनर्थकं वचः" इत्यमरः । "मूर्खवैधेयबालिशाः" इति च । अज्ञस्यास्य प्रलापो न प्रमाणं मृगया कर्तव्यैवेत्यर्थः । **नन्विति** । निदर्शनम् उदाहरणम् । **मेद** इति । उत्थानमुत्पतनम् । भयक्रोधयोर्विकृतिमदित्यन्वयः । लक्ष्यते लक्षणैर्ज्ञायते । चले लक्ष्ये इषवस्सिध्यन्तीति यत् स धन्विनामुत्कर्षश्च भवतीति शेषः । यदुक्तं—"मृगयायां चललक्ष्यपरिचयः क्रोधभयस्थानेङ्गितेषु च मृगाणां चित्तवृत्तिज्ञान"मिति । यत एवम् अतो मिथ्यैव मृगयां व्यसनं वदन्ति "सप्त व्यसनानि । स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमं महच्च दण्डपारुष्यमर्थदूषणमेव च" इति । ईदृक् एतत्सदृशः । विनुदत्यनेन कालमिति विनोदो विहारः । कुत इत्यपादानाक्षेपेणासुलभत्वमुक्तम् । यथा "परार्थबद्धकक्ष्याणां त्वादृशामुद्भवः कुतः" इति । प्रकृतिमापन्नः कृच्छ्रान्निवृत्तमृगयारतिः । त्वं तावन्मृगयासक्त इति भावः । **पतितो भव** । जीर्णर्क्षस्ते नासां भक्षयतीति भावः । एवं मृगयाया अकरणे उक्ते कारणे सोऽप्ये

राजा—भद्रसेन! आश्रमसन्निकृष्टे स्थिताः स्मः। अतस्ते वचो नाभिनन्दामि। अद्य तावत्।

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥ ६ ॥

सेना—यत् प्रभविष्णवे रोचते।

राजा—तेन हि निवर्तय पूर्वगतान् वनग्राहिणः। यथा च सैनिकास्तपोवनं दूरादेव परिहरन्ति तथा निषेद्धव्याः। पश्य।

कारणान्तरमाह **भद्रसेने**ति। आभिमुख्यकरणमावर्जनार्थम्। तत् पुनस्तद्वचनानभिनन्दनपारुष्यभयात्। **आश्रमे**ति। सन्निकृष्टे समीपे। आश्रमपीडाभयात् मृगयां न करोमीति फलितोऽर्थः। तदुपसंह्रियतां मृगयेत्याह **अद्यतावदि**त्यादिना। कूपादुद्धृत्य जलं यस्मिन् निधीयते तन्निपानम्। "आहावस्तु निपानं स्यादुपकूपजलाशये" इत्यमरः। तद्धि वने वनपालैर्मृगाणां पानार्थं क्रियते मृगयाश्रान्तानां नरतुरगाणामुपयोगि च भवतीति प्रसिद्धिः। उक्तं चानेन। "स्थिरतुरङ्गमभूमिनिपानवन्मृगवयोगवयोपचितं वन"मिति। छायेत्यादि क्रियाविशेषणम्। तरुच्छायासु सम्भूयोपविश्येत्यर्थः। रोमन्थं चर्वितस्य शष्पादेः पुनश्चर्वणम्। विस्रब्धं विश्वस्तम्। मुस्ताक्षतिः मुस्तार्थं मुस्ताकन्दं स्वीकर्तुं क्षतिः खननम्। 'पल्वलं चाल्पसरः' इत्यमरः। शिथिलज्याबन्धम् अवरोपितज्यम्। अत्रास्मदर्थस्योचितं विश्रमकर्तृत्वं धनुष्यचेतने आरोप्यमाणं चारुत्वमावहति। यदुक्तं—"प्रकृतमपि यत्र हित्वा कर्तृत्वं युष्मदर्थस्य चारुत्वायान्यत्रारोप्येत गुणस्स तु न दोषः" इति। अत्र महिषादिकर्तृको निपानसलिलावगाहनादिः कार्यरूपोऽन्यथानुपपत्त्या कारणरूपमृगयोपसंहारमाक्षिपति। अद्यैवोपसंह्रियतां मृगयेत्यर्थः। अत्र कार्यमुखेन कारणं प्रतीयत इति कारणस्य भङ्ग्यन्तरेणाभिधानात् पर्यायोक्तमलङ्कारः। 'गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्यायोक्त'मिति सूत्रम्। महिषादेश्शृङ्गकरणकताडनादिस्वभाववर्णनात् स्वभावोक्तिश्च। स्वस्यारुचिं द्योतयन्नाह **यदि**ति। तत्तथेति शेषः। **तेन ही**ति। वनग्राहिणः वनशोधकान्। निषेधाकरणे प्रत्यवायमाह

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति ॥ ७ ॥

सेना—यदाज्ञापयति स्वामी ।

विदू—णस्सदु दे उस्साहवुत्तन्तो ।[1]

[निष्क्रान्तस्सेनापतिः]

राजा—(परिजनं विलोक्य) अपनयन्तु भवत्यो मृगयावेषम् । रैव-तक! त्वमपि नियोगमशून्यं कुरु ।

परिजनः—जं देवो आणवेदि ।[2]

[निष्क्रान्तः]

विदू—किदं भवदा णिम्मक्खिअं ।[3] सम्पदं एदस्सि पाअवच्छाआअं अविरललदाविदाणसणाहे आसणे णिसीददु भवं । जाव अहं वि सुहा-सीणो होमि ।

---

१. न्यस्यतां तवोत्साहवृत्तान्तः ।

२. यद्देव आज्ञापयति ।

३. कृतं भवता निर्मक्षिकम् । साम्प्रतम् एतस्यां पादपच्छायायां लतावितानसनाथ आसने निषीदतु भवान् । यावदहमपि सुखासीनो भवामि ।

शमेति । दाहो निग्रहः भस्मीकरणं चात्मा स्वभावो यस्य तद्दाहात्मकम् । स्पर्शानुकूलाः शीतलाः । वमन्ति प्रकाशयन्ति । यथा शीतलेषु सूर्यकान्तेष्वन्तरग्निरस्ति सूर्यरश्मिस-म्पर्कात्तं प्रकाशयन्ति च तथा शान्तेषु तपोधनेष्वन्तर्ब्रह्मतेजोऽस्ति अन्यशक्त्यभिभवा-त्तत् प्रकाशयन्ति चेत्यर्थः । अत्राप्रस्तुतात् सामान्यात् प्रस्तुतो विशेषः प्रतीयते । यदि सैनिका आश्रमपीडां कुर्युस्तर्हि काश्यपोऽस्माञ्छपेदिति । उपमाप्रस्तुतप्रशंसयोस्संसृष्टि-रियम् । सेनापतिमाह **न्यस्यता**मिति । परिजनं यवनिकाः । नियुज्यतेऽस्मिन्निति नियोगः द्वारम् । मक्षिकाणामभावो निर्मक्षिकम् । अर्थाभावेऽव्ययीभावः । विविक्तमित्यर्थः । एवं समाप्य मृगयां विनिवारितसैनिकाश्रमविमर्दः । अपसारितपरिवारो राजा सुहृदा सहासी-नः । निर्व्यापारो दयितां ध्यायन्नुत्कण्ठितस्तदुपशान्त्यै । वर्णयितुमुपक्रमते तस्यास्सन्दर्श-नादीनि । यदुक्तमनेनैव । "कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो न च मलयजं सर्वाङ्गीण

राजा—गच्छाग्रतः ।

विदू—एदु एदु भवम् ।[1]

[उभौ परिक्रम्योपविष्टौ]

राजा—माढव्य! अनवाप्तचक्षुःफलोऽसि । येन त्वया दर्शनीयं न दृष्टम् ।

विदू—णं भवं अग्गदो मे वट्टइ ।[2]

राजा—सर्वः कान्तमात्मानं पश्यति । तामाश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि ।

विदू—(स्वगत) होदु ण से अवसरं दइस्सं । (प्रकाशं) भो अज्ज दे तावसकण्णआ अब्भत्थणीआ दिस्सइ ।[3]

राजा—सखे न परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्तते ।

१. एत्वेतु भवान् ।

२. ननु भवानग्रतो मे वर्तते ।

३. भवतु नास्यावसरं दास्यामि । भो अद्य ते तापसकन्यकाभ्यर्थनीया दृश्यते ।

नवा मणियष्ट्यः मनोसिजरुजं सा वा दिव्या ममालमपोहितुं रहसि लघयेदारब्धा वा तदाश्रयिणी कथा ॥" इति । **माढव्ये**ति । येनेति यस्मादर्थेऽव्ययम् । अत्राप्रस्तुतात् वैधर्म्येण प्रस्तुतोऽर्थः प्रतीयते । हे माढव्य मया दर्शनीयं दृष्टम् अतोऽहमवाप्तचक्षुःफलोऽस्मीत्यर्थः । तदारम्भाननुगुणां विकृतमाह **नन्वि**ति । भवतो दर्शनीयं सुलभमित्यर्थः । अग्रतो वर्तन परस्परमाभिमुख्यात् । एवमात्मनि दर्शनीयत्वारोपो विक्रमोर्वशीयेऽपि "किं वा तत्तहोदी उव्वसी अह विअ सुरूपो आदु अब्भहिआ रूवेण" इति । दर्शनीयत्वमारोपितमिति जानन्नप्यजानन्निवाह सर्वः कान्तं दर्शनीयमात्मानं पश्यतीति । तव दर्शनीयम्मन्यत्वे न दोष इति भावः । आरब्धे त्वरमाणस्तच्छेषमाह **तामि**ति । अनुभूतार्थविषयस्तच्छब्दः । ललामोऽलङ्कारः । "ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे श्रेष्ठे भूषापुण्ड्रशृङ्गपुच्छाचिह्नाश्वलिङ्गिष्वि"ति यादवः । अवसरम् । आरब्धस्य शकुन्तलावर्णनस्य । वर्णक्रमेण तस्या अगम्यत्वमाह **भो** इति । अद्य दृश्य इति । अदृष्टपूर्वमेवंविधामिति भावः । सा गम्यैवेत्याह **न परिहार्य** इति । अत्र [illegible] प्रतीयते । पुरुवंशजातस्य मे मनोऽननुरूपां नाभिलषतीत्यर्थः । मुनि-

सुरयुवतिसम्भवं किल मुनेरपत्यं तदुज्झिताधिगतम् ।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम् ॥ ८ ॥

विदू—(विहस्य) भो जह कस्स वि पिण्डखज्जूरेहिं उव्वेजिअस्स तिन्तिणीअफलाहिलासो भवे तह इत्थिआरअणपरिभाइणो भवदो इअं अब्भत्थणा ।

राजा—न तावदेनां पश्यसि येन त्वमेवमवादीः ।

विदू—तं खु रमणिज्जं एव्व जं भवदो वि विह्मअं समुप्पादेदि ।

राजा—किं बहुना–

चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन विधिना मनसा कृता नु ।

---

१. भो यथा कस्यापि पिण्डखर्जूरैरुद्वेजितस्य तिन्त्रिणीयफलाभिलाषो भवेत्तथा स्त्रीरत्नपरिभाविनो भवत इयमभ्यर्थना ।

२. तत् खलु रमणीयमेव यद्भवतोऽपि विस्मयं समुत्पादयति ।

कन्यकायाः कथं गम्यत्वमित्याह **सुरयुवती**ति । तर्हि कथं मुन्यपत्यत्वमित्याह तदुज्झिताधिगतमिति । मुनिसम्पर्केण न गम्यत्वहानिरित्याह अर्कस्येति । शिथिलं वृन्तस्थम् । एवमगम्यत्वे वर्णक्रममूले परिहृते पुनस्सांसर्गिकदौर्भाग्यमूलमगम्यत्वमस्तीत्याह **जह** इति । पिण्डखर्जूरैः अतिमधुरद्रव्यविशेषैः । तेषामुद्वेजकत्वं रसनाजाड्यकारित्वात् । तिन्त्रिणीफलेऽभिलाषस्तस्याम्लत्वात् । माधुर्यकृतरसनाजाड्यनिराकारणत्वात् । स्त्रीरत्नानि परिभवितुमतिपरिचयादवज्ञातु शीलवतः । सा प्रत्युत दर्शनीयैवेत्याह **न ताव**दिति । पश्यसीति वर्तमाननिर्देशः स्ववैधर्म्यदृष्ट्या । स्वयं सङ्कल्पपुरोवर्तिना सदा पश्यति । तदनुगुणमेनामित्यनेन । अथ व्यावर्तयितुमसमर्थस्तमनुसरति **तदि**ति । अत्र सामान्यात् प्रस्तुतो विशेषः प्रतीयते । सा रमणीयैवेति तर्कयामि यत्ते विस्मयं समुत्पादयतीत्यर्थः । स्वयमनुभूत वयस्येनानुमितं नरः । रमणीयत्वं वर्णयितमुपक्रमते **किं बहुना** इति । प्रत्यवयवं न वर्णयामि आकृतिमेव सङ्क्षेपेण वर्णयामीति भावः । **चित्र** इति । चित्रे चित्रफलके । परिकल्पितस्सत्त्वेन चेतन्येन योगस्सम्बन्धो यया ः । रूपस्य सौन्दर्यस्य उच्चयेन समाहारेण । उच्चितेन रूपेणेत्यर्थः । नुशब्दः पूर्ववाक्येऽपि योज्यः । चित्रे ह्यालिख्यमाने यद्यत् सम्यक् नायाति तत्तत् प्रयत्नेन समीचीनं क्रियते ।

स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥ ९ ॥

विदू—जदि पच्चादेसो दाणीं रूववदीणं सा ।

राजा—इदं च मे मनसि वर्तते ।

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनामुक्तं रत्नं मधु नवमनास्वादितरसम् ।

---

१. यदि प्रत्यादेश इदानीं रूपवतीनां सा ।

यद्वक्ष्यति "यद्यत्साधु न चित्रे स्यात् क्रियते तत्तदन्यथे"ति । सा पौनःपुन्येनोत्कर्षं चिकीर्षुणा विधिनाम्बुवाहालिमालेन्दुलेखेन्दीवरादिभ्यस्सकलं सौन्दर्यं समाहृत्य चित्रे यथास्थानं विन्यस्य परिकल्पितसत्वयोगा नु । यदि वा मनसा चिकीर्षितं सर्वं हस्ते सम्यङ्नायातीति मनसा कृता नु । धातुः विभुत्वम् अपरिच्छेद्यं सृष्टिकौशलम् । तस्या लोकातिक्रान्तरामणीयकं वपुश्चानुचिन्त्य सा अपरा एवंविधास्वन्यतरा सामान्यस्त्रीरत्न-सृष्टिव्यतिरिक्ता स्त्रीरत्नसृष्टिरिति मे प्रतिभाति । स्त्रीरत्नमयी सृष्टिः स्त्रीरत्नसृष्टिः । सृज्यत इति सृष्टिः । स्त्रीरत्नमयी सृज्यभूतेत्यर्थः । अत्र पूर्वार्धे सन्देहद्वयम् उत्तरार्धेऽतिशयोक्तिरिति संसृष्टिः । "ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशय इति । निगी-र्याध्यावसानन्तु प्रकृतस्य परेण यत् प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनं कार्यकार-णयोश्चैव पौर्वापर्यविपर्ययः विज्ञेयातिशयोक्तिस्से"ति । **जइ** इति । दाणीमिति वाक्या-लङ्कारे । प्रत्यादेश इति कारणे कार्योपचारः । निन्दाकारणमित्यर्थः । "प्रत्यादेशो निराकृतिः" इत्यमरः । पुनरपि सृष्टेः प्रकारमाह **इदमिति** । इदं वक्ष्यमाणम् मनसि वर्तते प्रतिभाति । अनाघ्रातमनुपभुक्तसौरभम् । कररुहैरलूनम् । लवनं तावतैवानु-पयोगात् कर्णपूरीकरणाद्युपयोगतया परिणमति । अनुपयुक्तमित्यर्थः । अनामुक्तम् आ-मोचनमाभरणत्वेन धारणं तद्रहितम् । मधु माक्षिकम् । नवमपर्युषितम् अनास्वादि-तरसं न केनचिदास्वादितावशिष्टम् । अखण्डम् अन्तरान्तरोपभोगाभावादपरिक्षीणं परि-पूर्णम् । पुण्यानामनेकजन्मार्जितानां शुभकर्मणां फलं कामसुखं शृङ्गारापर्यायम् । अपि-चेति समुच्चये । तद्रूपं तस्याः रूपं वपुः । अनघं निर्दोषम् । अत्रानघत्वविशिष्टे तद्रूप एकस्मिन्ननाघ्रातत्वादिविशिष्टानि पुष्पादीनि बहून्यारोप्यन्ते इति मालारूपकमेतत् । अत्र चित्र इत्यादि विधिरित्यन्तं विधिकर्तृकसृष्टिप्रकरणम् । अतः प्रकरणवैशिष्ट्यात् पुष्पादीनां तद्रूपसृष्टेरुपादानकरणत्वं प्रतीयते अतोऽयमर्थः—अनघं तद्रूपं विधिनानाघ्रातेन पुष्पेण कररुहैरलूनेन किसलयेनानामुक्तेन रत्नेन नवेनानास्वादितेन मधुना अख-ण्डेन पुण्यानां फलेन च निर्मितमिति च मे प्रतिभातीति । अतिशयोक्तिरियम् ।

अखण्डं पुण्यानां फलमपि च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ १० ॥

विदू—तेणं हि लहु परित्ताअदु णं भवम्। मा कस्स वि तवस्सिणो इंगुदीतेल्लमिस्सचिक्कणसीसस्स आरण्णअस्स हत्थे णिवडउ ।

राजा—परवती खलु तत्रभवती न च सन्निहितो गुरुजनः ।

विदू—अह तत्तभवन्तमन्तरेण कीदिसो से दिट्ठिराओ ।

राजा—निसर्गादेवाप्रगल्भस्तपस्विकन्याजनः । तथापि तु ।

---

१. तेन हि लघु परित्रायतामेनां भवान्। मा कस्यापि तपस्विन इंगुदीतैलमिश्रचिक्कणशीर्षस्यारण्यकस्य हस्ते निपततु ।

२. अथ तत्रभवन्तमन्तरेण कीदृशोऽस्या दृष्टिरागः ।

पुष्पादीनां तत्सृष्टेरुपादानकारणत्वासम्बन्धे सम्बन्धकथनात् । अतोऽत्र मालारूपकेणातिशयोक्तिर्ध्वन्यते । तया पुनस्तद्रूपस्य सहजसौरभसौकुमार्यलावण्यमाधुर्याह्लादकत्वानि व्यज्यन्ते । तेन माधुर्यस्याधररसस्य वागिन्द्रियनिष्ठत्वान्मनष्षष्ठेन्द्रियवर्गसातिशयसन्तर्पणत्वं तेनोपभोगयोग्यतायाः परकाष्ठाप्राप्तिश्च । एवमुपभोगयोग्यतामुक्त्वा तदनुरूपः कोऽपि नेत्याह न जान इति । इह एतद्विषये । समुपस्थास्यतीत्यन्तर्भावितण्यर्थः । "अनुष्ठितानन्तरजाविवाह" इतिवत् । सम्यक् समीपे स्थापयिष्यतीत्यर्थः । अनेन स्वाधीनभर्तृकात्वं व्यज्यते । एवं तद्रूपमुपभोगयोग्यतायाः परकाष्ठां प्रापयन् विधिः इह कं भोक्तारं समुपस्थास्यतीति न जाने । **न जान** इति ग्राम्यत्वपरिहाराय । तद्रूपोपभोगानुरूपः कोऽपि नेत्यर्थः । **तेने**ति । लघु शीघ्रम् । भयहेतुमाह मा कस्येति । तपस्विनः विषयविमुखस्य । इंगुदीतैलमिश्रचिक्कणशीर्षस्य दुर्भगस्य । 'चिक्कण मसृणोपमम्' इत्यमरः । आरण्यकस्य अलोकवृत्तज्ञस्य । निपततु । ततः पूर्वमेव स्वीकुरुष्वेति भावः । तत्रोपरोधमाह **परव**तीति । परवती गुर्वधीना । "परच्छन्द पराधीनः परवान् परयन्त्रकः" इति । अथ समागमस्य कालविलम्बमाशङ्क्याश्वासोपायमन्विच्छंस्तत्प्रधानभूतं तदनुरागं पृच्छति **अथे**ति । अथेतिप्रश्ने । "मङ्गलानन्तरारम्भप्रश्नकात्स्न्येष्वथो अथ" इत्यमरः । कीदृशः अस्ति वा न वेत्यर्थः । दृष्टौ रागः रञ्जनम् अनुरागानुभावभूतम् । **निसर्गा**दीति । अत्राप्रागल्भ्यात् कारणात् दृष्टावनुरागानाविष्करणं कार्यं प्रतीयते । तपस्विकन्या सामान्यात्तद्विशेषश्च । सा दृष्टावनुराग न प्रका-

अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकृतोदयम् ।
विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः ॥ ११ ॥

विदू—किण्णु सा दिट्ठमत्तस्स तुह अङ्कं आरोहदि ।

राजा—मिथः प्रस्थाने पुनश्शालीनतयापि काममाविष्कृतो भाव स्तत्रभवत्या मयि ।

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्ड
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥ १२ ॥

विदू—जइ एव्वं गहिअपाहेओ होसि । किदं तुए अणुपसग्गं तपोवणं ति पेक्खामि

१. किन्नु सा दृष्टमात्रस्य तवाङ्कं आरोहति ।

२. यद्येवं गृहीतपाथेयो भवसि । कृतं त्वयानुपसर्गं तपोवनम् इति पश्यामि ।

शितवतीत्यर्थः । तथेति । तथापि विशेषोऽस्ति । तमाह **अभिमुख** इति । मय्यभिमुखे वदनकमलमवलोकयति सति । तयेक्षितं मद्विषयमवलोकनं संहृतं निवर्तितम् । अनुरागानुभावोऽयम् । तया अन्यनिमित्तकृतोदयं हसितम् अहासि च । अन्यनिमित्तत्वेनेन हासस्य गूहनमुक्तम् । गूढहासोऽप्यनुरागानुभावः । यदुक्तं मुनिना रागिणीलक्षणे "स्मयते च निगूढं च वाक्यं चाधोमुखी वदे"दिति । मदनः कामः । अनुराग इति यावत् । विनयवारितवृत्तित्वं विवरणाभावे हेतुः । ईक्षणसंहारो गूढहासश्च संवरणाभावे हेतुः । अनुरागस्य सम्यगनाविष्करणं त्वय्यविश्वासादित्याह **किन्न्विति** । दृष्टमात्रस्य तत्पूर्वदृष्टस्य । अत्राङ्कारोहात् कार्यात् कारणरूपो विश्वासः प्रतीयते । सा किमपरिचितं त्वां विश्वसितीत्यर्थः । तव हृदयाज्ञानात् सा स्वहृदयमनाविष्कृतवतीति भावः । सत्यं मयि परिचिते तयानुरागस्सम्यगाविष्कृत इत्याह **मिथ** इति । मिथः रहस्युपविश्येत्यर्थात् । शालीनतया लज्जिततया । "शालीनो लज्जितो मनः" इति । रहसि किञ्चित कालं सहोपविश्य इङ्गिताकारादिभिः विदितमदनुरागा पर्णशालां यान्ती सा मद्विषयमनुरागं सम्यगाविष्कृतवतीत्यर्थः । भावाविष्करणमाह **दर्भेति** । इति । उक्त्वेति शेषः ।

राजा—सखे तपस्विभिः कैश्चित् परिज्ञातोऽस्मि। चिन्तय तावत् केनापदेशेन सकृदप्याश्रमे वसामः।

विदू—को[1] अवरो अवदेसो। तुअं राआ। णीवारछब्भाअं मे उवहरन्तु त्ति।

राजा—मूढ अन्यत् भागधेयमेतेषां रक्षणे निपतति। यद्रत्नराशीनपि विहायाभिनन्द्यम्। पश्य।

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत् फलम्।
तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः॥१३॥

नेपथ्ये—हन्त सिद्धार्थौ स्वः।

राजा—(कर्णं दत्त्वा) अये धीरप्रशान्तः स्वरः। तपस्विभिर्भवितव्यम्।

(प्रविश्य)

दौवारिकः—जेदु[2] भट्टा एदे दुवे इसिकुमारआ पडिहारभूमिं उवट्ठिदा।

१. कोऽपरोऽपदेशः। त्वं राजा। नीवारषड्भागं मे उपहरन्त्विति।

२. जयतु भर्ता। एतौ द्वावृषिकुमारौ प्रतिहारभूमिमुपस्थितौ।

रूपेण परिणमति विवृत्तवदना अवलोकितवतीति। वक्ष्यति च "दृष्टो विवृत्य बहुशोऽप्यनयां सतृष्ण"मिति। **यदी**ति। पाथेयशब्देनाश्वासविशेषवाचिना तत्सामान्यं वक्ष्यते। गृहीताश्वाससाधन इत्यर्थः। उक्तं च "मनस्तु तद्भावदर्शनाश्वासि" इति। अनुपसर्गमिति। अत्र तपोवनानुपद्रवकारणात् कार्यात् तत्र निवासः कारणरूपः प्रतीयते। यावद्गुर्वागमनमाश्रमे निवत्स्यसीति तर्कयामीत्यर्थः। तत्रोपरोधमाह **तपस्विभि**रिति। राज्ञो वृथाश्रमवासोऽनुचितः अत आह केनेति। सकृदपि। सोऽपि महान् लाभ इति भावः। राजा इत्यनेन षड्भागार्हत्वमुक्तम्। 'राजा हि फलषड्भागं तस्मादाप्नोति रक्षिता'दिति स्मृतेः। मूढ! विशेषानभिज्ञ!। अन्यत् भागधेयम् अन्यो भागः। निपतति स्वयमेवायाति। यथा श्रीभागवते "इष्टं ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक् तदा स्वभागधेयानि ग्रहीष्यन्ति दिवौकसः" इति। षड्भागाधिक्यमाह **यत्ने**ति। तद्भेतु तस्य विकर्षमाह **यदुत्तिष्ठती**ति। अन्यस्य भागस्य स्वरूपमुत्कर्षञ्चाह तप इति। अक्षय्य[?]यरहितम्। अथ राजानमारात्तं श्रुत्वा तद्दर्शनोत्सुकौ। तस्मिन् गुरुभिरादिष्टौ अतः

राजा—तेन ह्यविलम्बं प्रवेशय तौ ।

दौवा—अअं पवेसेमि । (निष्क्रम्य ऋषिकुमाराभ्यां सह प्रविश्य) इदो भअवन्तो ।

[उभौ राजानं विलोकयतः]

प्रथमः—अहो दीप्तिमतोऽपि विश्वसनीयता वपुषः । अथवा उपपन्नमेतदृषिभ्यो नातिभिन्ने राजनि । कुतः ।

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति ।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यश्शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥ १४ ॥

द्वितीयः—गौतम ! अयं स वलभित्सखः पार्थिवो दुष्यन्तः ।

प्रथमः—अथकिम् ।

द्वितीयः—तेन हि ।

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति ।
आशंसन्ते सुरसमितयस्सक्तवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥ १५ ॥

---

१. अयं प्रवेशयामि । इतो भगवन्तौ ।

प्राप्तौ कुमारकौ **हन्तेति** । धीरप्रशान्तः धैर्यप्रशमद्योतकः । **अहो** इति । अत्राधृष्यत्वाभिगम्यत्वे व्यज्येते । अथवेति । नात्र विस्मय इत्यर्थः । कुत इत्याह उपपन्नमिति । नातिभिन्ने अनुत्कटभेदे । उक्तमुपपादयति **अध्याक्रान्ते**ति । सर्वभोग्ये सर्वैराश्रमिभिर्भोग्ये गृहस्थाश्रमे । 'यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः वर्त्तन्ते गृहिणं तद्वदाश्रित्येतर आश्रमाः' इति वचनात् । रक्षायोगात् रक्षाविषयादुद्योगात् । यदुक्तं "तपष्षड्भागमक्षय्य" मिति । केवलमिति । नाम्नो राजपूर्वत्वमेव भेद इत्यर्थः । दिवि चारणोद्गीतकीर्त्तित्वमाकर्ण्याह **अयं स** इति । काक्वा प्रश्नः । नैतदिति । उदधिश्यामा सीमा पर्यन्तो यस्याः । समुद्रपर्यन्तां । परिघ आयुधविशेषः । भुनक्ति रक्षति । कुत एतन्न चित्रमित्याह आशंसन्त इति । सक्तवैराः परिभूताः । अत्र वज्र- [illegible] प्रतीयते । अनुकूलतरा । आश्रमवासोपाय-

उभौ—(उपगम्य) विजयस्व राजन्!।

राजा—(आसनादुत्थाय) अभिवादये भगवन्तौ।

उभौ—स्वस्ति भवते।

[फलान्युपहरतः]

राजा—(सप्रणामं प्रतिगृह्य) आज्ञापयितुमिच्छामि।

उभौ—विदितो भवानाश्रमवासिनामिहस्थः। तेन भवन्तं प्रार्थयन्ते।

राजा—किमाज्ञापयन्ति?।

उभौ—तत्रभवतः कण्वस्य महर्षेरसान्निध्याद्रक्षांसि न इष्टिविघ्नमुत्पादयन्ति। तत् कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति।

राजा—अनुगृहीतोऽस्मि।

विदू—(अपवार्य) इअं दाणीं ते अणुऊलतरा अब्भत्थणा[1]।

राजा—(स्मितं कृत्वा) रैवतक! मद्वचनादुच्यतां सारथिः सबाणकार्मुकं रथमुपस्थापयेति।

दौवा—जं देवो आणवेदि[2]।

[निष्क्रान्तः]

उभौ—(सहर्षम्)

अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः॥ १६॥

राजा—गच्छेतां पुरो भवन्तौ। अहमप्यनुपदमागत एव।

उभौ—विजयस्व।

---

१. इयमिदानीं तेऽनुकूलतरा अभ्यर्थना।

२. यद्देव आज्ञापयति।

भूतत्वात्। **अनुकारिणि** सदृशे। इह अस्मदिष्टविघ्ननिवारणम्। उक्त समन्वयेनोपपादयति आपन्नेति। आगत इत्यवलम्ब्य उक्तः। अस्तीत्यत्र ककाः प्रश्नः। सर्पारवाहमासीत्। कौतुकमित्यर्थः। परिवाहो जलस्याभिवृद्धिः बिन्दुस्तस्य लेशः। ताभ्यां तत्सामान्यं लक्ष्यते। प्रथममाभिवृद्धिमदानीं तस्य लेशोऽपि नेत्यर्थः। न भेत-

8

[इति निष्क्रान्ता]

राजा—माढव्य अस्ति शकुन्तलादर्शने कुतूहलम् ?।

विदू—पुढमं सपरिवाहं आसी । दाणीं रक्खसवुत्तन्तेण से बिन्दू वि णावसेसिदो ।

राजा—मा भैषीः । ननु मत्समीपे वर्त्तिष्यसे ।

विदू—एसं रक्खसादो रक्खिदोह्मि ।

(प्रविश्य)

दौवारिकः—देव सज्जो रहो भट्टिणो विजअप्पत्थाणं अवेक्खदि । एसो उण णअरादो देईणं आणत्तिहारओ करभओ आअदो ।

राजा—(सादर) किमम्बाभिः प्रेषितः ।

दौवा—अहइम् ।

राजा—ननु प्रवेश्यताम् ।

दौवा—तह (इति निष्क्रम्य करभकेण सह प्रविश्य) एसो भट्टा । उपसप्प ।

---

१. प्रथमं सपरिवाहमासीत् इदानीं राक्षसवृत्तान्तेनास्य बिन्दुरपि नावशेषितः ।

२. एष राक्षसाद्रक्षितोऽस्मि ।

३. देव सज्जो रथो भर्तुर्विजयप्रस्थानमवेक्षते । एष पुनर्नगराद्देवीनामाज्ञप्तिहारकः करभक आगतः ।

४. अथकिं ।

५. तथा । एष भर्ता । उपसर्प ।

व्यमिति कारणमुखेनाह नास्तीति । आज्ञप्तिराज्ञा । हारकः आनेता । अम्बाभि मातृभिः । सम्भावना सत्कारः । इतः तपोवने । इतः नगरे । आज्ञप्त कार्यम् । अत्र कार्ययोस्समप्राधान्यं युगपत् कर्तुमशक्यत्वं च व्यज्यते । अतः प्रतिपत्तिमू

करभकः--(उपेत्य) जेदु भट्टा । देई आणवेदि आआमिणि चउत्थे दिअहे णिव्वुत्तपारणो मे उववासो भविस्सदि । तहिं दीग्घाउणा अवस्सं सम्भावइदव्वं ति ।

राजा—इतस्तपस्विकार्यं इतो गुरुजनाज्ञतम् । द्वयमप्यनतिक्रमणीयम्। किमत्र प्रतिविधेयम् ।

विदू--तिसङ्कू विअ अन्तरा चिट्ठ ।

राजा—सत्यमित्थमाकुलीभूतोऽस्मि ।

कृत्ययोर्भिन्नदेशत्वाद्द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा ॥ १७ ॥

(विचिन्त्य) सखे त्वमज्जूभिः पुत्र इति परिगृहीतः । ततो भवानितः प्रतिनिवृत्तो मे तपस्विकार्यव्यग्रतामावेद्य तत्रभवतीनां पुत्रकृत्यमनुष्ठातुमर्हति

विदू---ण खु मं रक्खाभीरुअं गणासि ? ।

राजा---कथमेतत् भवति संभाव्यते ।

विदू---तेण हि जह राआणुएण गन्तव्वं तह गच्छामि ।

राजा--ननु तपोवनोपरोधः परिहरणीय इति सर्वमानुयात्रिकं त्वया सह प्रस्थापयामि ।

---

१. जयतु भर्ता । देव्याज्ञापयति आगामिनि चतुर्थे दिवसे निवृत्तपारणो मे उपवासो भविष्यति । तत्र दीर्घायुषावश्यं संभावयितव्यमिति ।

२. त्रिशङ्कुरिवान्तरा तिष्ठ ।

३. न खलु मां रक्षोभीरुं गणयसि ।

४. तेन हि यथा राजानुजेन गन्तव्यं तथा गच्छामि ।

आह **किमत्रे**ति । सत्यमित्थमाकुलीभूतोऽस्मि । तदुपायश्चिन्त्यतामिति भावः । **कृत्ययो**रिति । द्वैधीभवति । उभयोः कृत्ययोरपि युगपत् कर्तव्यबुद्धिर्जायते इत्यर्थः । विचिन्त्याद्भुतमाह **सखे** इति । न खल्विति । अत्र काक्वा प्रश्नः । नेत्याह **कथ**मिति ।

विदू—तेण हि जुवराओ दाणीं संवुत्तो।

राजा—(आत्मगतम्) चपलोऽयं वटुः कदाचिदिमामस्मत्प्रार्थनामन्तःपुरेभ्यः कथयेत्। भवत्वेवं तावद्वक्ष्ये। (विदूषकं हस्ते गृहीत्वा) **वयस्य!** ऋषिगौरवादाश्रमं गच्छामि। न खलु सत्यमेव तापसकन्यायां शकुन्तलायां ममाभिलाषः। पश्य -

क्व वयं क्व परोक्षमन्मथो मृगशावैस्सममेधितो जनः?
परिहासविजल्पितं सखे! परमार्थेन न गृह्यतां वचः ॥ १८ ॥

विदू—अहंइम्।

[इति निष्क्रान्तास्सर्वे]

द्वितीयोऽङ्कः।

१. तेन हि युवराज इदानीं संवृत्तः।

२. अथ किम्।

तथा प्रस्थापयामित्याह **ननु तपोवने**ति। तद्विसर्जने कथमपि दोषमाशङ्क्य परिहरति **चपलोऽय**मित्यादिना वच इत्यन्तेन। इमां शकुन्तलाविषयाम्। हस्तग्रहणं विस्रम्भार्थम्। ऋषिगौरवात् न शकुन्तलादिदृक्षया। **न खल्वि**ति। शकुन्तलायामभिलापोऽस्तीत्येतन्न सत्यमेवेत्यर्थः। न खलु सत्यमेव असत्यमेतन्मम वचनम् इत्यन्तर्गतः। अतोऽसत्यत्वादित्यपरिहारः। अभिलापस्यात्यन्तासम्भावनामाह **क्वे**ति। वयं स्वतः संसर्गाच्च मदनतन्त्रप्रवीणाः। जनविशेषणाभ्यां तदन्यथात्वं व्यज्यते। क्वेत्यधिकरणाक्षेपे। स चोभयत्रोपात्त उभयोरेकाधिकरण्यमाक्षिपति। उभयमेकस्मिन्नभिलापे कर्तृतया कर्मतया च नान्वेति। अहं हि सत्यवादी। अतः परमार्थमेतदिति मा मंस्था इत्याह **परिहासे**ति। परिहासे पुनरसत्यं न निषिद्धम्। 'न नर्मयुक्तं ह्यनृतं हि नास्ति' इत्युक्तेः। 'न वितथा परिहासकथास्वपि' इति च। **अथ किम्** एतत् परमार्थमिति नावगच्छामीत्यर्थः।

इत्यभिरामविरचितेऽभिज्ञानशाकुन्तलादर्शने

द्वितीयोऽङ्कः।

अथ तृतीयोऽङ्कः ।

[ततः प्रविशति यजमानशिष्यः कुशानादाय]

शिष्यः—अहो महानुभावः पार्थिवो दुष्यन्तः; यत् प्रविष्टमात्र एवाश्रमपदं तत्रभवति राजनि निरुपप्लवानि कर्माणि नः प्रवृत्तानि ।

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः ।
हुङ्कारेणेव धनुषः स हि विघ्नानपोहति ॥ १ ॥

यावदिमान् वेदिसंस्तरणार्थान् दर्भानृत्विग्भ्य उपनयामि (परिक्रम्यावलोक्य च आकाशे) प्रियंवदे कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीपत्राणि नीयन्ते? । किं ब्रवीषि--आतपलङ्घनात् बलवदस्वस्था शकुन्तला । तस्याः शरीरनिर्वापणायेति; तत्त्वरिततरमुपगम्यतां सखी । सा खलु भगवतः कुलपतेरुच्छ्वसितम् । अहमपि वैतानिकं शान्त्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि । [निष्क्रान्तः]

विष्कम्भकः

इति मुन्यर्थनहेतुकधर्मारण्यप्रवेशसवनिपतेः । सन्दर्श्य सखविरोधिप्रवसादीनि सूच्यन्ते । **तत** इति । कुशान् दर्भान् । "कुशः पुनः अस्त्री दर्भः पवित्रमस्त्री" इति केशवः । अथ यजमाननियोगात् दर्भानादाय यज्ञशालां तान् । गच्छन् शिष्यो राजप्रभावमनुचिन्त्य विस्मितः प्राह । **अहो** इति । अनुभावोऽनभिभवनीयताप्रातिभ्येहेतुः प्रभावः । कुत इत्याह । प्रविष्टमात्रे प्रवेशसमय एव । कथमेतदित्याह **का कथे**ति । कथा कथनं प्रसङ्गः । विघ्नान् तत्कारणानि रक्षांसि । धनुषो हुङ्कारेण इवेत्यन्वयः । अत्र ज्याशब्दगतत्वेन धनुषो हुङ्कारत्वोत्प्रेक्ष्यते । विघ्नदूरीकरणं निमित्तम् । तच्च मुनेर्हुङ्कारस्यैव सम्भवति । अत उत्प्रेक्षा धनुषि मुनिव्यवहारसमारोपाश्रयां समासोक्तिं गर्भीकरोति धनुषो मुनेर्हुङ्कारेणेवेति । प्रकृतमाह **याव**दिति । वेदिरशालामध्यम । **आकाश** इति । "किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम्" । प्रियंवदे इति । उशीरः लामज्जकम् । मृणालवन्तीति नास्त्यर्थे मतुप् । आतपो ग्रीष्मः तस्य लङ्घनात् प्राप्तेः । यथा 'प्रांशुलभ्ये फले लोभात्' इति । उपगम्यतां त्वरितमुपगम्य निर्वाप्यताम् । कुत इत्याह **सा खल्वि**ति । उच्छ्वसितं प्राणाः । अहमपि सहकरिष्यामीत्याह **अहमपी**ति । वितानं यज्ञः तत्र भवम् । शान्त्यर्थमुदक

[ततः प्रविशति कामयमानावस्थो राजा।]

राजा—

जाने तपसो वीर्यं सा बाला परवतीति मे विदितम्।
अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम् ॥ २ ॥

(मदनबाधां निरूप्य) भगवन् कुसुमायुध! त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः। कुतः—

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।

शान्त्युदकम्। **विष्कम्भकः**। "वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः विष्कम्भकस्तु विज्ञेयो मध्यपात्रप्रयोजितः" इति। विघ्ननिरासो राज्ञस्सन्तापः कामहेतुकस्तस्याः। शिशिरोपचारकरणं सखीकृत मालिनीतीरे। वृत्तः कथैकदेशो गौतमीयास्तत्र सायमागमनम्। वर्तिष्यमाण एतौ विष्कम्भे ह्यत्र सूच्येते। अथ कालागतान्योन्यरागयोरसमेतयोः। प्रदर्श्यते नायकयोर्मदनातुरयोर्दशा। **तत** इति। "अवस्थातु: पदार्थस्य विकारेषु क्रियागुणैः रूपैस्तैस्तैरवस्थानमवस्था नाम गीयते" इत्यवस्थालक्षम। एवमाश्रममासाद्य मखविघ्नकरान् खलान्। प्रभावेन निराकुर्वन् दूरे राजा कदाचन। प्रातस्सवनेऽनीते तपस्विभिर्विश्रमार्थमादिष्टः दयितामेव ध्यायन् सोत्कण्ठः प्राह **जाने** इति। अत्र तपोवीर्यज्ञानात् कारणादप्रस्तुतात् बलात्स्वीकाराशक्यत्वं कार्यं प्रतीयते। तथा तस्याः परवतीत्वात् कारणात् कार्यभूतस्तदनुमत्या स्वीकारासम्भवश्च। अतोऽयमर्थः। मुनिशापभयात्तस्या बलात् स्वीकारोऽशक्यः। तस्या गुर्वधीनत्वात्तदनुमत्या स्वीकारो न सम्भवतीति जाने तथापि धैर्यमवलम्ब्य गुर्वागमनप्रतीक्षणे कर्तव्ये सतीदं हृदयं तस्याश्शकुन्तलाया निवर्तयितुं नालमस्मि न समर्थोऽस्मीति। "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इति वैजयन्ती। अप्रस्तुतप्रशंसात्रालङ्कारः। **मदने**ति। मदनशरपीडामभिनीय। पीडामसहमानश्शरपातानुमितपुरोवस्थानं मदनं सबहुमानमभिमुखीकृत्य बाधानिवृत्तिं प्रार्थयते **भगव**न्निति। माहात्म्यमभिदधतातिसन्ध्ययोग्यता व्यज्यते। कुसुमायुधेत्यनेन परपीडावैमुख्यम्। चन्द्रमसेत्यनेनाह्लादकत्वमभिदधता परोपकारपरत्वं च। अत आह विश्वसनीयाभ्यामिति। विश्वसनीयत्वेन कामिजनसार्थस्य तयोरुपरि विश्वासो व्यज्यते। अतिसन्धीयते वञ्च्यते। भगवन् कुसुमायुध त्वया चन्द्रमसा च परपीडावैमुख्यात् परोपकारपरत्वाच्च विश्वसनीयाभ्यां युवाभ्यां विश्वसनीयत्वेन युवयोरुपरि विश्वासवान् कामिजनसार्थोऽतिसन्धीयते। अनुचितमेतद्युवयोः अतस्ततो विरन्तव्यमि-

विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि ॥ ३ ॥

(परिक्रम्य) क्व नु खलु संस्थिते कर्मणि सदस्यैरभ्यनुज्ञातविश्रमः क्लान्तमात्मानं विनोदयामि ? (निश्वस्य) किं किल मे प्रियादर्शनादृते शरणमन्यत् । यावदेनामन्विच्छामि । (सूर्यमवलोक्य) इमामुग्रातपां वेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति । तत्रैव गच्छामि (परिक्रम्य स्पर्शं रूपयित्वा) अहो प्रवातसुभगोऽयमुद्देशः ।

तथा हि—

शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् ।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः ॥ ४ ॥

(परिक्रम्यावलोक्य च) अस्मिन् वेतसपरिक्षिप्ते लतामण्डपे सन्निहितया तया भवितव्यम् । तथा हि—

त्यर्थः । अत्राप्रस्तुतात् सामान्यात् प्रस्तुतविशेषप्रतीतेः युवां मां न वञ्चयेतमित्यर्थः । अतिसन्धेर्ज्ञापकमाह कुत इति । कुत इति चेदुच्यत इत्यर्थः । अर्थमनतिक्रम्य वर्तत इति यथार्थम् । तदन्यदयथार्थमनन्वर्थमित्यर्थः । त्वद्विधेष्वयथार्थं चेत् तत् कथमावयोरतिसन्धिस्स्यादित्याह शिक्यघटन्यायेन विसृजतीति । वज्रवत्सारा वज्रसाराः । यदि वा वज्रसारो नामायोविशेषः । तन्मयान् करोषि । **क्व नु खल्विति** । उपविश्येत्यर्थात् । वेद्या एकदेशस्सदः । सदोऽर्हन्तीति सदस्याः । संस्थिते समाप्ते । "संस्थाव्यवस्थाप्रणिधिसमाप्त्याकारमृत्युषु" इति वैजयन्ती । कर्मणि प्रातस्सवने । आत्मानं मनः । किं किलेति नास्तीत्यर्थः । कालेन तदधिष्ठितं देशं वितर्कयति **इमा**मिति । लतावलयवत्सु लतामण्डपवत्सु । अनेन शैत्यातिशयो व्यज्यते । उग्रातपामित्यनेनौष्ण्यातिशयश्च । तेनान्यत्रानतिवाह्यत्वञ्च । तीरेष्विति बहुवचनं लतावलयबहुत्वकटाक्षेण । उपविश्येत्यर्थात् । ससखीजना सखीजनक्रियमाणशिशिरोपचारेत्यर्थः । गमयति कृच्छ्रेणातिवाहयति । प्रभूतो वातो यस्मिन् स प्रवातः । प्रवातश्चासौ सुभगश्च प्रवातसुभगः । प्रभूतत्वमुपपादयति **शक्य**मिति । अत्रैवमन्वयः । प्रथमं शक्यमिति । किमप्यस्तीति शेषः । पश्चात् किं तदित्याकाङ्क्षायां पवनः आलिङ्गितुमिति । निर्वाह एषः । अत्र वामनः "शक्यमिति रूपं लिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमादिति सूत्रम् । सामान्योपक्रमो विशेषानपेक्षा । उदाहरणं यथा श्रीमहाभाष्ये "शक्यं श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्" इति वृत्तिः । अत्र विशेषणैस्सौरभशैत्यमान्द्यान्युक्तानि । अतिशयोक्तिरियम् । आलिङ्गनशक्यत्वस्यासम्बन्धेऽपि सम्बन्धकथनात् । **अस्मि**न्निति ।

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥ ९ ॥

यावद्विटपान्तरेणावलोकयामि (परिक्रम्य तथा कृत्वा) अये लब्धं नेत्र-निर्वाणम् । एषा मे मनोरथप्रियतमा सकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामन्वास्यते । भवतु श्रोष्यामि तावदासां विस्रंभकथितानि ।

[विलोकयन् स्थितः]

[ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला]

सख्यौ—(उपवीज्य) हला सउन्दले अवि सुहाअ दे णलिणीपत्त-वादो ।

शकु—किं वीजअन्ति मं सहीओ ।

[सख्यौ विषादं नाटयित्वा परस्परमवलोकयतः]

राजा—अहो बलवदस्वस्था शकुन्तला दृश्यते । तत् किमयमातपदोषः स्यात् उत मदनदोषः । उभयथा मे मनसि वर्तते । अथवा कृतं सन्देहेन ।

१. हला शकुन्तले अपि सुखाय ते नलिनीपत्रवातः ।

२. किं वीजयतो मां सख्यौ ।

परिक्षिप्ते परिवृते । **अभ्युन्नतेति** । पदानामंघ्रिविन्यासप्रतिबिम्बानाम् । "पदमंघ्रौ शरे त्राणे व्यवसायापदेशयोः अंघ्रिचिह्नेऽङ्घ्रिविन्यासे पद्यभागेऽन्नवस्तुनोः स्थाने वाक्ये सुप्तिङन्ते" इति केशवः । लतामण्डपे शकुन्तलामालोक्य हृष्यन्नाह **अये** इति । लब्ध नेत्रनिर्वाणमिति । इतोऽधिकमस्मन्नेत्राह्लादकं किमपि नेति भावः । मनोरथप्रियतमा । विषये विषय्युपचारः । मनोरथानां विषयभूता । शिलापट्टं प्रशस्तशिलाम् । **सुखाय** सुखं कर्तुम् । भवतीति शेषः । तापातिशयेन वातस्पर्शमजानन्ती पृच्छति **किमिति** । तस्यास्तापातिशयमवधार्याह **बलवदिति** । अस्वास्थ्यहेतुं विकल्पयति **तत् किमिति** । आतपो ग्रीष्मः । भेदमजानन्नाहोभयथेति । अथ सूक्ष्मेक्षिकया कमपि भेदमुपलभ्याह **अथवेति** । कृत पर्याप्तम् । सन्देहो मास्तु इत्यर्थः । "युगपर्याप्तयोः कृतम्" इत्यमरः ।

स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं
प्रियायास्साबाधं सदपि कमनीयं वपुरिदम् ।
समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥ ६ ॥

प्रियं––(जनान्तिकं) अणसूए तस्स राएसिणो पुढमदंसणादो आरहिअ पज्जुसुअमाणसा आवण्णा विअ सउन्दला । किण्णुखु से तण्णिमित्तो एव्व अअं आदङ्को भवे ।

अन––सहि मम वि ईदिसी आसङ्का हिअअस्स । होदु पुच्छिस्सं दाव णम् । (प्रकाशं) सहि पुच्छिदव्वासि । किंपि बलीओ खु दे सन्दावो ।

शकु––(पूर्वार्धेन पुष्पशयनमुद्रास्य) हला किं वत्तुकामासि ।

अन––हला सउन्दले अणब्भन्तरा खु वअं मअणगअस्स वुत्तन्तस्स । किन्तु जादिसी इदिहासणिबन्धेसु कामअमाणाणं समवत्था सुणीअदि तादिसीं दे लक्खेमि । कहेहि किण्णिमित्तो अअं दे आआसो । विआरं खु परमत्थदो अजाणिअ अणारम्भो पडिआरस्स ।

१. अनुसूये तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्युत्सुकमानसा आपन्नेव शकुन्तला । किन्नु खल्वस्यास्तन्निमित्त एवायमातङ्को भवेत् ।

२. सखि ममापि ईदृश्याशङ्का हृदयस्य । भवतु प्रक्ष्यामि तावदेनाम् । सखि प्रष्टव्यासि । किमपि बलीयान् खलु ते सन्तापः ।

३. हला किं वक्तुकामासि ।

४. हला शकुन्तले अनभ्यन्तरा खलु वयं मदनगतस्य वृत्तान्तस्य । किन्तु यादृशी इतिहासनिबन्धेषु कामयमानानां समवस्था श्रूयते तादृशीं ते लक्षयामि । कथय किन्निमित्तोऽयं ते आयासः । विकारं खलु परमार्थतोऽज्ञात्वानारम्भः प्रतिकारस्य ।

कुत इत्याह **स्तने**ति । प्रशिथिलेति । शिथिलत्वमाश्रयस्य तानवेनोष्मणा च । एकशब्देनान्यमयत्वव्यपोह उक्तः । कमनीयं लावण्यानपगमाद्दर्शनीयम् । अपराद्धं अपराधः । ताप इति यावत् । ग्रीष्मतापे वपुरेव सुभगं न स्यात् । अतः कामताप एव इत्यर्थः । तापस्य शिशिरवस्त्वसाध्यशमनत्वात् कामनिमित्तत्वमाशङ्कते **अनसूये** इति ।

राजा——अनसूयामप्यनुगतस्तर्को मदीयः। न हि मे स्वाभिप्रायेण दर्शनम्।

शकु——(आत्मगतं) बलिअं खु मे अहिणिवेसो। एदाणं वि सहसा ण सक्कुणोमि णिवेदिदुम्।

प्रियं——सहि सुट्ठु एसा भणादि। किं अत्तणो आदङ्कं उपेक्खसि। अणुदिअसं खु परिहीअसे अङ्गेहिं। केवलं लावण्णमई छाआ तुमं ण मुञ्चइ।

राजा——अवितथमाह प्रियंवदा। तथा हि——

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा।
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी॥७॥

शकु——कस्स वा अण्णस्स कहइस्सम्। आआसइत्तिआ दाणीं वो भविस्सम्।

---

१. बलीयान् खलु मे अभिनिवेशः। एतयोरपि सहसा न शक्नोमि निवेदयितुम्।

२. सखि सुष्ठु एषा भणति। किमात्मन आतङ्कमुपेक्षसे। अनुदिवसं खलु परिहीयसे अङ्गैः। केवलं लावण्यमयी च्छाया त्वां न मुञ्चति

३. कस्य वान्यस्य कथयिष्यामि। आयासयित्रीदानीं युवयोर्भविष्यामि

आतङ्को बाधा। "यक्ष्मातङ्कगदाबाधाश्शब्दाः पर्यायवाचिनः" इति वाग्भटः। **प्रष्ट्व्यासी**ति। कुत इत्याह **किमपी**ति। कुतो निमित्तजिज्ञासेत्याह **विकारं ख**ल्विति। **अनसूयामि**ति। तर्क ऊहः कामयमानावस्थैवेति। **एतयोरपि** स्नेहबहुमानविश्वासपात्रयोरपि। नायमुपेक्षायाः काल इत्याह **अनुदिवस**मिति। छाया कान्तिः। **क्षामे**ति। क्षामक्षामौ अतिक्षामौ कपोलौ यस्य तत्। तत्प्रकामौ मध्यांसगतनैसर्गिककान्तिविनत्यपेक्षौ। शोच्या कार्श्यवैवर्ण्यादिना। प्रियदर्शना लावण्यस्यानपगमात्। शोषणेन। शोषयतीति शोषणः। विशिष्टमरुत्स्पृष्टत्वेन शुष्कपत्रत्वमुक्तम्। सखीनिर्बन्धेनायासहेतु वक्तुमारभते **कस्ये**ति। युवयोर्न कथयामीति चेदिति शेषः। युवयोः कथयिष्यामीति भावः। तत् किं विलम्बेन इत्याह **आयासयित्री**ति। तुल्यदुःखसुखो

उभे—तदो एव्व खु णिब्बन्धो *संविहत्तं खु दुक्खं सज्झवेअणं होइ ।

राजा—

पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम् ।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मत्रान्तरे श्रवणकातरतां गतोऽस्मि ॥ ८ ॥

शकु—सहि जदं पहुदि मम दंसणपहं आअदो तवोवणरक्खिदा सो राएसी तदो आरहिअ तग्गएण अहिलासेण एदद्‌वत्थह्मि संवुत्ता ।

राजा—(सहर्षं) श्रुतं श्रोतव्यम् ।

स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः ।
दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य ॥ ९ ॥

---

१. तत एव खलु निर्बन्धः । संविभक्तं खलु दुःखं सह्यवेदनं भवति ।

२. सखि यदा प्रभृति मम दर्शनपथमागतस्तपोवनरक्षिता स राजर्षिः तत आरभ्य तद्गतेनाभिलाषेणैतदवस्थास्मि संवृत्ता ।

हि सखीजनः । **अत एव** आवयोरप्यायासस्स्यादित्यत एव । किं तत इत्याह **संविभक्त**मिति । अहमेवास्या आयासनिमित्तमिति निश्चिन्वानोऽप्यपायशङ्कयाह **पृष्टे**ति । बाला आध्यसहना स्वयं प्रतिकाराशक्ता च । मनोगतं गूढम् । आधिहेतुं, हृदयवल्लभम् । दृष्टः हृदयबुध्यावलोकितः । विवृत्य वलितमुखी भूत्वा । न तु यदृच्छया । बहुशः । नन्वेकवारं द्विवारं वा । सतृष्णम् । न तु सस्मयम् । अत्रान्तरे प्रश्नप्रतिवचनयोर्मध्ये । श्रवणात् कातरताम् इदानीमन्यं कञ्चन शृणोमीति भीरुताम् । विशिष्टवीक्षितोऽहमेवाधिहेतुरिति निश्चिन्वानोऽपि श्रवणकातरतां गतोऽस्मीत्यर्थः । **श्रुतं श्रोतव्यम्** । इतः परमस्मच्छ्रवणसुखकरं किमपि न । एतच्छ्रुतवतो मम श्रोतव्यं न किञ्चिदवशिष्यते । अत एव लब्धं श्रोत्रेन्द्रियसत्तासाफल्यमिति भावः । **स्मर एवे**ति । निर्वापयितृत्वं श्रोतव्यश्रवणप्रयोजकत्वात् । अभ्रे अपरार्धे श्यामः । नवाम्बुदाच्छादितातपत्वात् ।

*सिणिद्धजणसंविहत्तम् इति पाठान्तरम् ।

शकु---ता जदि वो अणुमदं तह वट्टह जह तस्स राएसिणो अणुकम्पणीआ होमि। अण्णहा अवसिंचह दाणीं मे उदअम्।

राजा --संशयच्छेदि वचनम्।

प्रियं—(जनान्तिकं) अणसूए दूरगअमम्महा अक्खमा इअं कालहरणस्स। जस्सिं बद्धभावा एसा सो ललामभूदो पौरवाणम्। ता जुत्तं से अहिलासो अहिणन्दिदुम्।

अन---तह जह भणासि (प्रकाशं) सहि दिट्ठिआ दे अणुरूवो अहिणिवेसो। साअरं वज्जिअ कहिं वा महाणई ओदरइ।

प्रियं--को दाणीं सहआरं अन्तरेण आदिमुत्तलदं पल्लविदं लहेइ।

राजा--किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तेते।

१. तद्यदि युवयोरनुमतं तथा वर्तेथां यथा तस्य राजर्षेरनुकम्पनीया भवामि। अन्यथावसिञ्चतमिदानीं मे उदकम्।

२ अनसूये दूरगतमन्मथा अक्षमेयं कालहरणस्य। यस्मिन् बद्धभावैषा स ललामभूतः पौरवाणाम्। तद्युक्तमस्या अभिलाषोऽभिनन्दितुम्।

३. तथा यथा भणसि। सखि दिष्ट्या तेऽनुरूपोऽभिनिवेशः। सागरं वर्जयित्वा कुत्र वा महानद्यवतरति।

४. क इदानीं सहकारमन्तरेणातिमुक्तलतां पल्लवितां लभते।

तपात्यये तपो ग्रीष्मः। "ग्रीष्मः ऊष्मागमस्तपः" इत्यमरः। प्रावृडारम्भ इत्यर्थः। **उदक**मिति। उदकावसेचनमत्र प्रेतकार्यम्। अन्यथा मे प्राणापायोऽवश्यं स्यादिति भावः। **संशयच्छेदि**। सख्योर्मत्संशयम् आवामेतदनुमन्यावहे न वेत्येवं रूपं छेत्तुं शीलवत्। **ललामभूतः** अलङ्कारभूतः। अभिनन्दितुं **सखी**ति। अथवा न श्लाघनीयमत्रेति मत्वाह **सागर**मिति। स्वभाव एष इति भावः। स एवानुरूपां तां लभत इत्याह **क इदानी**मिति। **किमत्रे**ति। यदीति सिद्धानुवादे। विशाखयोर्द्वित्वमुक्तं माधवीये "शूर्पद्विदैवसंज्ञाविशाखयोः" इति। सख्यावेनामनुवर्तेते इत्यत्र न विस्मय

अन—को उण उपाओ भवे । जेण अविलम्बिअं णिहुअं अ सहीए मणोरहं सम्पादअह्म

प्रियं—णिहुअं कत्तव्वं ति किं वि चिन्ता भवे । सिग्घं ति सुअरम् ।

अन— कहं विअ ।

प्रियं—णं सो राएसी इमस्सिं सिणिद्धदिट्ठी सूइदाहिलासो इमाणि दिअहाणि पआअरकिसो लक्खीअदि ।

राजा—सत्यमित्थंभूतोऽस्मि । तथा हि–

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं
निशि निशि भुजन्यस्तापाङ्गप्रसर्पिभिरश्रुभिः ।
अनतिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात्
कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते ॥ १० ॥

---

१. कः पुनरुपायो भवेत् । येनाविलम्बितं निभृतं च सख्या मनोरथं सम्पादयावः ।

२. निभृतं कर्तव्यमिति किमपि चिन्ता भवेत् । शीघ्रमिति सुकरम् ।

३. कथमिव ।

४. ननु स राजर्षिरस्यां स्निग्धदृष्टिस्सूचिताभिलाष इमानि दिवसानि प्रजागरकृशो लक्ष्यते ।

इत्यर्थः । **निभृतं** निगूढम् । चिन्ता उपायचिन्ता । **कथमिवे**ति । सुकरमिति शेषः । तस्यापि सङ्गमौत्सुक्यमित्याह कार्यमुखेन **नन्वि**ति । इत्थम्भूतः विनिद्रः कृशश्च । उक्तमुपपादयति । **इद**मिति । अशिशिरैरुष्णैः । हेतुभावगर्भमेतत् । भुजे उपधानीकृते न्यस्तादपाङ्गात् प्रवहद्भिः । अनतिलुलितज्याघाताङ्कम् अनतिलुलितः अनतिव्यक्तः औज्ज्वल्याभावात् । ज्याघाताङ्कः श्यामा ज्याघातरेखा येन । प्रतिसार्यते स्वस्थानं प्रकोष्ठं नीयते । अत्राश्रुप्रसर्पणं निद्राच्छेदस्योपपादकम् । वलयस्रसनं तनुतायाश्च । निभृत

प्रियं—(विचिन्त्य) हला मअणलेहो से करीअदु। तं सुमणोगोविदं देवसेसावदेसेण तस्स रण्णो हत्थं पावइस्सम्[1]

अन—रोअदि मे सुउमारो पओओ। किं वा सउन्दला भणादि।[2]

शकु—किं णिओओ वो विकप्पीअदि।[3]

प्रियं—तेण हि अत्तणो उवण्णासरूवं चिन्तेहि किं वि ललिअ-पदबन्धणम्।[4]

शकु—हला चिन्तेमि अहम्। अवहीरणाभीरुअं उण वेपदि मे हिअअं।[5]

राजा—(स्वगत)

अयं स ते तिष्ठति सङ्गमोत्सुको विशङ्कसे भीरु! यतोऽवधीरणाम्।
लभेत वा प्रार्थयिता न वा श्रियं श्रिया दुरापः कथमीप्सितो जनः? ॥

---

१. हला मदनलेखोऽस्मै क्रियताम्। तं सुमनोगुप्तं देवशेषापदेशेन तस्य राज्ञो हस्तं प्रापयिष्यामि।

२. रोचते मे सुकुमारः प्रयोगः। किं वा शकुन्तला भणति।

३. किं नियोगो वां विकल्प्यते।

४. तेन ह्यात्मन उपन्यासरूपं चिन्तय किमपि ललितपदबन्धनम्।

५. हला चिन्तयाम्यहम्। अवधीरणाभीरुकं पुनर्वेपते मे हृदयम्।

कर्तुमुपायमाह **मदनलेख** इति। मदनपीडासूचको लेखः। लिखत्यस्मिन्निति लेखः पत्रिका तम्। उक्तं सवदति **रोचते** इति। सुकुमारः सुकरः। **भणती**ति। शकुन्तलायै रोचते वा न वेति भावः। **विकल्प्यत** इति। युवयोर्नियोगमनुतिष्ठामीति भावः। **आत्मनः** आत्मावस्थायाः। ललितं कोमलम्। पदबन्धन पद्यम्। अवधीरणा याच्ञाभङ्गः। अवधीरणाशङ्कामसहमानो स्थानेऽतवावधीरणाशङ्केत्याह **अयं स** इति। भीरु भयशीले। शीलं हि यत्नेनापि न वारयितु शक्यमिति भावः। सङ्गमोत्सुकः उत्कण्ठातिशयेन काललवमप्यतिवाहयितुमसमर्थः। तिष्ठति। तवानुकूल्यं प्रतीक्षते। अतस्तस्मादवधीरणा न शङ्कनीयेत्यर्थः। प्रत्युत तेनावधीरणा शङ्कनीया न त्वयेत्याह **लभेते**ति। श्रियं लभेतेत्यन्वयः। यस्त्वां प्रार्थयते स लभेत वा न वा त्वया प्रार्थितो दुरापो न

सख्यौ--अत्तगुणावमाणिणि को दाणीं सरीरणिव्वावइत्तिअं सारदिअं जोसिणीं पडन्तेण वारइस्सदि ।

शकु--(सस्मितं) णिओइदा दाणीं ह्मि ।

[उपविश्य चिन्तयति]

राजा--स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रीयामवलोकयामि ।

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः ।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन ॥ १२ ॥

शकु--हला चिन्तिअं मए गहिदवत्थुअं । असण्णिहिदाणि उण लेहसाहणाणि ।

प्रियं--ईमस्सिं सुओअरसुउमारे णलिणीपत्ते णहेहिं णिक्खित्तवण्णं करेहि ।

शकु--(यथोद्दिष्टं रूपयित्वा) हला सुणुह दाव णं संगअत्थं ण वेत्ति ।

---

१. आत्मगुणावमानिनि क इदानीं शरीरनिर्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयिष्यति ।

२. नियुक्ता इदानीमस्मि ।

३. हला चिन्तितं मया गृहीतवस्तु । असन्निहिते पुनर्लेखनसाधने ।

४. अस्मिन् शुकोदरसुकुमारे नलिनीपत्रे नखैर्निक्षिप्तवर्णं कुरु ।

५. हला शृणुतं तावदेतत् संगतार्थं न वेति ।

भवेदित्यर्थः । सादृश्यनिबन्धनाप्रस्तुतप्रशंसेयम् । स त्वां नावधीरयिष्यतीत्याह **आत्मगुणे**ति । **नियुक्ते**ति । युवयोर्नियोगमनुतिष्ठामीति भावः । **स्थाने खलु** युक्तमेव । 'युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः । कुत इत्याह **उन्नमिते**ति भ्रूलतोन्नमनं चिन्तानुभावः । प्रथयति प्रकाशयति । **चिन्तितं मया** । प्रस्तुतं विचिन्त्य विरचितम् । लेखनसाधने लेखनीपत्रिके । निक्षिप्तवर्णं कुर्विति । प्रस्तुतमित्यर्थात् । शुकोदरेत्यनेनाक्षरविन्यासशौकर्यं व्यज्यते । **शृणुत**मिति । श्रुत्वा परीक्षां कुरुतमित्यर्थः । **अत्र**-

उभे--अवहिदह्म ।

[शकुन्तला वाचयति]

तुज्झ ण आणे हिअअं मम उण मअणो दिवा वि रत्तिं वि ।
णिग्घिण! तवइ बलीयं *तुइ जुत्तमणोरहं हिअअं ॥ १३ ॥

राजा---(सहसोपसृत्य)

तपति तनुगात्रि! मदनस्त्वामनिशं मां पुनर्दहत्येव ।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ॥ १४ ॥

सख्यौ--(सहर्षं) साअदं अविलंबिणो मणोरहस्स ।

[शकुन्तला अभ्युत्थातुमिच्छति]

राजा--अलमलमायासेन ।

सन्दष्टकुसुमशयनान्याशु क्लान्तबिसभङ्गसुरभीणि ।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति ॥ १५ ॥

१. अवहिते स्वः ।

२. तव न जाने हृदयं मम पुनर्मदनो दिवापि रात्रिमपि ।
निर्घृण! तपति बलीयस्त्वयि युक्तमनोरथं हृदयम् ॥

हिते इति । वाच्यतामिति भावः । **दिवापि रात्रिमपि** । अत्यन्तसंयोगे द्वितीया । हे निर्घृण तव नैर्घृण्यमेकमेव मे दुरवस्थाया हेतुरिति भावः । तव हृदयं न जानामि । तव हृदयाज्ञाने मम हृदयनिवेदनमनुचितम् । तथापि निवेदयामीति भावः । तव हृदयं मयि युक्तमनोरथं वा न वेति न जानामि मम हृदयं पुनस्त्वयि युक्तमनोरथं साभिलाषम् । अतो मदनः दिवा रात्रावपि सातिशयं तपति । अतस्त्वदेकशरणायां मयि घृणां कुरुष्वेति भावः । अस्मदवस्थामस्यै निवेदयितुमयमेवावसर इति सहसोपसृत्य मम हृदयं भवती जानातीत्याह **तपती**ति । पुनश्शब्दो विशेषद्योतकः । विशेषमाह **दह-ती**ति । दृष्टान्तमाह **ग्लपयती**ति । **अविलम्बिनः** । दर्शनोपायचिन्तासमय एव दृष्टस्य । मनोरथस्य । विषये विषय्युपचारः । मनोरथविषयस्य । अनेन मनोरथानां साफल्यं व्यज्यते । अवसरोचितं सम्भाषते **अल**मित्यादिना । सन्दष्टं संश्लिष्टं स्वेदार्द्रतया कुसुमशयनं येषु । आशु स्पर्शसमय एव । क्लान्तैः म्लानैः बिसभङ्गैः मृणाल-

* तुदहिमुहमणोरहं हिअअं इति पाठान्तरम् । क्वचिट्टीकायामपि त्वदभिमुखमनोरथमिति दृश्यते । अर्थतस्तु न कश्चिद्विशेषः ।

अन—ईदो सिलाअलेक्कदेसं अलङ्करेदु वअस्सो।

[राजा उपविशति शकुन्तला सलज्जं तिष्ठति]

प्रियं—वअस्स! दुवेणं वो अण्णोण्णाणुराओ पच्चक्खो। तहवि सहीसिणेहो मं पुणरुत्तवाइणीं करेइ।

राजा—भद्रे नैव तत् परिहार्यम्। विवक्षितं ह्यनुक्तमनुताप जनयति।

प्रियं—आवण्णस्स विसअवासिणो जणस्स अत्तिहरेण रण्णा होदव्वं ति णं एस वो धम्मो?।

राजा—नास्मात् परम्।

प्रियं—तेण्ण हि इअं णो सही तुमं एव्व उद्दिसिअ इमं अवत्थन्तरं भअवदा मअणेण आरोविदा। ता अरिहादि अब्भुववत्तीए जीविअं से ओलम्बिदुम्।

१. इतश्शिलातलैकदेशमलङ्करोतु वयस्यः।

२. वयस्य! द्वयोर्वामन्योन्यानुरागः प्रत्यक्षः। तथापि सखीस्नेहो मां पुनरुक्तवादिनीं करोति।

३. आपन्नस्य विषयवासिनो जनस्यार्तिहरेण राज्ञा भवितव्यमिति नन्वेष वो धर्मः?।

४. तेन हीयं नो सखी त्वामेवोद्दिश्य इममवस्थान्तरं भगवता मदनेनारोपिता। तदर्हत्यभ्युपपत्त्या जीवितमस्या अवलंबितुम्।

खण्डैः वलयहारादिस्थानीयैः सुरभीणि। उपचारमभ्युत्थानादिकं सत्कारम। अथोचित प्रतिपत्तिजागरूका प्रियंवदा लोकोत्तरयोरन्योन्यानुरूपयोः परकाष्ठाप्राप्तपरस्परानुरागयोः चिराभिलषितसमागमयोर्दैवादद्यहासि सङ्गतयोः तयोर्मनोरथपूरणमरण्यवगाहनायावतार रयति **वयस्येति** पुनरुक्तशब्देनानुपादेयं लक्ष्यते। परस्परानुरागे विदिते सत्यन्यत्र वक्तव्यं किमपि न। अतस्सखीस्नेहेन मयायद्विवक्षितं तदनुपादेयमेव। अतो न वक्ष्यामी-त्यर्थः। **भद्रे** इति। त्वया विवक्षितमुपादेयमेवेति भावः। विवक्षितमिति। त्वतो वक्तव्यमेवेत्यर्थः। **अस्मात्** आर्तत्राणात्। पर अन्यत्। **अभ्युपपत्तिः** अन-

राजा—भद्रे साधारणोऽयं प्रणयः सर्वथा अनुगृहीतोऽस्मि ।

शकु—(प्रियंवदां विलोक्य) हला अलं अन्तेउरविरहपज्जूसुअस्स राएसिणो उवरोहेण ।[1]

राजा—

इदमनन्यपरायणमन्यथा हृदयसन्निहिते हृदयं मम ।
यदि समर्थयसे मदिरेक्षणे मदनबाणहतोऽपि हतः पुनः ॥१६॥

अन—वअस्स! बहुवल्लहा राआणो सुणीअन्ति । जह णो पिअसही बन्धुजणसोअणिज्जा ण होइ तह णिव्वेहेहि ।[2]

राजा—भद्रे किं बहुना ।

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे ।
समुद्रवसना चोर्वी सखी च युवयोरियम् ॥ १७ ॥

उभे—णिव्वुदह्म ।[3]

---

१. हला अलमन्तःपुरविरहपर्युत्सुकस्य राजर्षेरुपरोधेन ।

२. वयस्य! बहुवल्लभा राजानश्श्रूयन्ते । यथा नौ प्रीयसखी बन्धुजनशोचनीया न भवति तथा निर्वह ।

३. निर्वृते स्वः ।

ग्रहः । **प्रणय** इति । प्रणयो याच्ञा । अत्र अभ्युपपत्त्या जीवितमवलम्बस्वेत्येवंरूप "प्रणयस्स्यात् परिचये याच्ञायां सौहृदेऽपि च" इत्यमरः । साधारणः आवयोरिति शेषः । लाघवभयेन ता मर्णाद्र **अलमिति** । अस्य पर्युत्सुकत्वमन्तःपुरविषयमेव अतोऽस्मात् प्रार्थनोपरोध एव तस्मा कृथा इत्यर्थः । तदसहमान आह **इदमिति** । अन्यत्र परायणमासङ्गोऽनुरागो यस्य तदन्यपरायणम् । तदन्यदनन्यपरायणम् अन्यथा अन्यपरायणमिति । "साकल्यासङ्गवचने पारायणपरायणे" इत्यमरः । हृदयसन्निहिते । सदा तत्रवर्त्तमाना त्वं कथं तदवस्थां न वेत्सीति भावः । कार्यज्ञा कार्यं निष्कर्षति **वयस्येति** । तव बह्व्यो वल्लभास्सन्ति तास्वेकैषा इति सामान्यदृष्टि मा कृथा इत्यर्थः । प्रत्युतेयमेव मे प्रधानदेवीत्याह **परिग्रहेति** । अत्र कुलक्रमागताय सागरान्तायामुर्व्यां इव ममास्यां बहुमान इति अस्यां जातो मे वशकर इति च व्य-

प्रियं—(सदृष्टिक्षेपम्) अणसूए जह एसो इदो तदो दिण्णदिट्ठी उस्सुओ मिअपोदओ मादरं अण्णेसदि । एहि संजोएम णम् ।

[उभे प्रस्थिते]

शकु—हला असरणह्मि । अण्णदरा वो गच्छउ ।

उभे—पुढुवीए सरणं सो तुह समीपे ।

[निष्क्रान्ते]

शकु—हं गदा एव्व ।

राजा—अलमलमावेगेन । नन्वयमाराधयिता जनस्तव समीपे वर्तते ।

किं शीतलैः क्लमविनोदिभिरार्द्रवातान्
सञ्चारयामि नलिनीदलतालवृन्तैः ।

---

१. अनसूये यथैष इतस्ततो दत्तदृष्टिरुत्सुको मृगपोतः मातरमन्विच्छति । एहि संयोजयाव एनम् ।

२. हला अशरणाऽस्मि अन्यतरा वां गच्छतु ।

३. पृथिव्याश्शरणं स तव समीपे ।

४. हं गते एव ।

…यते । स्वच्छन्दानुवृत्तिचतुरा लतामण्डपान्निर्गन्तुमुपायमाह अनसूये … संयोजयावः । मात्रेति शेषः । अत्रौत्सुक्येन इतस्ततोऽवलोकनेन च मृगपोतस्य … णमनुमीयते । यथा उत्सुक इतस्ततो दत्तदृष्टिस्तथा मातरमन्विच्छ… … शरणैवेत्याह **पृथिव्या** इति । समीपे इति । वर्तत इति शेषः । … स्थितेत्यर्थः । हं इति विषादे । लज्जासाध्वसतरलां तामवसरोचितेन प्रियभाषणेन … लयितुमारभते **अलमिति** । आवेगेन सम्भ्रमेण । "स्यादावेगोऽतिसम्भ्रम" … रः । सखीजनासान्निध्येन सम्भ्रमो मा भूदित्यर्थः । कुत इत्याह नन्विति । आराधयि… यं जन इति । अहमेव तव शुश्रूषायां मुख्याधिकारीतिभावः । समीपे वर्तते । अथ … सुः छन्दमनुवर्त्तयितुं पृच्छति **किमिति** । शीतलैः क्लमविनोदिभिः शैत्यात्सन्ताप… रैः । आर्द्रवातान् सान्द्रसमीरणान् । सञ्चारयामि सम्यक् सर्वाङ्गीण चारयामि ।

अङ्के निधाय करभोरु यथा सुखं ते
संवाहयामि चरणावुत पद्मताम्रौ ॥ १८ ॥

शकु—ण माणणीएसु अत्ताणं अवराहइस्सम् ।

[उत्थाय गन्तुमिच्छति]

राजा—सुन्दरि अपरिनिर्वाणो दिवसः । इयं च ते समवस्था।

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणा ।
कथमातपे गमिष्यसि परिबाधापेलवैरङ्गैः ॥ १९ ॥

[बलादेनां निवर्तयति]

शकु—पोरव ! रक्ख विणअं मदणप्पतत्तावि खु ण अत्तणो पहवामि ।

राजा—भीरु अलं गुरुजनभयेन । दृष्ट्वा न ते गृहीतधर्मस्तत्रभवानत्र दोषं ग्रहीष्यति कुलपतिः । अपि च ।

१. न माननीयेष्वात्मानमपराधयिष्यामि ।

२. पौरव ! रक्ष विनयं मदनप्रतप्तापि खलु नात्मनः प्रभवामि ।

नलिनीदलतालवृन्तैः । बहुत्वादुपमा । अङ्के निधायेत्यनेन संवाहनपाटवम् । करभोरु इत्यनेन ऊरुकाण्डस्पर्शौत्सुक्यं यथासुखमित्यनेन सज्जनवदिच्छानुवृत्तिचातुर्यं पद्मताम्राविव्यनेन सौकुमार्यं तेन स्पर्शसुखं च व्यज्यते । **अपराधयिष्यामि** अपराधिनं करिष्यामि । कालदेशावस्थानुचितत्वं प्रतिपादयन् गमनं निरुन्धे **सुन्दरीति**। सुन्दरीत्यनेन स्वत आतपासहिष्णुत्वं व्यज्यते । **अपरिनिर्वाणः** कठोरातपः । इयं ईदृशसन्तापशालिनी । **उत्सृज्येति** । कुसुमशयनं सन्तापहरेषु मूर्धन्यम् । नलिनीदलेन झटिति ग्लास्नुना । आतपे बलवतामपि सद्यो बलहरे । परिबाधापेलवैः मदनपीडादुर्बलैः । अङ्गैरुपलक्षिता कथं गमिष्यसि । अशक्यमेतत् । अहो तवाविमृश्यकारिता । तद्विरम गमनादिति भावः । **पौरव** । अनुचितं तवाविनयाचरणमिति भावः । विनयं रक्ष । हठान्मा स्पृश । कुत इदमाननुकूल्यमित्याह मदनेति । यदुक्तं "न स्त्री स्वातन्त्र्यमर्हती"ति । **भीरुरि**ति । अस्थाने तव भयमिति भावः । अलं गुरुभयेन । कुत इत्याह **दृष्ट्वे**ति । दृष्ट्वा विचार्य । गृहीतधर्मः अवगतधर्मरहस्यः । अत्र अस्मिन् समा-

गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः ॥ २० ॥

शकु—[1]अइ मुञ्च दाव । भूओ वि सहीजणं अणुमाणइस्सम ।

राजा—भवति मोक्ष्यामि ।

शकु—कदा ।

राजा—

अपरिक्षतकोमलस्य यावत् कुसुमस्येव नवस्य षट्पदेन ।
अधरस्य पिपासता मया ते सदयं सुन्दरि गृह्यते रसोऽस्य ॥ २१ ॥

[मुखमस्यास्समुन्नमयितुमिच्छति । शकुन्तला परिहरति नाट्येन]

नेपथ्ये—[2]चक्कवाअवहूए अमन्तेहि सहअरं उवट्ठिदा रअणी* ।

शकु (कर्णं दत्वा) [3]पोरव! असंसअं मम सरीरवुत्तन्तोवलम्भाअ अज्जा गोदमी इदो एव्व आअच्छदि । ता विडवन्तरिदो होहि ।

[राजा तथेत्यात्मानमावृत्य स्थितः]

---

१. अयि मुञ्च तावत् । भूयोऽपि सखीजनमनुमानयिष्यामि ।

२. चक्रवाकवधूके आमन्त्रयस्व सहचरं उपस्थिता रजनी ।

३. पौरव! असंशयं मम शरीरवृत्तान्तोपलम्भायार्या गौतमीत एवागच्छति । तद्विटपान्तरितो भव ।

गमे । कुत इत्याह **गान्धर्वेणे**ति । अष्टविधो हि विवाहः । यदुक्तं भारते "ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः गान्धर्वराक्षसौ चान्यौ पैशाचश्चाष्टमः स्मृतः" इति । तत्र गान्धर्वो यथा "सकामायास्सकामेन निर्मन्त्रो रहसि स्मृतः करस्पर्शस्तु गान्धर्वः" । **पितृभिश्चाभिनन्दिताः** इति । राजर्षीणां गान्धर्वस्य मुख्यत्वात् । यदुक्तं - "क्षत्रियस्य तु गान्धर्वो विवाहः श्रेष्ठ उच्यते" इति । **अपरिक्षते**ति । अपरिक्षत अनवाप्तदन्तपदः उपमया ग्रहणचातुर्यं माधुर्यसौरभे च व्यज्यन्ते । सदयमित्यनेन लोभनीयत्वम् । पिपासतेत्यनेनौत्सुक्यातिशयश्च । यावदधररसो गृह्यते । तावन्मुञ्चामीति शेषः । अथ द्वारि स्थितां साध्वीं गौतमीं दृष्ट्वा तां सख्यै निवेदयतः **चक्रवाके**ति । सखीभ्यामभिव्यञ्जितमर्थमवधार्याह **पौरवेति** । शरीरवृत्तान्तस्योपलम्भो ज्ञानम् । नायका-

* एसा चक्कवाअवहू आमन्तेदि सहअरम् । उवट्ठिदा रअणी । इति पाठान्तरम् । अयमेव हृदयङ्गमः पाठः । एषा चक्रवाकवधूरामन्त्रयते सहचरम् । उपस्थिता रजनी । इति छाया ।

[ततः प्रविशति पात्रहस्ता तापसी सख्यौ च]

सख्यौ---इदो अज्जा गोदमी।

तापसी---(शकुन्तलामुपेत्य) जादे अवि लहुसन्दावाणि दे अङ्गाणि?

शकु---अत्थि मे विसेसो।

ताप--इमिणा सन्तिदब्भोदएण णिराबाधं एव्व दे सरीरं भविस्सदि। (शिरसि शकुन्तलामभ्युक्ष्य) वच्छे! परिणदो दिअहो एहि उडजं गच्छामो।

[प्रस्थिता]

शकु—(स्वगत) हिअअ! पुढमं एव्व सुहोवणदे दे मणोरहे काअरभावं ण मुञ्चेसि। साणुसअविहत्थिदस्स कहं दे सम्पदि। (पदान्तरे स्थित्वा) लदाघरअ! सन्दावहारअ! आमन्तए तुमं भूओ वि परिहोआअ।

[दुःखेन शकुन्तला निष्क्रान्ता सहेतराभिः]

राजा—(पूर्वस्थानमुपेत्य सनिश्वासं) अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः। मया हि-

---

१. इत आर्या गौतमी।

२. जाते अपि लघु सन्तापानि ते अङ्गानि।

१. अस्ति मे विशेषः।

२. अनेन शान्तिदर्भोदकेन निराबाधं ते शरीरं भविष्यति। वत्से! परिणतो दिवसः एह्युटजं गच्छामः।

३. हृदय! प्रथममेव सुखोपनते मनोरथे कातरभावं न मुञ्चसि। सानुशयविहस्तितस्य कथं ते सम्प्रति। लतागृह! सन्तापहारक! अमन्त्रये त्वां भूयोऽपि परिभोगाय।

लब्धपरिचुम्बनाननुकूल्येन पश्चात्तापवत्याह **हृदयेति**। मनोरथे तद्विषये दयिते। अनुशयः पश्चात्तापः। सानुशयमत एव विहस्तितं च सानुशयविहस्तितम्। **कथन्ते**। कातरभावमोक्ष इत्यर्थादायाति। लतागृहापदेशेन प्रियतममापृच्छति **लतागृहेति**।

मुहुरंगुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तत् ॥

क्व नु खलु सम्प्रति गच्छामि । अथवा इहैव प्रियापरिभुक्तमुक्ते लतावलये मुहूर्तं स्थास्यामि । (सर्वतो विलोक्य)

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
क्रान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः ।
हस्तात् भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाच्छक्नोमि शून्यादपि ॥ २१ ॥

(आकाशे)

राजन्! —

सायन्तने सवनकर्मणि सम्प्रवृत्ते
वेदिं हुताशनवतीं परितः प्रवृत्ताः ।
छायाश्चरन्ति बहुधा भयमादधानाः
सन्ध्यापयोदकपिशाः पिशिताशनानां ॥ २२ ॥

राजा— अयमयमागच्छामि ।

[इति निष्क्रान्तः]

तृतीयोऽङ्कः ।

मुहुरिति । प्रतिषेधाक्षरैः मा मा अलमित्यादिभिः विक्लवेन वैक्लव्येन च अभिरामं दर्शनीयम् । कथमपि कृच्छ्रात् । **तस्या** इति । शरीरेण सन्तापातिशयात् मुहुर्मुहुर्लुठता लुलिता पर्याकुलीकृता । शून्यात्प्रियतमारहितात् । **सायन्तन** इति । छाया प्रतिबिम्बानि । तत् त्वरितमागम्यतामिति भावः ।

इत्यभिरामविरचितेऽभिज्ञानशाकुन्तलदिङ्मात्रदर्शने

तृतीयोऽङ्कः ।

———

[ततः प्रविशतः कुसुमापचयमभिनयन्त्यौ सख्यौ]

एका—हला पिअंवदे जइ वि गन्धव्वेण विवाहविहिणा णिव्वुत्तकल्लाणा सउन्दला अणुरूवभत्तुगामिणी संवुत्तत्ति णिव्वुदं मे हिअअम्। तह वि एत्तिअं चिन्तणिज्जम्।

प्रियं—अणसूए कहं विअ।

अन—अज्ज सो राएसी इट्ठिं परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं उपविसिअ अन्तेउरसमाअदो इदोगअं सुमरेदि वा ण वेत्ति।

प्रियं—वीसत्था होहि। ण तारिसा गुणविरोहिणो आकिदिविसेसा होन्ति। किंदु तादो दाणीं इमं वुत्तन्तं सुणिअ ण जाणे किं पडिवज्जिस्सदित्ति।

१. हला प्रियंवदे यद्यपि गान्धर्वेण विवाहविधिना निर्वृत्तकल्याणा शकुन्तला अनुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयं। तथाप्येतावच्चिन्तनीयम्।

२. अनसूये कथमिव?।

३. अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसर्जितः आत्मनो नगरमुपविश्यान्तःपुरसमागत इतोगतं स्मरति वा न वेति।

४. विस्रब्धा भव। न तादृशा गुणविरोधिन आकृतिविशेषा भवन्ति। किन्तु तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यतीति।

इत्येवं नायकयोः प्रदर्श्य गान्धर्वविवहनोपायम् अधुना तस्यैव पुनर्निर्वाहादीनि सूच्यन्ते **हले**त्यादिना। निर्वृत्त कृतकृत्यम्। **चिन्तनीयम्**। अस्तीति शेषः। **इतोगतं** शकुन्तलाविवाहादिकम्। न विस्मरतीत्याह **विस्रब्धे**ति। कुत इत्याह नेति। आकृतिविशेषा विशिष्टाकृतयः। यदुक्तं—"यत्राकृतिस्तत्र गुणा वसन्ती"ति। तस्मादेतन्न चिन्तनीयमिति भावः। अन्यच्चिन्तनीयमस्तीत्याह। **किन्त्वि**ति। अनुमत-

अन—[1]जह अहं पक्खोमि तह तादस्स अणुमदम् ।

प्रियं—[2]कहं विअ

अन—[3]गुणवदे कण्णआ पडिवादणिज्जत्ति अअं दाव तादस्स पुढमो सङ्कप्पो । तं जइ देव्वं एव्व सम्पादेइ णं अप्पआसेण किदत्थो गुरुअणो ।

प्रियं—[4]एव्वं एदम् । (पुष्पभाजनं विलोक्य) सहि अवइदाइ बलिकम्मपज्जत्ताइ कुसुमाइ ।

अन—[5]णं सउन्दलाए सोहग्गदेवदा अच्चणिज्जा ।

प्रियं—[6]जुज्जइ ।

[तदेवकर्माराभते]

नेपथ्ये—अयमहं भोः ।

अन—[7]अदिहीणं विअ णिवेदिअम् ।

प्रियं—[8]णं उडजसण्णिहिदा सउन्दला । अज्ज उण हिअएण असण्णिहिदा ।

१. यथाहं पश्यामि तथा तातस्यानुमतम् ।

२. कथमिव ।

३. गुणवते कन्यका प्रतिपादनीयेति अयन्तावत्तातस्य प्रथमस्सङ्कल्पः । तद्यदि दैवमेव सम्पादयति नन्वप्रयासेन कृतार्थो गुरुजनः ।

४. एवमेतत् । सखि अपचितानि बलिकर्म्मपर्याप्तानि कुसुमानि ।

५. ननु शकुन्तलायास्सौभाग्यदेवतार्चनीया ।

६. युज्यते

७. अतिथीनामिव निवेदितम् ।

८. ननूटजसन्निहिता शकुन्तला । अद्य पुनर्हृदयेनासन्निहिता ।

मिति । विचार्यमाणे तस्यानुमतमिति मे प्रतिभातीति भावः । **कुसुमानीति** । तत् गच्छाव इति भावः । **अर्च्चनीया** । तदर्थमपिकुसुमान्यपचेयानीत्यर्थः । सौभाग्यदेवता इन्द्राणी । **उटजसन्निहिता शकुन्तलेति** । शून्ये खल्वेवं निवेदनीयमित्यर्थः । असन्निहितप्रायेत्याह **अद्य पुनरिति** । भर्तृगतहृदया किमपि न जानातीत्यर्थः ।

अन—होदु अलं एत्तिएहिं कुसुमेहिम् ।

[प्रस्थिते]

पुनर्नेपथ्ये—आः अतिथिपरिभाविनि !

विचिन्तयन्तीयमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव ॥

प्रियं—हद्धि । तं एव्व संवुत्तम् । कस्सिं वि पूआरिहे अवरद्धा सउन्दला सुण्णहिअआ । (विलोक्य) ण क्खु जस्सिं कस्सिं वि । एसो दुव्वासो सुलहकोवो महेसी तह सविअ चडुलुप्फुल्लदुव्वाराए गईए सण्णिवुत्तो । को अण्णो हुदवहादो दहिदुं पहविस्सदि ।

अन—गच्छ पादेसु पणमिअ णिवत्तेहि णम् । जाव अग्घोदअं उवकप्पेमि ।

प्रियं—तह

[निष्क्रान्ता]

अन—(पदान्तरं स्खलितं निरूप्य) अह्मो आवेअक्खलिदाए पब्भट्ठं मे अग्गहत्थादो पुप्फभाअणम् ।

[पुष्पोच्चयं रूपयति]

---

१. भवत्वलमेतावद्भिः कुसुमैः ।

२. हा धिक् । तदेव संवृत्तम् । कस्मिन्नपि पूजार्हे अपराद्धा शकुन्तला शून्यहृदया । न खलु यस्मिन् कस्मिन्नपि । एष दुर्वासास्सुलभकोपो महर्षिस्तथा शप्त्वा चटुलोत्फुल्लदुर्वारया गत्या सन्निवृत्तः । कोऽन्यो हुतवहात् दग्धुं प्रभविष्यति ।

३. गच्छ । पादयोः प्रणम्य निवर्तयैनम् । यावदर्घोदकमुपकल्पयामि ।

४. तथा ।

५. अह्मो आवेगस्खलितायाः प्रभ्रष्टं मे अग्रहस्तात् पुष्पभाजनम् ।

अलमिति । तत्तत्र गच्छाव इत्यर्थः । आः इति क्रोधानुभावः । **अतिथी**ति । परिभवोऽनादरः । **विचिन्तयन्ती**ति हेतौ शतृ । तपोनिधिं न यं कञ्चनाभ्यागतम् । बोधितः स्मारितः । **तदेव** । यद्वितर्कितं तदेव । **चटुला** चपला । उत्फुल्ला उद्धता । अह्मो

(प्रविश्य)

प्रियंवदा---सहि पकिदिवक्को कस्स सो अणुणअं पडिगह्णदि। किञ्चि उण साणुक्कोसो मए किदो।

अनसूया--तस्सिं बहुदरं तं वि। कहेहि।

प्रियं---जदा अणुणीदो णिव्वत्तिदुं ण इच्छइ तदा विण्णाविदो मए भअवं पुढमभत्तिअं पेक्खिअ अविण्णादपरमत्थस्स दुहिदुजणस्स मरिसिदव्वो एक्को अवराहोत्ति !

अन---तदो तदो

प्रियं---तदो मे वअणं अण्णहा भविदुं णारुहदि। किंदु अहिण्णाणाहरणदंसणेण सावो णिवत्तिस्सदित्ति मन्तअन्तो एव्व अन्तालिहिदो।

---

१. सखि प्रकृतिवक्रः कस्य सोऽनुनयं प्रतिगृह्णाति। किञ्चित् पुनस्सानुक्रोशो मया कृतः।

२. तस्मिन् बहुतरं तदपि। कथय।

३. यदानुनीतो निवर्त्तितुं नेच्छति तदा विज्ञापितो मया। भगवन् प्रथमभक्तिं प्रेक्ष्याविज्ञातपरमार्थस्य दुहितृजनस्य मर्षितव्य एकोऽपराध इति।

४. ततस्ततः।

५. ततो मे वचनं अन्यथा भवितुं नार्हति। किन्तु अभिज्ञानाभरणदर्शनेन शापो निवर्त्तिष्यत इति मन्त्रयन् एवान्तर्हितः।

इति प्रकृतेऽव्ययम्। इह विषादद्योतकम्। **प्रकृतिवक्रः** कुटिलहृदयः। **कस्येति**। ममानुनयं न प्रत्यग्रहीदित्यर्थः। अनुक्रोशो दया। विज्ञापनप्रकारमाह **भगव**न्निति। अत्र पूर्वोपकारीति, अज्ञानादिति, बालेयमिति एकोऽपराध इति च क्षन्तव्यत्वं व्यज्यते। **ततस्ततः**। त्वयैवं विज्ञापिते किं कृतं तत्र भवतेत्यर्थः। **अन्तर्हितः**। न मे पुनर्वचनावकाशोऽभूदित्यर्थः। अलमेतावतेत्याह **शक्य**मिति। कुत इत्याह

अन--^१^सकं दाणीं अस्ससिदुं । अत्थि देण राएसिणा सम्पत्थिदेण सुणामहेअङ्किदं अंगुलीअअं सुमरणिज्जं ति सअं पिणद्धम् । तस्सिं साहीणो उपायो भविस्सदि ।

प्रियं---^२^एहि देवकज्जं णिव्वत्तेम ।

[परिक्रामतः]

प्रियं--(विलोक्य) ^३^अणसूए पेक्ख दाव वामहत्थोवणिहिदवअणं आलिहिदं विअ सउन्दलम् । भत्तुगामिणीए चिन्ताए अत्ताणं वि एसा ण विभावेदि । किं उण आअन्तुअम् ।

अन--^४^पिअंवदे दुवेणं एव्व णो मुहे एस वुत्तन्तो चिट्ठउ । रक्खणीआ खु पकिदिपेलवा पिअसही ।

---

१. शक्यमिदानीमाश्वसितुम् । अस्ति तेन राजर्षिणा सम्प्रस्थितेन स्वनामधेयाङ्कितं अंगुलीयकं स्मरणीयमिति स्वयं पिनद्धम् । तस्मिन् स्वाधीन उपायो भविष्यति ।

२. एहि देवकार्यं निर्वर्तयावः ।

३. अनसूये पश्य तावद्वामहस्तोपनिहितवदनामालिखितामिव शकुन्तलाम् । भर्तृगामिन्या चिन्तयात्मानमप्येषा न विभावयति । किं पुनरागन्तुकम् ।

४. प्रियंवदे द्वयोरेव नो मुखे एष वृत्तान्तस्तिष्ठतु । रक्षणीया प्रकृतिपेलवा प्रियसखी

शक्यमिति । कुत इत्याह **अस्ती**ति । सम्प्रस्थितेन । आदिकर्मणि क्तः । पिनद्धं अंगुलौ न्यस्तं । तस्मिन्निति निमित्ते सप्तमी । **तिष्ठतु** । शकुन्तलायै न निवेदयितव्यम् । कुत इत्याह रक्षणीयेति । यदि सा श्रोष्यति तर्हि सद्यो विपद्येतेति भावः । **उष्णोदकेने**ति । उष्णोदकेन नवमालिकासेचनमिव तस्यै शापनिवेदनम् । अतो न निवे-

प्रियं--को दाणीं उण्होदएण णोमालिअं सिञ्चदि ।

[निष्क्रान्ते]

प्रवेशकः ।

[ततः प्रविशति सुप्तोत्थितश्शिष्यः]

शिष्यः--वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन काश्यपेन। तत्प्रकाशे निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति। (परिक्रम्यावलोक्य च) हन्त प्रभातम्। तथाहि--

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतारुणपुरस्सर एकतोऽर्कः ।

---

१. क इदानीमुष्णोदकेन नवमालिकां सिञ्चति ।

दयामीति भावः । **प्रवेशकः** । यदुक्तं--'तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः प्रवेशोऽङ्कद्वयस्यान्तश्शेषार्थस्योपसूचकः' इति ।

गान्धर्वं परिणयनं परिणेतुर्गमनमात्मनगराय मुद्रार्पणं प्रयाणे शापो दुर्वाससस्तस्याः । तस्य तु मोक्षोपायस्तयोरसंवेदनं शकुन्तलया एतानि सूचितानि ह्यष्टान् पूर्वप्रवेशकेनेह । अधुना कण्वस्य मुनेरागमनं श्रवणमात्मकन्यायाः परिणयनादेस्तस्या भर्तृगृहप्रेषणारम्भः । इत्येतान्यङ्कमुखगतेन शिष्येण सखीभ्यां च सूच्यन्ते । **तत** इति । वेलायाः कालस्य । उपलक्षणार्थम् उपलक्ष्यज्ञानाय । प्रवसत्यस्मिन्निति प्रवासो देशान्तरम् । तस्मात् प्रतिनिवृत्तस्य । प्रकाशे तर्वाद्यनावृते देशे । निर्गतः । अवलोकयामि अवलोक्यावगच्छामि । अवशिष्टमवशेषः । हन्तेति हर्षे । "हन्त हर्षविषादयो"रिति सिंहः । प्रभातम् । प्रवर्तत इति शेषः । उक्तमुपपादयति **तथाही**त्यादिना । एकतः प्राच्यां दिशि । अर्कः आविष्कृतारुणपुरस्सरः । भवतीति शेषः । आविष्कृतः प्रकाशितः अरुणनामा पुरस्सरस्सारथिर्येन स आविष्कृतारुणपुरस्सरः । अत्रास्तशिखरयानारुणाविष्करणाभ्यामस्तमयोदयारम्भ उक्तः । व्यसनोदयाभ्यामिति तयोरनुदेशः । आत्मदशान्तरेषु स्वावस्थाविशेषेषु आपत्सम्पल्लक्षणेषु । नियम्यत इवेति । एवं भगवतोः प्रपञ्चप्रवर्तकयोस्सोमसूर्ययोरप्येकस्यापद्यन्यस्य सम्पत एकस्य सम्पद्यन्यस्यापत् ।

तेजोद्वयस्य युगवद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु ॥ २ ॥

अपिच--

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुस्सहानि ॥ ३ ॥

(प्रविश्यापटाक्षेपेणानसूया)

एव्वं च णाम । विसअपरम्मुहस्स वि जणस्स एदं ण विदिदं ।तहवि तेण रण्णा सउन्तलाअं अणज्जं आअरिदम् ।

शिष्यः—यावदुपस्थितां होमवेलां गुरवे निवेदयामि ।

[निष्क्रान्तश्शिष्यः]

---

१. एवं च नाम । विषयपराङ्मुखस्यापि जनस्यैतन्नाविदितम् । तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितं ।

अतः पर्यायेण प्रवर्तमानयोरापत्सम्पदोर्विषादहर्षाभ्यां वैवश्यं मा भूदिति नियम्यत इवेत्यर्थः । यदुक्तम्—"आत्मानं शोकहर्षाभ्यां शत्रुभ्यामिव नार्पयेत्" इति । **अन्तर्हित** इति । सेत्यनुभूतार्थविषयः । संस्मरणीयशोभा । पूर्वानुभूतत्वात्तदानीमविद्यमानत्वाच्च । अर्थान्तरन्यासः । तत्समर्थ्यावाक्यगतासमासोक्तिश्च । कुमुद्वतीति लिङ्गविशेष निर्देशगर्भेण कार्योपनिबन्धनोत्थापितया समासोक्त्या समारोऽपितनायिकानायकव्यवहारयोः कुमुद्वतीशशिनोः वृत्तान्तो विशेषरूपोऽत्राबलाशब्दस्येष्टशब्दस्य च सामान्यवाचित्वात सामान्येनसमर्थ्यते । अत्रोपक्षेप्यश्शकुन्तलावृत्तान्तो ध्वन्यते । सुप्तोत्थितानसूया राज्ञ उपेक्षां शकुन्तलाविषयाम् अनुचिन्त्यदूयमाना ब्रवीत्यथ**ैवं च नाम**ेति । अत्रैवञ्चनामेति इष्टप्रवासेत्यादिवाक्यार्थस्यानुवादरूपतया प्रतीयते । नाट्यधर्मोयमनसूयाप्रवेशदानार्थः । एवं च नामेत्यव्ययसमुदायोनुवादद्योतकः । यद्यपि विषयपराङ्मुख्यहं विषयिजनवृत्त न जानामितथाप्येतावज्जानामीत्यर्थः । किं तदित्याह तेनेत्यादि । अनार्यं निन्द्यम् । प्रकृ-

अन—पडिबुद्धावि किं करिस्सं । ण खु मे उइदेसुवि करणिज्जेसु हत्थपादा पवुत्तन्ति । सकामो दाणीं कामो होदु । जेण असच्चसन्ध जणे-ण्णणहिअआ सखी पदं कारिदा । अहव दुव्वाससो कोपो एसो विआ-दि । अण्णहा कहं सो राएसी तारिसं मन्तिअ एत्तिअस्स कालस्स लेह-मत्तंवि ण विसज्जेदि । ता इदो अहिण्णाणं अङ्गुलीअअं से विसज्जेमि । दुक्खसीले तवस्सिजणे कोअब्भत्थीअदि । ण अ सहीगामीदोसोत्ति ववसि-दावि ण पारेमि पवासपडिणिवुत्तस्स तादकस्सवस्स दुस्सन्दपरिणीदं सउ-न्तलं आवण्णसत्तं णिवेदेदुं । इत्थङ्गए अह्मेहिं किण्णु खु करणिज्जम् ।

१. प्रतिबुद्धापि किं करिष्यामि । न खलु मे उचितेष्वपि करणीयेषु हस्तपादाः प्रवर्तन्ते । सकाम इदानीं कामो भवतु । येनासत्य सन्धे जनेऽनन्यहृदया सखी पदं कारिता । अथवा दुर्वाससः कोप एष विका-रयति । अन्यथा कथं स राजर्षिस्तादृशं मन्त्रयित्वा एतावतः कालस्य लेखमात्रमपि न विसृजति । तदितोऽभिज्ञानं अंगुलीयकमस्मै विसृजामि । दुःखशीले तपस्विजने कोऽभ्यर्थ्यते । न सखीगामीदोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्ताय तातकाश्यपाय दुष्यन्तपरिणीतां शकुन्तला-मापन्नसत्वां निवेदयितुम् । इत्थङ्गतेऽस्माभिः किन्नु खलु करणीयम् ।

तमनुसन्धायाह **याव**दिति । **किं करिष्यामि** । सुप्तेवाकिमपि कर्तुं न पारयामीत्यर्थः । कुत इत्याह उचितेष्विति । उचितेषु अभ्यस्तेषु । कामो भवतु । वल्लभारमणयोर्वि-योगो हि कामस्याभिमतः । कारिता अवतारिता । अथवा नायं तस्य दोष इत्यर्थः । किं तर्हीत्याह दुर्वास स इति । कोपेनशापो लक्ष्यते । शापस्यायं विकार इत्यर्थः । उक्तं दृढयति अन्यथेति । तादृशं यच्चक्ष्यति एकैकमित्यादि । शापमोक्षोपायमाह तदिति । अभिजानात्यनेनेत्यभिज्ञानम् । तस्य कश्चित्प्रेष्यो नेत्याह दुःखशील इति । विरसस्वभावः । कोऽपिनाभ्यर्थनीय इत्यर्थः । अतस्तातस्यावस्थानिवेदनमत्रकर्तव्य तस्यापि नायमवसर इत्याह न चेति । दोषः स्वातन्त्र्यलक्षणः । यदुक्तं "पितारक्षति कौमारे भर्तारक्षति यौवने पुत्रस्तु स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति" इति । न च सखीगामी राजर्षिप्रतियोगिकत्वात् । आपन्नसत्वां गर्भिणीम् । "अपन्नसत्वा स्यात् गुर्वि-ण्यन्तर्वत्नी च गर्भिणी"त्यमरः । किन्नु खलु करणीयम् । प्रतिपत्तिमूढास्मीत्यर्थः ।

(प्रविश्य)

प्रियंवदा तुवरदु सही सउन्दलाए पत्थाणकोदुअं णिवत्तेदुम् ।

अन---सहि कहेहि कहं एदम् ।

प्रियं--सुणाहिदाणीम् । सुहसइदपुच्छिआ सउन्दलासआसं गदह्मि ।

अन--तदो ।

प्रियं—जाव णं लज्जावणअवअणं सउन्दलं परिस्सजिअ तादकस्सवेण एव्वं अहिणन्दिअम् । दिठ्ठिआ धूमावरुद्धदिठ्ठिणो यजमाणस्स पावअम्मि एव्व आहुदी पडिआ । वच्छे सुसिस्सपरिदिण्णा विअ विज्जा असोअणिज्जासि मे संवुत्ता । अज्ज एव्व इसिपरिग्गहीदं तुमं भत्तुणोसआसं विसज्जेमित्ति

अन---अह केण आचक्खिदो तादकस्सवस्स अअं वुत्तन्तो ।

---

१. त्वरतां सखी शकुन्तलायाः प्रस्तानकौतुकं निर्व्वर्तयितुम् ।

२. सखि कथय कथमेतत् ।

३. शृणिष्वेदानीम् । सुखशयितपृच्छिका शकुन्तलासकाशं गतास्मि ।

४. ततः ।

५. यावदेनां लज्जावनतवदनां शकुन्तलां परिष्वज्य तातकाश्यपेनैवमभिनन्दितम् । दिष्ट्या धूमावरुद्धदृष्टेर्यजमानस्य पावक एवाहुतिः पतिता । वत्से सुशिष्यपरिदत्ता विद्येवाशोचनीयासि मे संवृत्ता । अद्यैव ऋषिपरिगृहीतां त्वां भर्तुस्सकाशं विसृजामिति ।

६. अथ केनाख्यातस्तातकाश्यपस्यायं वृत्तान्तः ।

कौतुकं मङ्गलम् । "अथ कौतुकं कौतूहलं चे"ति भोजः । प्रस्थानसम्भावनां पृच्छति **कथ**मिति । अभिनन्दनप्रकारम् । अदत्तापि मया मत्सुता मया सङ्कल्पितमेव वरङ्गतव-

प्रियं—[1]अग्गिसरणं पविट्टस्स सरीरं विणा छन्दोवदीए वाआए ।

अन—(सस्मितं) [2]कहेहि ।

प्रियं—(संस्कृतमाश्रित्य)

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥ ४ ॥

अन—(प्रियंवदामाश्लिष्य) [3]सहि पिअं मे । किंदु अज्ज एव्व सउन्दला णीआदेत्ति उक्कण्ठासाहारणं दाणीं परितोसअं अणुभवेमि ।

प्रियं—[4]सहि वअं दाव उक्कण्ठं विणोदइस्सामो । सा दाव तवस्सिणी णिव्वुदा होदु ।

अन—[5]सहि तेण हि एदस्सिं चूदसाहावलम्बिदे णालिएरसमुग्गए तण्णिमित्तं एव्व कालन्तरक्खमा णिक्खित्ता मए केसरमालिआ । तं तुमं हत्तसण्णिहिदं करेहि । जाव अहं वि से गोरोअणं तित्थमिस्सिअं दुव्वाकिसलआणि मङ्गलसमालम्भणाणि विरएमि ।

---

१. अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोवत्या वाचा ।

२. कथय ।

३. सखि प्रियं मे । किन्तु अद्यैव शकुन्तला नीयत इत्युत्कण्ठासाधारणं इदानीं परितोषमनुभवामि ।

४. सखि आवां तावदुत्कण्ठां विनोदयिष्यावः । सा तावत्तपस्विनी निर्वृता भवतु ।

५. सखि तेन हि एतस्मिन् चूतशाखावलम्बिते नालिकेरसमुद्गके तन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केसरमालिका । तां त्वं हस्तसन्निहितां कुरु । यावदहमपि अस्यै गोरोचनां तीर्थमिश्रितां दूर्वाकिसलयानि मङ्गलसमालम्भनानि विरचयामि ।

तात्यप्रस्तुतसदृशान्तरेणाह दिष्ट्येति । सकाशमिति । प्रतीत्यर्थात् । **शरणं** गृहम् । छन्दः वृत्तम् । वाचा अर्थादशरीरिण्या । वाचस्स्वरूपमाह **दुष्यन्तेने**ति । अग्निगर्भा शमीति प्रसिद्धिः । यथा 'शमीमिवाभ्यन्तरलीनपावका'मिति । उत्कण्ठासाधारणमुत्कण्ठास्वीकृतेकांशम । तपस्विनी दीन "तपस्वी दीनतापसयो"रिति वैजयन्ती । नालिकेरसमुद्गके

प्रियं तह कीरदु।

[निष्क्रान्ता अनसूया]

[प्रियंवदा नाट्येन सुमनो गृह्णाति]

नैपथ्ये—गौतमि! आदिश्यन्तां शाङ्गरवमिश्राश्शकुन्तलानुयानाय।

प्रियं—(कर्णं दत्वा) अणसूए तुवरदु एदे खु हत्थिणउरगामिणो इसओ सद्दाविअन्ति।

(प्रविश्य समालम्भनहस्ता अनसूया)

सहि एहि।

[परिक्रामतः]

प्रियं—(विलोक्य) एसा सुज्जोदए एव्व सिहामज्जिदा पडिच्छिदणीवारसोत्थिवाअणिआहिं तावसीहिं अभिणन्दिज्जमाणा सउन्दला चिट्ठइ। उवसप्पाम णम्।

[उपसर्पतः]

[ततः प्रविशति आसनस्था यथोद्दिष्टपरिवारा शकुन्तला]

तापसीनामन्यतमा—(शकुन्तलाम्प्रति) जादे! भत्तुबहुमाणसूअअं महादेवीसद्दं लहेहि।

---

१. तथा क्रियताम्।

२. अनसूये त्वर्यताम्। एते खलु हस्तिनपुरगामिन ऋषयश्शब्दाप्यन्ते।

३. सखि एहि।

४. एषा सूर्योदय एव शिखामग्ना प्रतीष्टनीवारस्वस्तिवाचनिकाभिस्तापसीभिरभिनन्द्यमाना शकुन्तला तिष्ठति। उपसर्पाव एनाम्।

५. जाते! भर्तृबहुमानसूचकं महादेवीशब्दं लभस्व।

नालिकेरकपालविरचिते सम्पुटके। "समुद्गकस्सम्पुटकः" इत्यमरः। तन्निमित्तं शकुन्तलायाः प्रसाधनार्थम्। कालान्तरक्षमा बकुलमाला हि पर्युषितापि परिमलं न मुञ्चति। समालम्भनानि मण्डनानि। **शाङ्गरवमिश्राः** शाङ्गरवसहिताः ऋषयः। **शिखामग्ना**

द्वितीया--वीरप्पसविणी होहि ।

तृतीया--जादे भत्तुणो बहुमदा होहि ।

[आशिषो दत्वा गौतमीवर्जं निष्क्रान्ताः]

सख्यौ--(उपसृत्य) सहि सुमङ्गलं दे होदु ।

शकु--साअदं मे सहीणम् । इदो णिसीदह ।

उभे--(मङ्गलपात्राण्यादायोपविश्य) हला सउन्दले सज्जा होहि । जाव दे वअं मङ्गलसमालम्भणाणि विरएम ।

शकु--उइदं वि बहुमन्दव्वं दाणीम् । इदो परं दुल्लहं मे पिअसहीमण्डणं भविस्सदि ।

[इति बाष्पं विसृजति]

उभे--सहि! ण हि दे उइदं मङ्गलकाले रोइदुम् ।

[अश्रूणि परिमृज्य नाट्येन प्रसाधयतः]

प्रियं--आभरणोइदं रूपं अस्समसुलहेहिं पसाहणेहिं विप्पअरीयदि ।

---

१. वीरप्रसविनी भव ।

२. जाते! भर्तुर्बहुमता भव ।

७. सखि! सुमङ्गलं ते भवतु ।

८. स्वागतं मे सख्योः । इतो निषीदतम् ।

९. हला शकुन्तले सज्जा भव । यावत्ते आवां मङ्गलसमालम्भनानि विरचयावः ।

६. उचितमपि बहुमन्तव्यमिदानीम् । इतःपरं दुर्लभं मे प्रियसखीमण्डनं भविष्यति ।

७. सखि! न हि ते उचितं मङ्गलकाले रोदितुम् ।

८. आभरणोचितं रूपं आश्रमसुलभैः प्रसाधनैः विप्राक्रियते ।

गशिरस्कं स्नाता । प्रतीष्ठा प्रतिगृहीता । **उचितं** परिचितम् । कुत इत्याह ृत इति । **प्रसाधनैः** अलङ्कारैः । विप्राक्रियते असाधूक्रियते । जातं समूहः ।

[प्रविश्योपायनहस्तावृषिकुमारकौ]

इदमलङ्कारजातमलंक्रियतामत्रभवती।

[सर्वाः विलोक्य विस्मिताः]

गौतमी—वच्छ णारअ! कुदो एदं लद्धम्।

प्रथमः—तातकाश्यपप्रभावात्।

गौतमी—किं माणसी सिट्ठी।

द्वितीयः—न खलु। श्रूयतां—तत्रभवता वयमाज्ञप्ताश्शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्युपहरतेति। तत इदानीम्—

क्षौमं केनचिदिन्दुपाण्डु तरुणा मङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुभगो लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैश्शाखाग्रभागोत्थितैः
दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः॥ ५॥

प्रियं—(शकुन्तलां विलोक्य) हला इमाए अब्भुववत्तीए सूइदा दे भत्तुणो गेहे अणुहोदव्वा राअलच्छी।

[शकुन्तला लज्जां रूपयति]

प्रथमः—गौतम! एहि अभिषेकावतीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः।

---

१. वत्स नारद! कुत एतल्लब्धम्।

२. किं मानसी सृष्टिः।

३. हला अनयाभ्युपपत्त्या सूचिता ते भर्तुर्गृहेऽनुभवितव्या राजलक्ष्मीः।

कुत एतत्। उत्पन्नमिति शेषः। उत्पत्तिप्रकारमाह **श्रूयता**मिति। तत इदानीमिति। अस्मासु कुसुमोच्चयोद्युक्तेषु सत्स्वित्यर्थः। **क्षौम**मिति। मङ्गल्यशब्दो मङ्गलपर्यायः। यथा "अमङ्गल्यं शील तव भवतु नामे"ति। निष्ठ्यूतः प्रकाशितः। चरणयोरुपभोगाय सुभगः उचितः। तत्किसलयोद्भेदप्रतिद्वन्द्विभिः तेषामुद्भिन्नैः किसलयैरिवेत्यर्थः। उपमोपक्रमोत्प्रेक्षैषा। अभ्युपपत्तिरनुग्रहः। **अभिषेकावतीर्णाय**। जलाशयमित्यर्थात्।

द्वितीयः---तथा।

(निष्क्रान्ते)

अन---अणुवजुत्तभूसणो अअं जणो चित्तकम्मपरिअएण दे अङ्गेसु आहरणविणिओअं करेदि।[1]

शकु---जाणे वो णेउणम्।[2]

[उभे नाट्येनालंकुरुतः]

[ततः प्रविशति स्नातोत्तीर्णः काश्यपः]

काश्य---

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥ ६॥

[परिक्रामति]

सख्यौ---हला सउन्दले अवसिदमण्डणासि। परिहेहि सम्पदं पवित्तं खोमजुअलम्।[3]

---

१. अनुपयुक्तभूषणोऽयं जनः चित्रकर्मपरिचयेन ते अङ्गेष्वाभरणविनियोगं करोति।

२. जाने युवयोर्नैपुणम्।

३. हला शकुन्तले अवसितमण्डनासि। परिधेहि साम्प्रतं पवित्रं क्षौमयुगलम्।

चित्रकर्मपरिचयेन देवालयेष्वालेख्यस्त्रीदर्शनात्। आश्रमे देवतायतनानि सन्ति "देवतायतनानां च पूजाः प्रेक्ष्यकृतद्विजैः। ब्रह्मलोकस्थमात्मानं मेने स नृपसत्तम." इति आश्रमवर्णनोक्तेः। अथ कृत्वा स्नानविधिं प्रस्थापयितुं शकुन्तलां गच्छन् तदधिष्ठितमभिगृहं सोत्कण्ठः काश्यपः प्राह **यास्यती**ति। इतिर्हेतौ। उत्कण्ठया वियोगखेदेन। कण्ठः स्तम्भितबाष्पवृत्तिकलुषः। कण्ठः स्वरः "कण्ठश्शब्देन्तिकेगले" इति भोजः। स्तम्भितबाष्पवृत्त्या कलुषः अस्पष्टः। गद्गद इति यावत्। चिन्तया जडं अलब्धलक्षम्। मम तावत् ममापि। कथन्नु पीड्यन्ते सुतरां पीड्यन्त इत्यर्थः। गृहिणः गृहस्थाः। अत्र

[शकुन्तला उत्थाय परिक्रामति]

गौत—जादे[1] एस दे आणन्दपरिवाहिणा चक्खुणा परिस्सजन्तो विअ गुरू उवट्ठिओ। आआरं दाव पडिपज्ज।

शकु—(सव्रीलं) तादं[2] वन्दामि।

काश्य—वत्से!।

यथातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ ७॥

गौत—भअवं[3] वरो खु से एसो ण आसी।

काश्य—वत्से इतस्सद्योहुतानग्नीन् प्रदक्षिणीकुरुष्व।

[सर्वे परिक्रामन्ति]

काश्य—

अमी वेदिं परितः क्लृप्तधिष्ण्यास्समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पालयन्तु ॥ ८॥

प्रतिष्ठस्वेदानीं (सदृष्टिक्षेपं) क ते शार्ङ्गरवमिश्राः।

(प्रविश्य शिष्याः)

भगवन् इमे स्मः।

काश्य—शार्ङ्गरव भगिन्यास्ते मार्गमादेशय।

शार्ङ्ग—इत इतो भवती।

---

१. पुत्रि! एष ते आनन्दपरिवाहिना चक्षुषा परिष्वजन्निव गुरुरुपस्थितः। आचारं तावत् प्रतिपद्यस्व।

२. तात वन्दे।

३. भगवन् वरः खल्वेषः न आशीः।

प्राकरणिकान्मुनिवृत्तान्तादप्राकरणिको गृहस्थवृत्तान्तोऽर्थादापततीत्यर्थापत्तिरलङ्कारः। "दण्डापूपिकयार्थान्तरापतनमर्थापत्ति"रिति। आशिषं प्रयुङ्क्ते **ययाते**रिति। **न आशी**रिति। अभीष्टस्य प्रार्थना ह्याशीः। तस्य विधिर्वरः। एतदेव भविष्यतीति भावः। **सद्यः** साम्प्रतम्। हुतान् ज्वलतः। **अमी** इति। वेदिं षष्ठ्यर्थे द्वितीया।

[परिक्रामन्ति]

काश्य--हंहो सन्निहितदेवतास्तपोवनतरवः !

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ ९ ॥

(कोकिलरुतं सूचयित्वा)

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतङ्कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥ १० ॥

(आकाशे)

रम्यान्तरः कमलिनीहरितैस्सरोभिः
छायाद्रुमैर्नियमितार्कमरीचितापः ।
भूयात् कुशेशयरजोमृदुरेणुरस्या-
श्शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ ११ ॥

[सर्वे सविस्मयमाकर्णयन्ति]

गौत--जादे ! णादिजणसिणिद्धाहिं अणुण्णादगमणासि तवोवणदेवदाहिं । पणम भअवदीणम् ।

---

१. पुत्रि ज्ञातिजनस्निग्धाभिरनुमतगमनासि तपोवनदेवताभिः । प्रणमस्व भगवतीभ्यः ।

धिष्ण्यं स्थानम् । **हंहो** इति हे इत्यस्यार्थे । **पातु**मिति । तरूणां कुसुमप्रसूतेः प्रत्येकमृतुनियमादाद्यन्तसत्त्वम् । सेयं या युष्मास्वेवं पुत्रवात्सल्यवर्ता तस्यै गमनानुज्ञा क्रियताम् । **आ** इति वितर्के । **अनुमते**ति । यथेति यस्मादर्थे । अत्र तरुषु बन्धुजनत्वं परभृतविरुते प्रतिवचनत्वं चारोप्यत इति रूपकम् । परभृतविरुतरूपप्रतिवचनेन तरुरूपबन्धुजनगमनानुज्ञानुमीयत इत्यनुमानं च । "अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः" इति । स्नेहादध्वपरिश्रममाशङ्क्याह **रम्ये**ति । कमलिन्या निरन्तरं व्याप्तया ...ैः श्यामैः । मध्येमध्ये नलिन्यस्सन्त्विति भावः । छायाप्रधानाः द्रुमाः छायाद्रुमाः । शिवः सुशकुनत्वान्मङ्गलः । **उपस्थितः** उपगतः । एषा विरहकातरा । उक्तमुपपाद-

शकु--(सप्रणामं परिक्रम्य जनान्तिकं) हला पिअंवदे! अज्जउत्तदंसणूसुआए वि अस्समं परिच्चअन्तीए दुक्खदुक्खेण मे चलणा पुरदोमुहा वट्टन्ति।

प्रियं--ण केवलं तवोवणविरहकादरा सही एव्व। तुए उवट्ठिअविओअस्स तवोवणस्स वि एसा समवत्था दीसइ--

उग्गिलिअदब्भकवला मिईओ परिच्चत्तणच्चणा मोराओ।
ओसरिअपण्डुपत्ता मुअन्ति अस्सूणि विअ वणलदाओ* ॥१२॥

शकु--ताद! लदाभइणिं वणजोसिणिं दाव आमन्तइस्सम्।

काश्य--अवैमि ते तस्यां सोदर्यस्नेहम्। इयं तावद्दक्षिणेन।

शकु--(लतामुपेत्य) वणजोसिणि चूदसङ्गआवि पच्चालिङ्ग मं इदोगआहिं साहाबाहाहिं। अज्जप्पहुदि दूरपरिवट्टिणी भविस्सम्।

काश्य--

सङ्कल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।

---

१. हला प्रियंवदे! आर्यपुत्रदर्शनोत्सुकाया अप्याश्रमं परित्यजन्त्या दुःखदुःखेन मे चरणौ पुरतोमुखौ वर्तेते।

२. न केवलं तपोवनविरहकातरा सख्येव। त्वयोपस्थितवियोगस्य तपोवनस्याप्येषा समवस्था दृश्यते।

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव वनलताः॥

३. तात! लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्यामि।

४. वनज्योत्स्ने! चूतसङ्गतापि प्रत्यालिङ्ग मामितोगताभिश्शाखाबाहाभिः। अद्यप्रभृति दूरवर्तिनी भविष्यामि।

र्यति **उद्गलिते**ति। काचिदार्येयम। अत्र वनलतारूपबन्धुस्त्रियो गलत्पाण्डुपत्रापदेशेनाश्रूणि मुञ्चन्तीवेत्युत्प्रेक्षा समासोक्तिरपह्नुतिश्च। **संकल्पित**मिति एवेति भिन्नक्रमः।

---

* अस्सूणि विअ लदाओ इति पाठः।

चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च सम्प्रति वीतशोकः ॥ १३ ॥

इतः पन्थानं प्रतिपद्यस्व ।

शकु—हला एसा दुवेणं वि वो हत्थणिक्खेवो[1] ।

उभे—अअं जणो दाणीं कस्स हत्थे अप्पिदो[2] ।

[बाष्पं विसृजतः]

काश्य—अनसूये! अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला ।

[सर्वे परिक्रामन्ति]

शकु—तादं! एसा उडअपज्जन्तआरिणी गब्भमन्थरा मिअवहू[3] जदा अणघप्पसवा होइ तदा मज्झ कञ्चि पिअणिवेद इत्तं विसज्जेहि ।

काश्य—वत्से शकुन्तले! नेदं विस्मरिष्यामः ।

शकु—(गतिसङ्गं रूपयित्वा) किण्णु खु विडविविडवन्तो विअ णिवणे मे सज्जइ[4]* ।

काश्य—

यस्य त्वया व्रणविरोपणमिंगुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।

---

१. हला एषा द्वयोरपि वां हस्तनिक्षेपः ।

२. अयं जन इदानीं कस्य हस्ते अर्पितः ।

३. तात! एषा उटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदा अनघप्रसवा भवति तदा मह्यं कञ्चित्प्रियनिवेदयितारं विसृज ।

४. किन्नु खलु विटपिविटपान्त इव निवसने मे सज्जति ।

ङ्कल्पितमेवेति। **हस्तनिक्षेप** इति। सावधानं रक्षणीयेति भावः। अयं जनः आवाम्। **र्भमन्थरा** गर्भेण मन्थरा मन्दसञ्चारिणी। **यस्ये**ति। विरोपणं शोषणम्। कुशसूचिविद्धे दर्भाङ्कुरक्षते। श्यामाकेति। परिवर्धितक इत्यनुकम्पायां कः। मुष्टिपरिमितैः

* किण्णु खु णिवसणे मे सज्जइ। इति पाठः। किण्णु खु विडविविडवन्तोवि व किदअपुत्तओ णिवसणे मे सज्जइ इति च।

श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ १४ ॥

शकु—वच्छ! किं सहवासपरिच्चाइणीं मं अण्णेसासि। अचिरप्पसूदाए जणणीए विणा वड्ढिदो एव्व। दाणीं पि तुमं मए विरहिदं तादो चिन्तइस्सदि। णिवत्तेहि दाव।

[रुदती प्रस्थिता]

काश्य—

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया विहतानुबन्धं।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ १५ ॥

शार्ङ्ग—भगवन्! *नोदकान्तात् स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र सन्दिश्य नः प्रतिगन्तुमर्हसि।

---

१. वत्स! किं सहवासपरित्यागिनीं मामन्विच्छसि। अचिरप्रसूतया जनन्या विना वर्धित एव। इदानीमपि त्वां मया विरहितं तातश्चिन्तयिष्यति। निवर्तस्व तावत्।

श्यामाकसस्यैस्संवर्धितः। पुत्रकृतकः कृत्रिमपुत्रः। **सहवासे**ति। त्वदुपरि निःस्नेहां मां कथ मन्विष्यसीति भावः। तमनुशोचति अचिरेति। वर्धित एव। मयेति शेषः। अचिरप्रसूतया त्वां प्रसूय पुनरचिरात्प्रसूतया। कर्तरि क्तः। स्तन्यपानादिकं विनेत्यर्थः। इदानीमिति। जननीवियोगे तवाहं शरणम्। इदानीं मद्वियोगे तातश्शरणमस्ति। तस्मान्निवर्तस्वेति भावः। **उत्पक्ष्मणो**रिति। स्थिरतया धैर्येण बाष्पं विहतानुबन्धं कुरु। विहतोऽनुबन्धोऽनुप्रसरो यस्य। उत्पक्ष्मणोः पक्ष्मलयोः अनेन बाष्पस्य गलनाभावो व्यज्यते। नयनयोरुपरुद्धवृत्तिम्। उपरुद्धा वृत्तिः रूपलक्षणविषयप्रवृत्तिर्येन। कुत इत्याह अस्मिन्निति। पदानि पदविन्यासाः। **नोदकान्ता**दिति स्निग्धः जनः उदकान्तात् उदकसमीपात्। अनुगन्तव्यः यावदुदकसमीपमेवानुगन्तव्य इत्यर्थः। उदकसमीपान्निवर्तितव्यः। यथानर्घराघवे—"ततश्चोदकान्तिकनिवर्तितानुयात्रिकबन्धुवर्गस्ससम्भ्रमं गुहोपनीतां नावमधिरुह्ये"ति। अत्र स्थित्वेति शेषः। क्षीरप्रधानो वृक्षः क्षीरवृक्षः वटः। पद्मपत्र-

* ओदकान्तादिति पाठः उदकान्तात् आ उदकसमीपपर्यन्तमित्यर्थः।

काश्य—तेन हीमां क्षीरवृक्षच्छायामाश्रयामः ।

[सर्वे परिक्रम्य स्थिताः]

काश्य—(स्वगतं) किन्नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिस्सन्देष्टुम् ।

[चिन्तयति]

शकु--(जनान्तिकं) हला पेक्ख णलिणीपत्तमत्तन्तरिआ वि सहअरं अवेक्खन्ती आदुरा चक्कवाई आरसइ । दुक्खरं खु अहं करेमित्ति तक्केमि ।

अन—सहि मा एव्वं मन्तिअ—

* एसावि पिएण विणा गमेइ रअणीं विरहदीहम् ।
गरुअदरं वि दुक्खं आसाबन्धो सहावेदि ॥ १६ ॥

काश्य—शार्ङ्गरव! इति त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ।

शार्ङ्ग—आज्ञापयतु भगवान् ।

---

१. हला पश्य नलिनीपत्रमात्रान्तरितापि सहचरमपश्यन्ती आतुरा चक्रवाक्यारसति । दुष्करं खल्वहं करोमीति तर्कयामि ।

२. सखि मैवं मन्त्रयस्व ।

एषापि प्रियेण विना गमयति रजनी विरहदीर्घाम् ।
गुरुतरमपि दुःखं आशाबन्धस्साहयति

तिरोहितं दयितं प्रति क्रन्दन्तीं चक्रवाकीं दृष्ट्वाह **हलेति** । दुष्करं चिरवियोगखेदसहनम् । **मैवं मन्त्रयस्व** । सुकरमेवेत्यर्थः । चक्रवाक्यत्रोदाहरणमित्याह **एषेति** । कुत इत्याह गुरुतरमिति । साहयति सुसहं करोति । विचिन्त्यावधार्याह **इतीति** । इतीति वक्ष्यमाणपरामर्शी । पुरस्कृत्य अग्रतः कृत्वा । शापमजानस्तद्धेतुकं राज्ञः शकुन्तलाविस्मरणं वस्तुवृत्तविचाराभावतन्निमित्तोपेक्षेयमिति मन्वानः तन्निवृत्त्यर्थं स्वीकार-

---

* एसापि पिएण विणा गमेइ रअणिं सिविणअचिन्ताहिम् । दीहगरुअम्पि दुक्खम् आसाबन्धो सहावेद । इति साधीयान् पाठः । एषापि प्रियेण विना गमयति रजनीं स्वप्नचिन्ताभिः । दीर्घगुर्वपि दुःखम् । आशाबन्धस्साहयति । इति छाया ।

काश्य —

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनस्
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥ १७ ॥

शार्ङ्ग—गृहीतस्सन्देशः ।

काश्य—वत्से! त्वमिदानीमनुशासनीया। पश्य वनौकसोऽपि सन्तो लोकज्ञा वयम् ।

शार्ङ्ग—न खलु धीमतामविषयो नाम कश्चित् ।

योग्यताहेतुविचारपुरस्सरं तस्यास्स्वीकारं सन्दिशति **अस्मा**निति । अस्मान् पितृत्वेन सम्बान्धनः। विचिन्तनस्य साधुत्वं वस्तुवृत्तपरामर्शित्वम् । विचिन्त्य अवधार्य । संयमधनान् । वयं निर्धना इति नावमन्तव्या इति भावः । धनत्वारोपेणार्जनलक्षणतात्पर्यं व्यज्यते । तेन तत्प्राचुर्यं तेन निग्रहानुग्रहसामर्थ्यं च। उच्चैरुन्नतम् । कथमपि केनाप्यनिर्देश्येन हेतुना । अबान्धवकृताम् अकृत्रिमाम् । तां त्वयानुभूतपूर्वाम् । प्रतिपत्तिर्बहुमानः । दृश्या । अत्र योग्यता तावत्तवानुपयोगाद्विधिरूपेण परिणमति । दारसामान्यप्रतिपत्त्यावेक्षस्वेति भावः । त्वं सम्यग्विचार्यास्माकं संयमधनत्वम् आत्मनः कुलस्यौन्नत्यम् अस्याः स्नेहप्रवृत्तेरकृत्रिमत्वं चावधार्यैनां दारसामान्यपदे स्थापय । गजनिमीलिकयैतत्सर्वमजानन्नेनां मावमंस्था इत्यर्थः । एवं तस्या दारसामान्यप्रतिपत्त्या दर्शनमुक्त्वा अवश्यवक्तव्यस्य विवक्षितस्य दारविशेषप्रतिपत्त्या दर्शनस्योक्तिर्निषिध्यते । **भाग्यायत्त**मिति। अतः परं दारविशेषप्रतिपत्त्या दर्शनम्। भाग्यायत्तं दैवाधीनम्। वधूबन्धुभिर्न वाच्यमित्यत्र सामान्यादप्रस्तुताद्विशेषः प्रस्तुतं प्रतीयते । अतः परं भाग्यायत्तम्। तद्वधूबन्धवो वयं न ब्रूम इत्यर्थः। आक्षेपोऽत्रालङ्कारः। अस्या दारविशेषप्रतिपत्त्या दर्शनं भाग्यायत्तत्वाद्वधूबन्धुत्वेनास्मासु विश्वासाच्च किमर्थं वयं ब्रूम इति कैमर्थक्यपरामर्शालोचनमत्राक्षेपः । अनेनावश्यवक्तव्यत्वलक्षणो विशेषो द्योत्यते । "निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया वक्ष्यमाणोक्तविषयस्स आक्षेपो द्विधा मतः"। इत्यस्यार्थदिङ्मात्रम्। अथैवं सन्दिश्य तस्याः पतिकुले वर्तनप्रकारमुपदेष्टुमारभते **वत्से** इति । अनुशासनं हिते प्रेरणम्। वनौकसोऽपि अनागरिकलोका अपि लोकज्ञाः लोकवृत्तान्तज्ञाः। **न खल्वि**ति । प्रज्ञाचक्षुषामपरिज्ञातं किमपि नेत्यर्थः । अनुशास्ति **वत्से** इति ।

काश्य—वत्से! तथा त्वमितः पतिकुलं प्राप्य—

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥ १८॥

कथं वा गौतमी मन्यते?।

गौत—एत्तओ वहूजणस्सउवएसो*। जादे! एदं खु सव्वं ओधारेहि।

काश्य—वत्से! एहि परिष्वजस्व मां सखीजनं च।

शकु—तादि! किं पिअंवदामिस्सा इदो एव्व णिवत्तिस्सन्ति।

काश्य—ननु वत्से! इमे अपि प्रदेये। न युक्तमनयोस्तत्र गन्तुम्। त्वया सह गौतमी यास्यति।

१. एतावान् वधूजनस्योपदेशः। पुत्रि! एतत् खलु सर्वमवधारय।

२. तात! किं प्रियंवदामिश्रे इत एव निवर्तिष्यतः।

"कुलं निलयवंशयोःइत्यमरः"। गुरून् पत्युगुरुभूतान् सर्वान्। शुश्रूषस्व स्वयमतन्द्रिता सादर परिचर। प्रियसखीवृत्तिं कुरु स्नेहबहुमानाविश्वासवती भव। विप्रकृता विमानिता। प्रतीपं प्रतिकूलम्। परिजने भर्तृसम्बन्धिनि स्वसम्बन्धिनि च। दक्षिणा छन्दानुवर्तिनी। भाग्येषु तत्कार्येषु विभवेषु। निमित्ते सप्तमी। अनुत्सेकिनी। यदुक्तं—"कं श्रीर्न दर्पयती"ति। एवं पतिकुले वर्तनप्रकारमुपदिश्य तस्यावश्यकर्तव्यतां बोधयितुं करणेऽभ्युदयमकरणे प्रत्यवायं चाह **यान्ती**ति। एवम्। वर्तमाना इति [illegible]षः। वामाः विरुद्धवर्तिन्य.। आधयः विनाशहेतवः। एव वर्तमाना त्व महाराज महिषीपदे प्रतिष्ठामवाप्स्यसि। नो चेत्कुलं खलीकरिष्यसीत्यर्थः **कथं वे**ति। गौतम्या [illegible]व वा न वा प्रतिभातीत्यर्थः। एवमेवेत्याह **एतावा**निति। उपदेष्टव्य सर्वमुपदिष्टमित्यर्थः। **इमे** इति। अनयोरपि विवाहकालोऽयम्। तत इत एव निवर्तनमित्यर्थः।

* एत्तओ एव्व बन्धुजणस्स उवएसो इति पाठः।

शकु—(पितरमाश्लिष्य) कहं दाणीं तादस्स अङ्कदो परिब्भट्ठा मलअतडुम्मूलिआ विअ चन्दणलदा देसन्तरे जीविअं धारइस्सम् ।

काश्य—वत्से! किमेवं कातरासि ।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ १९ ॥

[शकुन्तला पितुः पादयोः पतति]

काश्य—यदिच्छामि ते तदस्तु ।

शकु—(सख्यावुपेत्य) हला दुवे वि मं समं एव्व परिस्सजथ ।

उभे—(तथाकृत्वा) सहि! जइ सो राआ पच्चहिण्णाणमन्थरो भवे तदा से इमं अप्पणामहेअङ्किअं अंगुलीअअं दंसेहि ।

शकु—हला इमिणा सन्देहेण वो आकम्पिदह्मि ।

१. कथमिदानीं तातस्याङ्कतः परिभ्रष्टा मलयतटोन्मूलितेव चन्दनलता देशान्तरे जीवितं धारयिष्यामि ।

२. हला द्वे अपि मां सममेव परिष्वजतम् ।

३. सखि! यदि स राजा प्रत्यभिज्ञानमन्थरो भवेत्तदास्मै इमं आत्मनामधेयाङ्कितमंगुलीयकं दर्शय ।

४. हला अनेन सन्देहेन वां आकम्पितास्मि ।

कथमिति । उपमया जीवितधारणस्यावश्यमभावो व्यज्यते । वियोगखेदः क्रमेणापयास्यातीत्याह **वत्से** इति । एवं कातरा मा भूरित्यर्थः । **अभिजने**ति । अभिजनवतः कुलीनस्य । श्लाघ्ये स्पृहणीये प्रधानमहिषीपदे लब्धप्रतिष्ठा । अनेन कृतकृत्यताभिमानो व्यज्यते । विभवैस्तत्तदुचितद्रव्यसमृद्ध्या गुरुभिः मुख्यपक्षैः । कृत्यैः । सहक्रियमाणैः । प्रतिक्षणम् । पुङ्खानुपुङ्खतया कर्मणः । अचिरात् । इदानीं गर्भिणी । उपमया तनयस्य भुवनभरणसामर्थ्यं सदा तदुद्योगश्च व्यज्यते । प्रसूयेति हेतुभावगर्भम् । एवमेष्यच्छ्रेयःप्रलोभनेन वियोगखेदं विरलीकृत्य गमनमनुजानाति **यदिच्छा**मीति । पुनर्दर्शनमस्तीत्यर्थः । शापमाशङ्क्य तन्मोक्षोपायमुपादिशतः **सखी**ति । मन्थरः मन्दः । सावलम्ब

उभे--मा भाआहि सिणेहो पावसङ्की ।

शार्ङ्ग--युगान्तरमधिरूढस्सविता त्वरतां भवती ।

शकु--(आश्रमाभिमुखी स्थित्वा) तांद ! कदा णु खु भूओ तवोवणं पेक्खिस्सम् ।

काश्य--श्रूयतां ।

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्द्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥ २० ॥

गौत—जांदे! परिहीअदि गमणवेला । णिवत्तेहि पिदरं । अहव चिरेण वि पुणो एसा एव्वं मन्तइस्सदि । णिवत्तेदु भवम् ।

काश्य--वत्से ! उपरुध्यते मे तपोनुष्ठानम् ।

शकु---(भूयः पितरमाश्लिष्य) तवोणुट्ठाणपीडिअं तादस्स सरीरम् । ता ण जुत्तं मम किदे तादेण उक्कण्ठिदुम् ।

---

१. मा भैषीः स्नेहः पापशङ्की ।

२. तात कदानु खलु भूयस्तपोवनं द्रक्ष्यामि ।

३. जाते ! परिहीयते गमनवेला निवर्तय पितरम् । अथवा चिरेणापि पुनरेषा एवं मन्त्रयिष्यति । निवर्ततां भवान् ।

४. तपोनुष्ठानपीडितं तातस्य शरीरम् । तन्न युक्तं मम कृते तातेन उत्कण्ठितुम् ।

इति यावत् । 'मन्थरं मुग्धसुन्दर'मिति वैजयन्ती । **पापशंकी**ति । आवां स्नेहादपायशङ्किन्यौ । युगान्तरं युगपरिमाणम् अन्तरमवकाशम् । प्रस्थानकालोऽतिवर्तत इति भावः । वार्धके तवास्मिन् वासो भविष्यतीत्याह **भूत्वे**ति । चत्वारोऽन्ता अवधयो यस्याः । सागरान्ताया इत्यर्थः । निवेश्य । निवेशो विवाहः । यथा भारते "निवेशार्थ्यखिलां भूमिं कन्याभैक्षं चराम्यहम्" इति । विवाहं कारयित्वेत्यर्थः । तदर्पितेति । तनयार्पितभूरक्षणेन । **अथवे**ति । एषा न निवर्तयतीत्यर्थः । **तपोनुष्ठाने**ति । तपोनुष्ठानेन

काश्य——(सनिश्वासं)

शममेष्यति मे शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥ २१ ॥

गच्छ शिवास्ते पन्थानस्सन्तु ।

[निष्क्रान्ता शकुन्तला सहयायिनश्च]

सख्यौ——(शकुन्तलां विलोक्य) हद्धि[1] अन्तरिआ सउन्दला वणराईए ।

काश्य——गता वां सहचरी । निगृह्य शोकं मामनुगच्छतम् ।

सख्यौ——ताद[2]! सउन्तलाविरहिदं सुण्णं विअ तवोवणं कहं पविसामो ।

काश्य——स्नेहप्रवृत्तिरेवं दर्शयाति । (सविमर्श) हन्त भोः शकुन्तलां प्रतिविसृज्य लब्धमिदं मे स्वास्थ्यम् ।

अर्थो हि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥ २२ ॥

[इति निष्क्रान्तास्सर्वे]

चतुर्थोऽङ्कः ।

---

१. हा धिक् अन्तरिता शकुन्तला वनराज्या ।

२. तात शकुन्तलाविरहितं शून्यामिव तपोवनं कथं प्रविशामः ।

सोमतीर्थकृतेन । **शम**मिति । विरूढम् अंकुरितम् । बल्युपयुक्तनीवारांकुरानित्यर्थः । तद्विलोकनं ह्यनुस्मारकम् । अपगतदुहितृस्नेहश्वासान्धप्रोज्वलन्मनोमुकुरः निर्व्यूढोपक्रान्तस्सन्तुष्टः प्राह **हन्ते**ति । प्रतिविसृज्य शकुन्तलाप्रत्यर्पणादित्यर्थः । इदानीम् । अनेनेयन्तं काल शकुन्तलब्धायास्तस्या रक्षणपोषणसंस्कारविनयाधानादिना व्याकुलत्वं व्यज्यते । **अर्थ** इति । प्रत्यर्पितेति । प्रत्यर्पितन्यासस्यान्तरात्मेवेति भावः ।

इत्यभिरामविरचितेऽभिज्ञानशाकुन्तलदिङ्मात्रदर्शने

चतुर्थोऽङ्कः ।

पञ्चमोऽङ्कः ।

[ततः प्रविशत्यासनस्थो राजा विदूषकश्च]

विदू—(कर्णं दत्वा) भो वअस्स सङ्गीदसालन्तरे अवहाणं देहि । कलविसुद्धाए गीईए सरओओ सुणीअदि । जाणे तत्तहोदी हंसपदिआ वण्णपरिअअं करेदित्ति ।

राजा—तूष्णीं भव यावदाकर्णयामि ।

[आकाशे गीयते]

अहिणवमहुलोलुवो तुमं तह परिचुम्बिअ चूदमञ्जरीम् ।
कमलवसइमत्तणिव्वुदो महुअर विह्मरिदोसि णं कहम् ॥ १ ॥

---

१. भो वयस्य सङ्गीतशालान्तरे अवधानं देहि । कलविशुद्धाया गीतेस्स्वरयोगः श्रूयते । जाने तत्रभवती हंसपदिका वर्णपरिचयं करोतीति ।

२. अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम् ।
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम् ॥

एवं शकुन्तलाया नरपतिनगरप्रयाणमुपपाद्य उपपादयतीदानीमितरेतरदर्शनाद्यनयोः । अथ गान्धर्वविधिना परिणीय शकुन्तलां यियासुर्नगरं नाममुद्रां न्यस्य तदङ्गुलौ । "एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय गच्छसि यावदन्तं तावत्प्रिये मदवरोधगृहप्रवेशं नेता जनस्तव समीपमुपैष्यतीति" । उक्त्वा नगरमासाद्य शापनिह्नुतनत्स्मृतिः पूर्ववद्राजकार्याणि कुर्वन् राजा कदाचन । आस्थानमण्डपादन्तःपुरमेत्य सुखं स्थितः श्रवणं प्रति गानस्य वयस्येनानुयुज्यते । **भो** इति । अन्तरे मध्ये । कला मधुरा । विशुद्धा असङ्कीर्णा । गीतेः गानस्य । स्वराणां षड्जादीनां योगोऽभ्यासस्स्वरयोगः । वर्णस्य गीतिक्रमस्य परिचयो वर्णपरिचयः । 'वर्णो नीलादिविप्राद्योः कीर्तौ गीतिक्रमे स्तुतौ' इति वैजयन्ती । राज्ञा कञ्चित्कालं कृतरतिकेलिपरिचया देवीभयेन पुनरुपेक्षिता हंसपदिका नाम वल्लभास्वन्यतमा तुल्यावस्थमधुकरोपालम्भव्याजेन राजानमुपालभते । **अभिनवे**ति । हे मधुकर भवान् अभिनवमधुलोलुपः स्वत एव अभिनवे अपरिचिते मधुनि मकरन्दे लोलुपस्सतृष्णः । कथं कस्माद्धेतोः चूतमञ्जरीम् अर्थादभिनवरसाम् । तथा परिचुम्ब्य तथेत्यनुभूतार्थविषयेण प्रलोभनार्थं अनुभूतं परिचुम्बनप्रकारमनुस्मारयति । तस्य वाग्विषयातीतमतिशयञ्च द्योतयति । परिचुम्ब्य रसमास्वाद्य । इदानीं कमलवसतिमात्रनिर्वृतः कमले चिरपरिचिते वसतिमात्रेण चिरपरिचयादनास्थया रसमास्वा-

राजा—अहो रागपरिवाहिनी गीतिः।

विदू—किं दाव गीइए अवगओ अक्खरत्थो भवदा।

राजा—(सस्मितम्) सकृत् कृतप्रणयोऽयं जनः, तदस्यां वसुमतीमन्तरेण मदुपालम्भमवगतोऽस्मि। सखे माढव्य मद्वचनादुच्यतां हंसपदिका निपुणतरमुपालब्धाः स्म इति।

विदू—जं भवं आणवेदि। (उत्थाय) गहिदस्स ताए परकेरएहिं अत्थेहिं सिहण्डञ्चले अच्छराए वीदराअस्स विअ णत्थि मे मोक्खो।

राजा—गच्छ नागरिकवृत्त्या संज्ञापयैनाम्।

विदू—का गई।

(निष्क्रान्तः)

राजा—(आत्मगतं) किन्नु खलु गीतमेवंविधार्थमाकर्ण्य इष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि। अथवा—

---

३. किं तावत् गीतेरक्षरार्थोऽवगतो भवता।

४. यत् भवानाज्ञापयति। गृहीतस्य तया परकेरकैरर्थैश्शिखण्डाञ्चले अप्सरसा वीतरागस्येव नास्ति मे मोक्षः।

५. का गतिः।

दनं विना निवासमात्रेण निर्वृतः सुखाभिमानी। एनां विस्मृतः कथं विस्मृतवानसि। तत्र न हेतुः कश्चन। तस्मादनुचितमेतत्। तदेनां सम्भावयेत्यर्थः। अप्रस्तुतप्रशंसात्रालङ्कारः। तेन संसूच्यराजकर्तृकशकुन्तलाविस्मरणलक्षणं वस्तु व्यज्यते। **रागपरिवाहिनी** रागनिष्यन्दिनी। **अक्षराणां** स्वरावष्टम्भभूतानाम्। **सकृदिति**। प्रणयो रतिकालपरिचयः। अयं जनः इयम्। अवगतोऽस्मि अवगतवानस्मि। निपुणम्। अन्यापदेशकृतत्वात्। परकेरकैः परकीयैः। अर्थैः प्रयोजनैः। हेतौ तृतीया। त्वद्दर्शनार्थं देवकार्यार्थं(?)चेत्यर्थः। शिखण्डाञ्चले शिखाग्रे। वीतरागस्य तपस्विनः। मोक्षः मोचनम् अपवर्गश्च। नागरिकवृत्त्या वैदग्ध्येन। **का गतिः** किं मे शरणम्। शापतिरोहितत्वात् जननान्तरानुभूतस्येव मनसि वासनारूपतया स्थितस्यानतिदूरमनुभूतस्य शकुन्तलानुरागस्य गीतिश्रवणेन किञ्चिद्बोधात् पर्युत्सुकत्वमनुभवंस्तद्धेतुं विमृशति **किन्नु** खल्विति। एवंविधः इष्टजनविरहलक्षणः अर्थो यस्य। अथवेति।

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥ २ ॥

(पर्याकुलम्तिष्ठति)

(ततः प्रविशति कांचुकीयः)

कांचु---अहो नु खल्वीदृशीमवस्थां प्रपन्नोऽस्मि ।

आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्था ॥ ३ ॥

अलं हेतुविकल्पनेत्यर्थः । अयमत्र हेतुरित्याह **रम्याणी**ति । रम्याणि उद्यानेन्दूदया-दीनि । मधुरान् शब्दान् गीतकुहूकेकादीन् सुखितोऽपि प्रियतमामिलितोऽपि । यदुक्तं "मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः" इति । अबोधपूर्वं बोधः सम्यक्ज्ञानम् । अस्पष्टतयेत्यर्थः । भावस्थिराणि । भावे मनसि स्थिराणि वासनारूपतया लीनानि । अत्र रम्याणि वीक्ष्येति शब्दान् निशम्येति हेतुभावगर्भौ । अत्र पूर्ववाक्यार्थे उत्तरवाक्यार्थ आरोप्यते । हेतुहेतुमद्भावसम्बन्धः । अतो हेतुमति हेतोरारोपोऽयम् । केषांचिदेष प्रकारो हेत्वलङ्कारः । "हेतुमता सह हेतोरभिधानमभेदतो हेतुः" इति लक्षणम् । **अयमर्थः**—जन्तुस्सुखितोऽपि रम्यवस्तुवीक्षणान्मधुरशब्दश्रवणाच्च पर्युत्सुकं भवतीति यत् तस्य हेतुरस्पष्टतया जननान्तरसौहृदस्मरणमिति । अत्राप्रस्तुतात् सामान्यात् प्रस्तुतो विशेषः प्रतीयते । अतस्सुखितस्य मम गीताकर्णनजनितमिदमौत्सुक्यं जन-नान्तरसौहृदस्मरणादेवेत्यर्थः । अप्रस्तुतप्रशंसात्रालङ्कारः । अथ शकुन्तलया महाश्र-माद्धस्तिनपुरङ्गत्वा राजभवनं प्रविश्य तद्दर्शनार्थमन्तःपुरद्वारमुपगतैः काश्यपशिष्यैरात्म-निवेदनाय नियुक्तो राजसमीपमुपसर्पन् कञ्चुकी जराभिभूतमात्मानमनुशोचत्य**हो** इति । ईदृशीमिति वक्ष्यमाणपरामर्शी । **आचार** इति । इतिर्हेतौ अवहितेन अन्यथा विस्म-रणात् । बहुतिथे बहुसंख्यापूरके । प्रस्थाने गमने । विक्लवगतेः विवशपदविन्यासस्य । अत्र गमनाशक्तिलक्षणकार्यमुखेन कारणं वार्धकं भङ्ग्यन्तरेणोच्यते इति पर्यायोक्तम् ।

कामं धर्मकार्यमनतिपात्यं देवस्य। तथापीदानीमेव धर्मासनादुत्थिताय पुनरुपरोधकारि शिष्यागमनमस्मै नोत्सहे वक्तुम्। अथवा अविश्रमो लोकतन्त्राधिकारः कुतः-

भानुस्सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति।
शेषस्सदैवाहितभूमिभारष्षष्ठांशवृत्तेरपि धर्म एषः॥ ४॥

यावत् कण्वशिष्यनियोगमनुतिष्ठामि (परिक्रम्यावलोक्य च) एष देवः।

प्रजाः प्रजास्स्वा इव तन्त्रयित्वा निषेवते शान्तमना विविक्तम्।
यूथानि सञ्चार्य रविप्रतप्तश्शीतं दिवा स्थानमिव द्विपेन्द्रः॥ ५॥

(उपगम्य) जयतु देवः। एते खलु हिमवतो गिरेरुपत्यकारण्यवासिनः काश्यपसन्देशमादाय सस्त्रीकास्तपस्विनः सम्प्राप्ताः। श्रुत्वा देवः प्रमाणम्।

राजा (सादरं) किं काश्यपसन्देशहारिणः।

कांचु अथकिम्।

राजा—तेन हि मद्वचनादुच्यतामुपाध्यायस्सोमरातः। अमूनाश्रमवासिनः श्रौतेन विधिना पुरस्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमप्येतांस्तपस्विजनदर्शनयोग्ये देशे प्रतिपालयामि।

प्रकृतमनुसन्धायाह **काम**मिति। काममित्यनुवादे। "कामन्त्वनुमतेऽव्यय" इति केशवः। धर्मकार्यमिति मुनिसामान्यदृष्ट्या। मुनयो हि धर्मकार्यार्थमागच्छन्ति। अतिपातोऽत्ययः कालक्षेपः। तदर्हमतिपात्यम्। तदन्यदनतिपात्यम्। झटिति निवेदयामीति यावत्। उत्थिताय उत्थाय रहसि विश्रमार्थं समागताय। उपरोधकारि विश्रमविघ्नकारि। अथवेति। वक्तुमुत्सहे इत्यर्थः। कुत इत्याह विश्रम इति। लोकतन्त्रो लोकाधीनः। उक्तमुपपादयति **भानु**रिति। तुरङ्गसकृद्योजनेन पर्यटनापरिसमाप्तिरुक्ता। भानुस्सदा पर्यटतीत्यर्थः। षष्ठांशवृत्तेः राज्ञः। एषः एतत्सदृशः। सार्वकालिक इत्यर्थः। धर्मः पालनलक्षणः। **प्रजा** इति। स्वाः प्रजाः इव आत्मीयान् पुत्रानिव। 'प्रजा तु जनपुत्रयोः' इति वैजयन्ती। उपमया प्रजास्वास्थ्यातिशयः तासामधीनता च व्यज्यते। तन्त्रयित्वा स्वं स्वं कृत्यं कारयित्वा। विविक्तं रहः। **श्रुत्वे**ति। प्रमाणम्। कर्तरि ल्युट् प्रमाता कर्तव्यनिर्णेता। तपस्विदर्शनोचिते अग्निशरणे। "अग्न्यगारगतः कार्यं पश्येच्चैव तपस्विनां पुरोहिताचार्यसखः प्रत्युद्गम्याभिवाद्य च" इत्युक्तेः। अधिकारखेद

कांचु—यदाज्ञापयति देवः ।

[निष्क्रान्तः]

राजा—(उत्थाय) वेत्रवति अग्निशरणमार्गमादेशय ।

प्रतिहारी—इदो देवो ।

राजा—(परिक्रामन् अधिकारखेदं निरूप्य) सर्वः प्रार्थितमधिगम्य सुखी सम्पद्यते जन्तुः । राज्ञां तु चरितार्थता दुःखोत्तरैव । कुतः—

औत्सुक्यमात्रमवसाययति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेवम् ।
नातिश्रमापनयनाय *यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥ ६ ॥

[आकाशे वैतालिकौ]

विजयतां देवः ।

प्रथमः—

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।

१. इदो देवः ।

परिपालनक्लेशम् । विश्रमावसरे मुन्यागमनेन दूयमान आह **सर्व** इति । अधिगम्य लब्ध्वा । राज्ञां विशेषोऽस्ति । चरितार्थता प्रार्थितलाभजनितसुखम् । दुःखोत्तरा दुःखसहिता । उक्तमुपपादयति **औत्सुक्ये**ति । प्रतिष्ठा राज्यप्रतिष्ठा तद्विषयमौत्सुक्यम् । अवसाययति अपनयति । लब्धस्य राज्यस्य परिपालनप्रयत्नः एव क्लिश्नाति बाधते । अथ वैतालिकाववसरज्ञौ राज्ञो वैमनस्यमपनेतु तदनुगुणमुपश्लोकयतः **स्वसु-खे**ति । सर्वो जनः परसुखनिरभिलाषः स्वसुखहेतोः खिद्यते । त्वं तु प्रत्युत स्वसुखनिर-भिलाषो लोकसुखार्थं प्रतिदिनं खिद्यसे । आश्चर्यमेतदित्यर्थः । **अथवे**ति । नात्र विस्मय इत्यर्थः कुत इत्याह **ते वृत्ति**रिति । वृत्तिर्विहितो व्यापारः । स्वधर्मानुष्ठाने किमाश्चर्य-

---

* स्वहस्तधृतदण्डं राज्यं स्वहस्तधृतदण्डमातपत्रमिव यावते श्रमाय भवति न तावते श्रमापनयनाय । लब्धस्य राजस्य स्वयमेव पालने क्लेश एव, मन्त्रिषु समर्प्य भोगपरतैव सुखाय । 'न च श्रमाय' इति क्वचित् पाठः ।

अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं च्छायया चाश्रितानाम् ॥ ७ ॥

द्वितीयः—

नियमयसि विमार्गप्रस्थितानात्तदण्डः
शमयसि हि विवादं कल्पसे रक्षणाय ।
अतनुषु विभवेषु ज्ञातयस्सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम् ॥ ८ ॥

राजा—एते क्लान्तमनसः पुनर्नवीकृताः स्मः ।

[परिक्रामति]

प्रती—एसो अहिणवसम्माज्जणसस्सिरीओ सण्णिहिदहोमधे अग्गिसरणालिन्दो । आरुहदु देवो ।

[राजा आरुह्य परिजनांसावलम्बी तिष्ठति]

वेत्रवति किमुद्दिश्य तत्रभवता काश्यपेन मत्सकाशमृषयः प्रेषितास्स्युः ।

किन्तावद्व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं ?
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम् ?

---

१ एषोऽभिनवसम्मार्जनसश्रीकस्सान्निहितहोमधेनुरग्निशरणालिन्दः आरोहतु देवः ।

मित्यर्थः । अनेन प्रजाकार्येषु सततोद्योगस्यावश्यकर्तव्यत्व व्यज्यते । दृष्टान्तमाह **अनुभवती**ति । **नियमयसी**ति । विमार्गप्रस्थितान् उन्मर्यादान् । आत्तदण्डः यथार्हेण दण्डेन । कल्पसे समर्थोऽसि । शिष्टान् परिपालयसीत्यर्थः । अतः प्रजानाम् अतनुषु पूर्णेषु । विभवेषु धनधान्यक्षेत्रदारागारादिषु मध्ये तेष्वन्यतमत्वेन ज्ञातयः सन्तु नाम तैर्न विनियोगः । ते विभवगणनापरिपूरणमात्रफलाः । बन्धुभिः कृत्य त्वयि तु परिसमाप्तं त्वमेव बन्धुकृत्यं विनयाधानरक्षणादिकं निश्शेषं करोषि । **नवीकृताः** उन्मिषितमनसः कृताः । किमुद्दिश्य किं कार्यमुद्दिश्य । कार्यं विकल्पयति **किं ताव**दिति । विघ्नैः तत्कारणैः रक्षःप्रभृतिभिः । असत् हिंसादिः । प्रसवः प्रसूतिः फलकुसुमादेः ।

आहोस्वित् प्रसवो ममापचरितैर्विष्टंभितो वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥ ९ ॥

प्रती—सुअरिदाहिणन्दिणो इसओ देवं सभाजेदुं आअदात्ति-तक्केमि ।

[ततः प्रविशन्ति गौतमीसहितां शकुन्तलां पुरस्कृत्य मुनयः । पुर एषां पुरोहितश्च

कांचु—इत इतो भवन्तः ।

शार्ङ्गरवः –शारद्वत !

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते ।
तथापीदं शश्वत् परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ॥ १० ॥

शार– स्थाने खलु भवान् पुरप्रवेशादित्थम्भूतः । अहमपि–

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥ ११ ॥

१. सुचरिताभिनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि ।

अपकृष्टानि उच्छास्त्राणि चरितानि तैः । आरूढाः बहवः प्रतर्काः यत्र तदारूढबहुप्रतर्कम् । तत इति । कांचुकीयेन सहेति शेषः । नागरिकजनसंसर्गमसहमान आह महाभाग इति । यदुक्तं–"आरभ्योत्पत्तिमामृत्योः कलङ्को यस्य नो भवेत् स्याच्चैवानुगमा कीर्तिर्महाभागस्स उच्यते" इति । काममित्यनुवादे । अभिन्नास्थितिः अनुल्लङ्घनमर्यादः । वर्णानां मध्ये अपकृष्टः अन्त्यजः । उपमया क्षणमपि तात्रवासासहिष्णुत्वं व्यज्यते । अभ्यक्तमिति । अत्र मालोपमायां अहमित्यस्मदर्थस्वप्रतिबिम्बभूतैः स्नातशुचिप्रबुद्धस्वैरगतिभिर्बिम्बभूतस्य मुनेरशुभवासनत्वसात्विकत्वतत्वज्ञानाविहतत्वनेरस्तसमस्तैषणत्वानि व्यज्यन्ते । तथैव जनप्रतिबिम्बैरभ्यक्ताशुचिसुप्तबद्धैर्बिम्बभूतस्याशुभवासनत्वतामसत्वतत्वज्ञानपराङ्मुखत्वसमस्तैषणासम्पतितत्वानि च । निमित्तं दक्षिणाक्षिस्पन्दरूपम् । नतु पुनः स्त्रीणामानिष्टावगाससूचकम् । तेन दूयमाना आह

शकु—(निमित्तं सूचयित्वा) अम्महे किं ति वामेअरं णअणं विअरेदि।[1]

गौत— जादे पडिहदं अमङ्गलं। सुहाणि दे भत्तुकुलदेवदाओ विअरन्तु।[2]

[परिक्रामन्ति]

पुरो—(राजानं निर्दिश्य) भोस्तपस्विनः असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनः प्रतिपालयते वः। पश्यतैनम्।

शार्ङ्ग— महाब्राह्मण! काममेतदभिनन्दनीयम्। तथापि वयमत्र मध्यस्थाः। कुतः

भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धतास्सत्पुरुषास्समृद्धिभिस्स्वभाव एवैष परोपकारिणाम् ॥१२॥

प्रती— देव पसण्णमुहवण्णा इसओ दीसन्ति। ता विस्सत्थकज्जा एदे।[3]

राजा— (शकुन्तलां दृष्ट्वा) अथात्रभवती—

काऽस्विदवकुण्ठनवती नातिपरिस्फुटशरीरलावण्या।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्त्राणाम् ॥१३॥

---

१. अम्महे किमिति वामेतरं नयनं विकुरुते।

२. पुत्रि प्रतिहतममङ्गलम्। सुखानि ते भर्तृकुलदेवता वितरन्तु।

३. देव प्रसन्नमुखवर्णा ऋषयो दृश्यन्ते। तद्विश्वस्तकार्या एते।

अम्महे इति। देशी। अत्र खेदद्योतकः। किमिति कस्माद्धेतोः। विकुरुते स्पन्दते। प्रतिहतमित्याशंसायां क्तः। प्रतिहतं भूयादित्यर्थः। **असा**विति। प्रागेव युष्मद्दर्शनात् पूर्वमेव। पश्यतैनम्। आश्चर्यमेवंविधस्यास्य विनीतत्वमिति भावः। महाब्राह्मण। अनेनोत्तानहृदयत्वं व्यज्यते। मध्यस्थाः तटस्थाः। अनतिकौतुकाः। कुत इत्याह **भवन्ती**ति। दूरमत्यर्थम्। अनुद्धताः। विपक्षे नञ्। विनीता इत्यर्थः। अत्राप्रस्तुतात् सामान्यात् प्रस्तुतो विशेषः प्रतीयते। सत्पुरुषोऽयम्। अस्य समृद्धिभिर्विनीतत्वं स्वभाव एव। स्वभावो हि न विस्मयविषय इत्यर्थः। **देवे**ति। विश्वस्तकार्यसिद्धयः। कार्यं सिध्यति वा न वेति न संशयः। शापेन तां अजानन् पृच्छति **अथे**ति। अथात्रभवतीति चूर्णम्। कास्विदित्यादि चूर्णि। अवकुण्ठनं प्रावरणम्। पाण्डुपत्त्राणां

प्रती—देव कुदूहलगब्भो विहिदो मे तक्को ण पसरदि । दंसणिज्जा उण से आकिदी लक्खीअदि ।

राजा—भवत्वनिर्वर्णनीयं परकलत्रम् ।

शकु—(हस्तमुरसि कृत्वा स्वगत) हिअअ किं एव्वं वेपसि । अज्ज-उत्तस्स भावत्थं ओधरिअ अधीरं दाव होहि ।

पुरो—(पुरोगत्वा) देव ! एते विधिवदर्चितास्तपस्विनः । कश्चिदेषा-मुपाध्यायसन्देशः । तं देवः श्रोतुमर्हति ।

राजा—अवहितोऽस्मि ।

ऋषयः—(हस्तमुद्यम्य) विजयस्व राजन् ।

राजा—सर्वानभिवादये वः ।

ऋषयः—स्वस्ति भवते ।

राजा—अपि निर्विघ्नतपसो मुनयः

ऋषयः

कुतो धर्मक्रियाविघ्नस्सतां रक्षितरि त्वयि ।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति ॥ १४ ॥

---

१. देव कुतूहलगर्भो विहितो मे तर्को न प्रसरति । दर्शनीया पुनरस्या आकृतिर्लक्ष्यते ।

२. हृदय किमेवं वेपसे । आर्यपुत्रस्य भावस्थमवधार्याधीरं तावत् भव ।

जीर्णपर्णानाम् । तर्क ऊहः । कुतूहलमाश्चर्यम् । तपोवनमध्ये वनितेत्याश्चर्यम । कुतूहलं गर्भे यस्य सः कुतूहलगर्भः । अतो न प्रसरति । इयं सेति न व्यवस्यति । **भवतु** या वा का वा भवतु । अनिर्वर्णनीयं परकलत्रम् । एनां नावलोकयामीति भाव । दुर्नि-मित्तेन व्यथितं हृदयमाह । भावस्थ मनोगतम् । अवधार्य पूर्ववदौदासीन्यं चेत्तदा अधीरं भव । **कश्चिदिति** । अस्तीति शेषः । कुतो धर्मक्रियाविघ्नः । अत्र दृष्टान्तेन प्रतापातिशयः क्रियाप्रवर्तकत्वं च व्यज्यते । अर्थवानिति । सम्यक् पालनेन प्रजारञ्ज-

राजा—अर्थवान् खलु मे राजशब्दः। अथ भगवान् लोकानुग्रहाय कुशली काश्यपः?

शार्ङ्ग—स्वाधीनकुशलास्सिद्धिमन्तः। स भवन्तमनामयप्रश्नपूर्वकमिदमाह।

राजा—किमाज्ञापयति भगवान्?

शार्ङ्ग—यन्मिथस्समवायादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातं। कुतः-

त्वमर्हतां प्राग्रसरस्स्मृतोऽसि नः शकुन्तला मूर्तिमतीव सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः ॥१९॥

तदिदानीमापन्नसत्वा प्रतिगृह्यतां सह धर्मचरणायेति।

गौत—अज्ज किं वि वत्तुकामह्मि। ण मे वअणावआसो अत्थि। कहं ति--

---

१. आर्य किमपि वक्तुकामास्मि। न मे वचनावकाशोऽस्ति। कथमिति।

नात्। "ब्राह्मणं कुशलं पृच्छे"दित्यत आह **अथे**ति। लोकेत्यादिना परोपकारपरत्वं व्यज्यते। स्वाधीनेति। सिद्धिमान् हि काश्यपः। अतः स्वाधीनकुशल इत्यर्थः। "क्षत्रबन्धूननामय"मिति नयेनाह अनामयप्रश्नपूर्वकमिति। इदमा परामृष्टमाह **यन्मिथ** इति। मिथस्समवायात् मिथस्समवायमवलम्ब्य। मिथो रहः। समवायस्संङ्गमः। गान्धर्वो विधिः। अनुमनने हेतुः प्रीतिः। प्रीतौ हेतुमाह **त्वमि**ति। अर्हतां पूज्यानां सत्कारयोग्यानां। मूर्तिमती सत्क्रियेव। सकलेन्द्रियसन्तर्पणत्वात् उत्प्रेक्षाया निमित्तत्वम्। सत्कर्तॄणां चरितार्थत्वाभिमानः फलम्। समानयन् सङ्गमयन्। हेतौ शतृप्रत्ययः। वाच्यं असमगुणसमानयनजातमपवादम्। अत्रेतः पूर्वमेवंगुणोपेतं वधूवरं नाभूदिति व्यज्यते। अत्र समोऽलङ्कारः उत्प्रेक्षया संसृष्टः। "समं योग्यतया योगो यदि सम्भावितः क्वचित्" इति। अनुचितं त्वया कृतमिति विवक्षितं पारुष्य भयात् भंङ्ग्यन्तरेण सूचयति **आर्ये**ति। कथमिति। कथं वचनावकाशाभाव इति

णावेक्खिदो गुरुजणो इमाए तुए पि ण पुच्छिदो बन्धू ।
एक्कक्कमएककिदे भणामि किं एक्कमेक्कस्स ॥ १६ ॥

शकु—(आत्मगतं) किंणुखु अज्जउत्तो भणादि ?

राजा—किमुपन्यस्तं ?

शकु—(आत्मगतं) पावओ खु वअणोवण्णासो ।

शार्ङ्ग—कथं किन्नाम । ननु भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः ।

सतीमपि ज्ञातिकुलैकसंश्रयाज्जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतस्समीपे परिणेतुरिष्यते तदुज्झितापि प्रमदास्वबन्धुभिः ॥१७॥

राजा—किञ्चात्रभवती मया परिणीतपूर्वा ?

---

१. नावेक्षितो गुरुजनोऽनया त्वयापि न पृष्टो बन्धुः ।
एकक्रमे एककृते भणामि किमेकमेकस्य ॥
२. किन्नुखल्वार्यपुत्रो भणति ।
३. पावकः खलुवचनोपन्यासः ।

चेदुच्यत इत्यर्थः । तदाह **नापेक्षित** इति । आर्येयम् । बन्धुस्तातकाश्यपः । बन्धुत्वं श्वशुरत्वात् । एकस्येति सम्बन्धमात्रे षष्ठी । अस्यास्तव च तुल्यदोषत्वात् एतत्संम्बन्धी तव न दोषः । अतो न वचनावकाशः। अतस्त्वां न वच्मीति भावः । शापविस्मृतशकुन्तलाविवाह आह **किमिद**मिति । शापमजानन्ती प्राह **पावक** इति । पावकत्वारोपस्संतापातिशयकरत्वात् । शापहेतुकं विस्मरणमजानन् शार्ङ्गरवः जानन्नेवायमेनामवधीरयितुमारभते इति मत्वाह । **कथं किन्नामे**ति । कस्मादस्मदुदितं वृत्तान्तमजानन्निव पृच्छसीत्यर्थः । **नन्वि**ति । भवन्त एव अस्मदुपदेशं विना भवन्तःस्वेयमेव लोकवृत्तज्ञाः । तथापि लोकवृत्तं ब्रूम इति भावः । सतीमिति । सतीं पतिव्रताम् । ज्ञातीति । पितुर्गृह एव वसन्तीम् । अन्यथा असतीम् । भर्तृमतीं भर्तरि जीवति सतीत्यर्थः । यत एवं अतो लोकापवादभीरुणा मुनिना त्वयोपेक्षितेयं साध्वी तव धर्मपत्नी त्वत्समीपं प्रति प्रेषिता तदिदानींप्रतिगृह्यतां सहधर्मचरणायेत्यर्थः । किं चाति

शकु---(सविषादमात्मगतं) हिअअ सम्पदं उइदा दे आसङ्का ।[1]

शार्ङ्ग---किं कृतकार्यद्वेषो? धर्मं प्रति विमुखता? कृशावज्ञा?

राजा---कुतोऽयमसत्कल्पनाप्रश्नः?

शार्ङ्ग--- मूर्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु ॥ १८ ॥

राजा--- विशेषेणाधिक्षिप्तोऽस्मि ।

गौत---जादे मुहुत्तअं मा लज्ज, अवणइस्सं दाव दे ओउण्ठणं; तदो तुमं भट्टा पच्चभिजाणिस्सदि ।[2]

[यथोक्तं करोति]

राजा---(शकुन्तलां निर्वर्ण्यात्मगतम्)

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नैव शक्नोमि हातुम् ॥ १९ ॥

---

१. हृदय साम्प्रतं उचिता ते आशङ्का ।

२. पुत्रि मुहूर्तं मा लज्जस्व अपनेष्यामि तवावकुण्ठनं ततो भर्ता त्वां प्रत्यभिज्ञास्यति ।

प्रश्ने। **साम्प्रतं** स्वयं कृते विवाहे सन्दिह्यमाने सति । **किमि**ति। अत्र हेतुमति हेतुरारोप्यते । अतोऽयमर्थः। हे राजन् तवायं कृतकार्यद्वेषः कृते कार्ये विवाहे ऊढायामस्यां द्वेषः धर्मं प्रति विमुखतया ।क कृशावज्ञया किम्। कृशेषु असम्पन्नेष्वस्मासु । "यः कृशाश्वः कृशगवः कृशभृत्यः कृशातिथिः स वै राजन् कृशो नाम न शरीरकृशः कृशः" इति । **असत्कल्पनाप्रश्नः** असतः अविद्यमानस्य कृतकार्यद्वेषस्य कल्पनया प्रश्नः हेतुप्रश्नः। नेयमसम्भवतः कल्पनेत्याह **मूर्च्छन्त्यमी**ति। अमी एवंविधाः। त्वमैश्वर्यमत्तः अतस्त्वयि कृतकार्यद्वेषस्सम्भवतीत्यर्थः। **अधिक्षिप्तोऽस्मि** ऐश्वर्यमत्तत्ववचनात् । **इद**मिति । उपनतं स्वयमेवागतम्। अक्लिष्टकान्तिपरिपूर्णलावण्यम् । अव्यवस्यन् आनिश्चिन्वानः । परिभोक्तुं हृदयपुष्यावलोकयितुं समास्वादयितुं च। हातुं परोक्षयितुं

[विचारयन् स्थितः]

प्रती—(जनान्तिकं) अहो धम्मावेक्खिदा भट्टिणो जं ईदिसं णाम सुहोवणदं रूपं दक्खिअ को अण्णो विआरेदि।

शार्ङ्ग—राजन् किमिदं जोषमास्यते।

राजा—भोस्तपोधन चिन्तयन्नपि स्वीकारमत्रभवत्या न खलु स्मरामि। ततः कथमिमामभिव्यक्तसत्वलक्षणां प्रत्यात्मानमक्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये ?

शकु—(सविषादमपवार्य) परिणए एव्व सन्देहो। कुदो दाणीं मे दूराधिरोहिणी आसा ?

शार्ङ्ग—मा तावत्—

कृताभिमर्शामनुमन्यमानस्सुतां त्वया नाम मुनिर्विमान्यः।
दृष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ॥२१॥

---

१. अहो धर्मापेक्षिता भर्तुः। यदीदृशं नाम सुखोपनतं रूपं दृष्ट्वा कोऽन्यो विचारयति।

२. परिणये एव सन्देहः कुत इदानीं मे दूराधिरोहिण्याशा।

विहायान्यस्मिन् गन्तुं च। **धर्मापेक्षिता**। कुत इत्याह ईदृशमिति। **जोषं** तूष्णीम्। **भो** इति। अभिव्यक्तं स्पष्टं सत्वस्य गर्भस्य लक्षणं कपोलपाण्डिमस्तनचूचुकनालिमादि यस्याः। अक्षेत्रिणम अकलत्रिणम्। प्रतिपत्स्ये अनुमन्ये। इयं मम पत्नीति। **कुत** इति। सफला न स्यादिति भावः। मा तावदिति वैपरीत्यद्योतकम्। विपरीतमेतदित्यर्थः। किं तदित्याह **कृते**ति। अभिमर्शो बलात् स्पर्शः। अनुमन्यमानः। तव महिषीत्वे प्रतिगृह्यतामिति त्वत्समीपं प्रापयन्नित्यर्थः। नामेत्यसम्भावनायाम्। विमान्यः। भवतीति शेषः। मुनिकर्तृकस्य त्वत्कर्मकस्य च विमाननस्यात्र सम्भावना। न त्वत्कर्तृकस्य मुनिकर्मकस्य। त्वं खलु सुताभिमर्शादपराद्धः। अतस्त्वत्कर्तृकमुनिकर्मकमेतद्विमाननं विपरीतमेतदित्यर्थः। दृष्टमित्यादि। येन सुतानुमननेन हेतुना त्वं दृष्टं प्रथमं दस्युना हृतं पुनरन्विष्य दृष्टं स्वमर्थं प्रतिग्राहयता कस्मैचिद्धिन्मुना पात्रीकृतः दस्युः चोर इवासि इत्यन्वयः। तस्मादेनां स्वीकृत्य मुनिं सम्मानयेति भावः।

शार—शार्ङ्गरव विरम त्वमिदानीम्। शकुन्तले वक्तव्यमुक्तमस्माभिः। सोऽयमत्रभवानेवमाह। दीयतामस्मै प्रत्ययप्रतिवचनम्।

शकु—(स्वगतं) ईदं अवत्थन्तरं गदे तारिसे अणुराए किं वा सुमराविदेण। अत्ता दाणीं मे सोअणिज्जोत्ति ववसिदं एदम्। (प्रकाशं) अज्जउत्त (इत्यर्धोक्ते) अहव संसइदे दाणीं ण एसो समुदाआरो। पोरव जुत्तं णाम दे पुरा अस्समवदे सहावोत्ताणहिअअं इमं जणं समअपुरुवं पदारिअ सम्पदं ईरिसेहिं अक्खरेहिं पच्चाचक्खिदुम्।

राजा—शान्तं पापम्।

व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम्।
कूलंकषेव सिन्धुः प्रसन्नमम्भस्तटतरुं च ॥ २२ ॥

---

३. इदमवस्थान्तरं गते तादृशे अनुरागे किं वा स्मारितेन। आत्मा इदानीं मे शोचनीय इति व्यवसितमेतत्। आर्यपुत्र!-अथवा संशयिते इदानीं नैष समुदाचारः। पौरव युक्तं नाम ते पुरा आश्रमपदे स्वभावोत्तानहृदयमेनं जनं समयपूर्वं प्रतार्य साम्प्रतमीदृशैरक्षरैः प्रत्याख्यातुम्।

प्रत्यय प्रतिवचनं प्रत्ययार्थं प्रतिवचनम्। व्यवासितमेतादिति इत्येतद्व्यवसितमित्यन्वयः अथवेति आर्यपुत्रेति न सम्बोधनीयमित्यर्थः। कुत इत्याह **संशयित** इति। परिणयने संशयिते यथोचितं सम्बोधयाति **पौरवेति**। उत्तानमगम्भीरम्। समयपूर्वम्। समयप्रकारो वक्ष्यते "एकैकमत्र दिवसे दिवसे मदीयं" इत्यादि। प्रतार्य वञ्चयित्वा। ईदृशैः परकलत्रत्वप्रतिपादकैः। प्रत्याख्यातुं निराकर्तुम्। युक्तं नामेति विपरीतलक्षणा। पूरुवंशजातस्य तवानुचितमेतादित्यर्थः। अतोऽमुं जनं मा निराकुरुष्वेति भावः। शान्तमित्याशंसायां क्तः। **व्यपदेश**मिति। व्यपदेशं वंशम्। आविलयितुं दूषयितुं कलुषयितुं च। पातयितुं। नरके अम्भसि च। प्रसन्नं निर्दोषमच्छं च। सखीभ्यां निर्दिष्टमंगुलीयकदर्शनं कर्तुमारभते **भवात्विति**। उदारः कल्पः विदग्धमेतादित्यर्थः।

शकु—होदु जइ परमत्थदो परपरिग्गहसङ्किणा तुए एव्वं पउत्तं अहिण्णाणेण इमिणा तुज्झ आसङ्कं अवणइस्सम् ।

राजा—उदारः कल्पः ।

शकु—(मुद्रास्थानं परामृश्य) हद्धि अंगुलीअअसुण्णा मे अङ्गुली ।

[सविषादं गौतमीमवेक्षते]

गौत—णूणं दे सक्कावदारब्भन्तरे सईतित्थसलिलं वन्दमाणाए पब्भट्ठं अंगुलीअअम् ।

राजा—(सस्मित) इदं तत् प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते ।

शकु—एत्थ दाव विहिणा दंसिदं पहुत्तणम् । अवरं दे कहइस्सम् ।

राजा—श्रोतव्यमिदानीं संवृत्तम् ।

शकु—णं एक्कदिअहे णोमालिआमण्डपे णलिणीपत्तभाअणगअं उदअं तव हत्थे सण्णिहिदं आसि ।

---

१. भवतु यदि परमार्थतः परपरिग्रहशङ्किना त्वया एवं प्रयुक्तं अभिज्ञानेनानेन तवाशङ्कामपनेष्यामि ।

२. हा धिक् । अङ्गुलीयकशून्या मे अंगुलिः ।

३. नूनन्ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टमंगुलीयकम् ।

४. अत्र तावद्विधिना दर्शितं प्रभुत्वं, अपरं ते कथयिष्यामि ।

५. नन्वेकदिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते सन्निहितमासीत् ।

"उदारो महति ख्याते दानशौण्डविदग्धयो" रिति वैजयन्ती । **अंगुलीयके**त्यादिः कथमेतदित्यवेक्षणाभिप्रायः । अंगुलीयादर्शनस्य सङ्गतिं वितर्कयति **नून**मिति । शक्रावतार इति गंगातीरैकदेशः । **इदं** तदिति इदं तापसतरुण्या प्रागभाविनोऽगुलीयस्य प्रध्वंसाभावे कथिते तापसवृद्धया तस्य सङ्गतिकथनम् । प्रत्युत्पन्नं तत्तदुचितविषयोन्मेषवती मतिर्यस्य तत् प्रत्युत्पन्नमति । स्त्रैणं स्त्रीसमूहः । **दर्शितं प्रभुत्वम्** । अंगुलीयेन मा वोधयेदिति । श्रोतव्य मिदानीं संवृत्तम् । पूर्वं द्रष्टव्यत्वेनोक्तमभिज्ञानमिदानीं

राजा—शृणुमस्तावत् ।

शकु—तक्खणं तु सो मम किदअपुत्तओ दीहावंगो णाम हरिणपोदओ उवट्ठिदो । तुए वि अअं दाव विब्रदुत्ति अणुकम्पिणा उवच्छन्दिदे उदए सो ण उण दे अपरिअआदो हत्थब्भासं उवगओ । पच्छा तस्सिं एव्व मए गहिदे सलिले किदो तेण पणओ । इत्थं तदा तुमं अवहसिदो सव्वो सगन्धेसु विस्ससदि । दुवे पि एत्थ आरण्णआ इत्ति ।

राजा—एवमादिभिरात्मकार्यनिर्वर्तिनीनाममृतवाङ्मधुधाराभिराकृष्यन्ते विषयिणः ।

गौत—महाभाअ । णारुहसि एवं मंतिदुम् । तपोवणसंवड्ढिदो अणाहिण्णो अअं जणो केदवस्स ।

राजा—तापसवृद्धे !—

स्त्रीणामशिक्षितपटुत्वममानुषीषु
सन्दृश्यते किमुत याः प्रतिबोधवत्यः ।

---

१. तत्क्षणं तु स मम कृतकपुत्रो दीर्घापाङ्गो नाम हरिणपोत उपस्थितः । त्वयाप्ययं तावत् पिबत्वित्यनुकम्पिना उपच्छन्दिते उदके स न पुनस्ते अपरिचयाद्धस्ताभ्याशमुपगतः । पश्चात्तस्मिन्नेव मया गृहीते सलिले कृतस्तेन प्रणयः । इत्थं तदा त्वमपहसितः । सर्वस्सगन्धेषु विश्वसिति । द्वावप्यत्रारण्यकाविति ।

२. महाभाग नार्हस्येवं मन्त्रयितुम् । तपोवनसंवर्द्धितोऽनभिज्ञोऽयं जनः कैतवस्य ।

श्रान्तव्यमभूदित्यर्थः । **शृणुमस्तावत्** । विवक्षितं सर्वमुच्यतामिति भावः । उपच्छन्दनमनुवृत्तिः । प्रहसित इति कर्तरि क्तः । सगन्धो बन्धुः । **एवमिति** नाहं विषयी अतस्त्वदनृतवाङ्मधुधाराभिर्नाकृष्ये इत्यर्थः । **नार्हसी**ति । कुत इत्याह तपोवनेति । **स्त्रीणा**मिति । स्त्रीणां मध्ये । अशिक्षितपटुत्वम् । अर्थात् कैतवे । याः प्रतिबोधवत्यः । तासु किमुतेत्यर्थः । अशिक्षितापीयं कैतवे निपुणेत्यर्थः । उक्तं सामान्यं विशेषेणोपपादयति प्रागिति । अन्तरिक्षगमनात् प्राक् उड्डयनशक्त्युदयात् पूर्वम् । अन्यैः काकैः । अत्रार्थापत्तिरप्रस्तुतप्रशंसार्थान्तरन्यासश्च । **हृदयानुमानेने**ति ।

प्रागन्तरिक्षगमनात् स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥ २२ ॥

शकु—[1]अणज्ज अत्तणो हिअआणुमाणेण सव्वं पेक्खसि । को दाणीं अण्णो धम्मकञ्चुकप्पवेसिणो तिणच्छण्णकूवोपमस्स तुह अणुकिदी भविस्सदि ।

राजा—(आत्मगतं) सन्दिग्धबुद्धिं मां कुर्वन्नकैतव इवास्यां कोपो लक्ष्यते । तथा ह्यनया—

मय्येव विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।

---

१. अनार्ये आत्मनो हृदयानुमानेन सर्वं पश्यसि । क इदानीमन्यो धर्मकञ्चुकप्रविष्टस्य तृणच्छन्नकूपोपमस्य तवानुकृतिर्भविष्यति ।

अत्रानुमानशब्देन प्रमाणसामान्यं लक्ष्यते । आत्महृदयं प्रमाणीकृत्येत्यर्थः । आत्मवत् पश्यसीति भावः । उक्तं च । "स्वयमशुद्धः परानाशङ्कते" इति । त्वामिव नृशंसः कोऽपि नेत्याह **कोऽन्य** इति । बहिर्धार्मिष्ठस्य अन्तर्नृशंसस्येत्यर्थः । तव सदृशः कोऽपि नेति भावः । अथ कुपितायास्तस्या अक्षिलौहित्यभ्रूभेदाभ्यामनुभावाभ्यां कोपस्याकृत्रिमत्वमवधार्य सत्ये एव परिणयनेऽनुमन्यमाने सति एवंविधः कोपः स्यादिति परिणयनस्य सत्यत्वं मन्यमानोऽपि शापबलेनानिश्चिन्वान आह **सन्दिग्धे**ति । इयं मया परिणीता न वेति सन्दिग्धा बुद्धिर्यस्य । अविद्यमानं कैतवं यस्मिन् । लक्ष्यते लक्षणैरनुमीयते । अस्याः कोपः अकैतव इव लक्ष्यते अतः मां सन्दिग्धबुद्धिं कुर्वन्नित्यन्वयः । एवं कोपस्याकृत्रिमत्वमुक्त्वा तस्य ज्ञापकहेतुमाह **तथाहीत्या**दिना । तत्र तथाह्यस्याः अक्ष्यतिलौहित्यं भ्रूभङ्गश्चेति विधेयं ज्ञापकद्वयमनूद्य तयोर्भ्रूभङ्गं वर्णयति । **मय्ये-वे**ति । मय्येव न यस्मिन् कस्मिंश्चित्तटस्थे अपितु रहःप्रणयप्रतिबन्धिनि मयि । विस्मरणेन दारुणा निरनुक्रोशा चित्तवृत्तिर्यस्य । प्रणयः परिचयः । अप्रतिपद्यमाने । निमित्ते सप्तमी । निमित्तं च स्मराविषयस्य रोषस्य । स खल्वेवंविधे मय्यास्थानबन्धं कृतवान् । भ्रुवोर्भेदात् भङ्गात् । ल्यब्लोपे पञ्चमी । भ्रूभेदमपदिश्य । शरासनं त्रिभुवनविजयप्रधानसाधनम् । अतिरुषातिरोषेण स्मरविषयेण । तथाहि—मय्येव विस्मरणदारुण चित्तवृत्तौ रहःवृत्तं प्रणयमप्रतिपद्यमाने अनया अतिलोहिताक्ष्या अतिरुषा कुटिलयोर्भ्रु-

भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥ २४ ॥

(प्रकाशं) भद्रे प्रथितं दुष्यन्तचरितं तथापीदं न लक्ष्यते ।

शकु—सुट्ठु दाव अत्तच्छन्दआरिणी किदह्मि । जा अहं इमस्स पूरुवंसप्पच्चएण मुहमहुणो हिअअत्थविसस्स हत्थब्भासं उपअदा ।

[पटान्तेन मुखमावृत्य रोदिति]

शार्ङ्ग—इत्थमात्मकृतं प्रतिहतं चापलं दहति ।

अतः परीक्ष्य कर्तव्यं विशेषात् संगतं रहः ।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥ २५ ॥

राजा—किमत्रभवतीप्रत्ययादेवास्मानसंभृतदोषान् वाक्क्षारेण क्षिणुथ ।

शारद्वतः—(सासूयं) श्रुतं भवद्भिरधरोत्तरम् ।

---

१. सुष्ठु तावदात्मच्छन्दचारिणी कृतास्मि । याहमस्य पूरुवंशप्रत्ययेन मुखमधोर्हृदयस्थविषस्य हस्ताभ्याशमुपगता ।

वोर्भेदात् स्मरस्य शरासनं भग्नमिवेत्यन्वयः । सापह्नवोत्प्रेक्षात्रालङ्कारः । तेन भ्रूगतसंस्थानसौष्ठवातिशयः सकललोकहृदयोन्मादकत्वं च व्यज्यते । अत्र भ्रुवोर्वर्णनं परिणयनस्य सन्देहात् किञ्चिदुन्मिषिताया रतेर्वागारंभानुभावः । पुनरपि शापतिरोहितस्मृतिराह **प्रथितमि**ति । दुष्यन्तचरितमिति प्रबन्धकटाक्षेण । इदं त्वत्परिणयनम् । न लक्ष्यते चरितप्रतिपादकेषु प्रबन्धेषु । **सुष्ठु** सुतराम् । आत्मच्छन्दचारिणी स्वैरिणी असती । अहमेवात्रापराद्धेत्याह **याह**मिति । **पूरुवंशे**ति । आभिजात्यं विश्वस्येत्यर्थः । मुखमधोः मधुरभाषिणः । हृदयस्थविषस्य क्रूरहृदयस्य । हस्ताभ्याशमुपगता वशंवदाभवम् । **इत्थ**मिति । आत्मकृतं स्वयमेव कृतम् । प्रतिहतं मध्ये सान्तरायम् । **अत** इति । सर्वं परीक्ष्य कर्तव्यं रहस्सङ्गतं विशेषादित्यर्थः । कुत इत्याह **अज्ञाते**ति । अत्रभवतीप्रत्ययादेव । अत्रभवत्या वचनमविश्वसनीयमिति भावः । तदुक्तमसहमान आत्मीयानाह **श्रुत**मिति । अत्र काका प्रश्नः । अधरोत्तरं विपर्ययः । यथा भारते "अधर्मेण जितो धर्मः प्रवृत्तमधरोत्तरं शर्मिष्ठयातिवृत्तास्मि दुहित्रा वृषपर्वणः" इति ।

आ जन्मनश्शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य ।
परातिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः ॥ २६ ॥

राजा—भोस्सत्यवादिन् अभ्युपगतं तावदस्माभिरेवम् । किं पुनरिमामतिसन्धाय लभ्यते ?

शार्ङ्ग—विनिपातः ।

राजा—विनिपातः पौरवैः प्रार्थ्यत इति श्रद्धेयमेतत् ।

शारद्वतः—भोश्शार्ङ्गरव किमुत्तरोत्तरेण अनुष्ठितो गुरुसन्देशः । प्रतिनिवर्तामहे वयम् ।

शार्ङ्ग—राजन्

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥ २७ ॥

गौतमि! गच्छाग्रतः ।

[प्रस्थिताः]

शकु—हं इमिणा दाव किदवेण विप्पलद्धह्मि । तुह्मे वि मं परिच्चअह ।

---

१. हं अमुना तावत् कितवेन विप्रलब्धास्मि । यूयमपि मां परित्यजथ ।

राज्ञोक्तमधेरोत्तरं भवद्भिः श्रुत किमु इत्यर्थः । तत्प्रकारमाह **आ जन्मन** इति । विद्येति इयं नः कुलविद्येति । आप्तवाचः विश्वसनीयवाचः । "आप्तः प्रत्ययितः" इति वैजयन्ती । अविदितशाठ्याया अस्या वचनं अप्रमाणं । शाठ्यपण्डितस्य स्वस्य वचनं प्रमाणं किलेत्यर्थः । **भो** इति । "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति न्यायेनाह **किं पुनरि**ति । **विनिपात** इति । लभ्यत इत्यायाति । **विनिपात** इति । श्रद्धेयमिति विपरीतलक्षणा । अश्रद्धेयमित्यर्थः अत्र सत्यमप्यश्रद्धेय न वदेदिति नयो व्यज्यते । **भो** इति । उत्तरोत्तरेण उपर्युपरि व्यवहारेण । तद्विरमेति भावः । कुत इत्याह **अनुष्ठित** इति । अनन्तरकरणीयमाह **प्रती**ति । जिगमिषुः कार्यव्यवहारमुपसहरति **तदेषे**ति । कामचाराभ्यनुज्ञानहेतुमाह **उपपन्ने**ति । हं इति विषादे । **परित्यजथे**ति । अत्र काका

[अनुप्रतिष्ठते]

गौत—(स्थित्वा) वच्छ सङ्गरव अणुगच्छइ खु णो करुणपरिदेविणी सउन्दला। पच्चादेसपरुसे भत्तुणि किं वा मम पुत्तिआ करेदु।

शार्ङ्ग—(सरोषं परावृत्य) पुरोभागे किं स्वातन्त्र्यमवलम्ब्यते।

[शकुन्तला भीता वेपते]

शार्ङ्ग—शकुन्तले!

यदि यथा वदति क्षितिपस्तथा त्वमसि किं पितुरुत्कुलया त्वया?
अथ तु वेत्सि शुचिव्रतमात्मनः पतिकुले तव दास्यमपि क्षमम्॥

तत्तिष्ठ साधयामो वयम्।

राजा—भोस्तपस्विन् किमत्रभवतीं विप्रलपसि।

कुमुदान्येव शशाङ्कस्सविता बोधयति पङ्कजान्येव।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः॥ २९॥

शार्ङ्ग—यदि पूर्ववृत्तमन्यसङ्गाद्विस्मृतो भवान् तदा कथमधर्मभीरुता?

राजा—भवन्तमेव गुरुलाघवज्ञं पृच्छामि।

मूढस्स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः?॥३०॥

---

१. वत्स शार्ङ्गरव अनुगच्छति खलु नः करुणपरिदेविनी शकुन्तला। प्रत्यादेशपरुषे भर्तरि किं वा मम पुत्री करोतु।

यूयं मा परित्यजतेति व्यज्यते। **पुरोभागे** दुष्टे। मास्माननुगम इति भावः। कुत इत्याह **यदी**ति। उत्कुलया उल्लङ्घितकुलाचारया। व्रतं पतिव्रतम्। क्षमं योग्यम्। विप्रलपसि विरुद्धं प्रलपसि। इहस्थितामेनां नाहं स्वीकरिष्यामीत्याह **कुमुदानी**ति। **अधर्मभीरुता**। अधर्मात् परदारगमनलक्षणात्। तथापि परिणयनस्यानिश्चये, न स्वीकर्तव्येत्याह **भवन्त**मिति। मूढः विस्मृतपूर्ववृत्तान्तः। पांसुलः पातकी। राज्ञस-

पुरोहितः—(विचार्य) यदि तावदेवं क्रियतां ।

राजा—अनुशास्तु मां ।

पुरोहितः—अत्र भवती तावदाप्रसवादस्मद्गृहे तिष्ठतु । कुत इदमुच्यत इति चेत् त्वं साधुभिरादिष्टपूर्वः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यतीति । स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि विपर्यये च पितुरस्यास्समीपनयनमवस्थितमेव ।

राजा—यथा गुरुभ्यो रोचते ।

पुरोहितः—वत्से अनुगच्छ मां ।

शकु—भअवदि वसुहे देहि मे विवरम् ।[1]

[रुदती निष्क्रान्ता पुरोधसा सह तपस्विभिश्च]

[राजा शापव्यवहितस्मृतिश्शकुन्तलागतमेव चिन्तयति

नेपथ्ये—आश्चर्यम् ।

राजा—(आकर्ण्य) किन्नुखलु स्यात् ।

(प्रविश्य **पुरोहितस्**सविस्मयः)

देव अद्भुतं खलु संवृत्तम् ।

राजा—किमिव ।

पुरो—परावृत्तेषु कण्वशिष्येषु—

निन्दन्ती सा स्वानि भाग्यानि बाला बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता

राजा—किमन्यत् ?

पुरो—स्त्रीसंस्थानं चाप्सरस्तीर्थमाराादाक्षिप्यैनां ज्योतिरेकं तिरोभूत् ।

---

१. भगवति वसुधे देहि मे विवरम् ।

ङ्कटमवधार्य तन्निवृत्त्युपायं विचार्याह **यदि ताव**दिति । उभयकुलभ्रंशमसहमानाह **भगवती**ति । शकुन्तलागत तद्विषयं वृत्तान्तम । **निन्दन्ती**ति । बाहूत्क्षेप बाहू

[सर्वे विस्मयं रूपयन्ति]

राजा—प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्ट एव किं वृथा तर्केणान्विष्यते। विश्राम्यतु भवान्।

पुरो—विजयस्व।

[इति निष्क्रान्तः]

राजा—वेत्रवति! पर्याकुलोऽस्मि शयनगृहमार्गमादेशय।

प्रती—ईदो देवो।

[परिक्रामतः]

राजा—(स्वगतं)

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम्।
बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम् ॥३१॥

[निष्क्रान्तौ]

पञ्चमोऽङ्कः।

---

१. इतो देवः।

उत्क्षिप्य। चशब्दो यौगपद्यद्योतकः। अतः पृच्छति किमन्यदिति। अन्यदाह स्त्रीसंस्थानमिति। स्त्रीसंस्थानं स्त्रीरूपम्। काममिति। प्रत्याययति तव परिग्रह इति विश्वसयतीत्यर्थः।

इत्यभिरामविरचितेऽभिज्ञानशाकुन्तलदिङ्मात्रदर्शने

पञ्चमोऽङ्कः।

षष्ठोऽङ्कः

[ततः प्रविशति नागरिकः स्यालः पश्चात् बद्धं पुरुषमादाय रक्षिणौ च]

रक्षिणौ—(ताडयित्वा) हंहो[1] कुम्भीलअ कहेहि। कहिंश तुए एशे मणिबन्धणुक्खिण्णणामहेआङ्किए लाअकीए अंगुलीअए शमाशादिए।

पुरुषः—(भीतिनाटितकेन) पशीदन्तु भावमिश्शा। अहके ण ईदिशकम्मकाली।

प्रथ—किंखु[3] शोभणे बह्मणेत्ति कलिअ लण्णा पडिग्गहे दिण्णे।

पुरु—शुणुह दाणीं अहके शक्कावदालवासी धीवले।

---

१. हंहो कुम्भीलक कथय। कस्मिंस्त्वया एतत् मणिबन्धनोत्कीर्णनामधेयाङ्कितं राजकीयमंगुलीयकं समासादितम्।

२. प्रसीदन्तु भावमिश्राः। अहं नेदृशकर्मकारी।

३. किं खलु शोभनः ब्राह्मण इति कृत्वा राज्ञा प्रतिग्रहो दत्तः।

४. शृणुतेदानीं अहं शक्रावतारवासी धीवरः।

एवं शकुन्तलाया राज्ञश्चान्योन्यदर्शनं नेन। तस्याः परिणयनादेर्विस्मरणं नाममुद्रायाः। भ्रंशः गङ्गास्रोतसि परदारधिया निराकृतिः तस्याः। हरणं निराकृतायाः सहसा केनापि योषिदाकृतिना उपपादितान्यधुना भ्रष्टायाः पश्चिमे अङ्गुलीयकस्य। आगमनं मुद्रायाः प्रवेशकेनोपपादयति। **तत** इति। नागरिकः नगरे नियुक्तः। स्यालः राज्ञः कार्योपयोगी हीनजातिः कश्चित्। यथाह धनिकः कार्यसहकारिवर्गगणने— "म्लेच्छाभीरशकाराद्यास्स्वस्वकार्योपयोगिनः। शकारो राज्ञः स्यालो हीनजातिः" रिति "राज्ञः स्यालस्तु राष्ट्रीयः" इत्यमरः। पश्चात् बद्धं बाहू पृष्ठतस्संगमय्य तयोर्बद्धम्। रक्षिणौ रक्षकौ। कुम्भीलकश्चोरः। **कस्मिन्** कस्मिन् स्थले इत्यर्थः। मणिबन्धनेति। मणीनां बन्धेन बद्धेषु मणिषु उत्कीर्णेन उल्लिखितलिपिना नामधेयेनाङ्कितम्। राजकीयं राजसम्बन्धि। समासादितं हृतम्। **भावमिश्राः**। "मान्ये भावेति वक्तव्यं" इति धनिकः। प्रतिगृह्यत इति प्रतिग्रहः देयद्रव्यम्। धीवरो दाशः। "कैवर्ते दाशधीवरौ"

द्विती—[1]पाडच्चर किं अह्मेहिं जादी पुच्छिदे ?

स्यालः—[2]सूअअ कहेदु सव्वं अणुक्कमेण मा णं अन्तला वडिबन्धह ।

उभौ—[3]जं आवुत्ते आणवेदि ।

स्यालः—[4]कहेहि ।

पुरुषः—[5]अहके जालुग्गालादिहिं मच्छबन्धणोवाएहिं कुडुम्बभलणं कलेमि ।

स्यालः—(प्रहस्य) [6]विशुद्धो दाणीं दे आजीवो ।

पुरुषः—[7]भट्टा मा एव्वम् ।

शहजे किल जे विणिन्दिए ण हु दे कम्म विवज्जणीअए ।
पशुमालणकम्मदालुणे अणुअंम्पामिदु एव्व शोत्तिए ॥१॥

---

१. पाटच्चर किमस्माभिर्जातिः पृष्टा ।

२. सूचक कथयतु सर्वमनुक्रमेण मा एनमन्तरा प्रतिबध्नीतम् ।

३. यदावुत्त आज्ञापयति ।

४. कथय ।

५. अहं जालोद्गारादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि ।

६. विशुद्ध इदानीन्ते आजीवः ।

७. भर्तः मैवम् ।

सहजं किल यद्विनिन्दितं न खलु तन् कर्म विवर्जनीयम् ।
पशुमारणकर्मदारुणः अनुकम्पामृदुरेव श्रोत्रियः ॥

त्यमरः । **पाटच्चर** । "चोरैकागारिकस्तेनपाटच्चरमलिम्लुचाः" इत्यमरः । **कथयत्विति** । मैनमन्तरा प्रतिबध्नीतं इति भावः । आवुत्तः स्यालः । जालमानायः । "आनायः पुंसि जालं स्यादि"त्यमरः । मत्स्य निगृह्य तेरित्यर्थादायाति । आजीवः जीवसाधनम् । विशुद्ध इति विपरीतलक्षणा । निकृष्ट इत्यर्थः । तथापि न त्याज्य इत्याह **सहजमिति** । एवेति भिन्नक्रमः । दारुण एवेति । अर्थान्तरन्यासोऽत्राल-

स्यालः—तदो ।

पुरु—अहहे एक्कदिअशे खण्डशो लोहिदमच्छे मए कप्पिदे जाव तश्श उदलब्भन्तले लअणभाउलं अंगुलीअअं दक्खिअ पच्छा अहके शे विक्कआअ दंशअन्ते गहिदे भावमिश्शेहिम् । मालेह वा मुञ्चह वा । इअं शे आअदी ।

स्यालः—जाणुअ विस्सगन्धी गोखादी मच्छबन्धो एव्व दाव णिस्संसअं । अंगुलीअअदंसणं से विमरिसिदव्वं । राअकुलं एव्व गच्छामो ।

रक्षिणौ—तह ।

स्यालः—गच्छ अले गण्डभेदअ ।

[सर्वे परिक्रामन्ति]

स्यालः—सूअअ इमं गोपुरदुवारे अप्पमत्तो पडिपालेह । जाव इमं अंगुलीअअं जह आअमणं भट्टिणो णिवेदिअ तदो लाअसासणं पडिगिहिअ णिग्गच्छामि ।

---

१. ततः ।

२. अथ एकदिवसे खण्डशो रोहितमत्स्यो मया कल्पितः । यावत्तस्योदराभ्यन्तरे रत्नभास्वरमंगुलीयकं दृष्ट्वा पश्चादहमस्य विक्रयाय दर्शयन् गृहीतो भावमिश्रैः । मारयत वा मुञ्चत वा । इयमस्यागतिः ।

३. जानुक विस्रगन्धी गोखादी मत्स्यबन्ध एव तावन्निस्संशयम् । अंगुलीयकदर्शनमस्य विमर्शितव्यम् । राजकुलमेव गच्छामः ।

४. तथा ।

५. गच्छ अरे गण्डभेदक ।

६. सूचक इमं गोपुरद्वारे अप्रमत्तः प्रतिपालय । यावदिममंगुलीयकं यथागमनं भर्तुर्निवेद्य ततो राजशासनं प्रतिगृह्य निर्गच्छामि ।

ङ्कारः । **विस्रगन्धी** । 'विस्रं स्यादामगन्धि य' दित्यमरः । गोखादी मांसाद इत्युपदेशः । मत्स्यबन्धः दाशः । सत्यमनेनोक्तमिति भावः । तावत् तस्मात् । गण्डभे-

उभौ—पविशदु आवुत्ते शामिप्पशादाअ।

[निष्क्रान्तस्स्याल:]

प्रथमः—जाणुअ चिराअदि खु आवुत्ते।

द्वितीयः—णं अवशलोवशप्पणीआ लाआणो।

प्रथमः—जाणुअ पुलन्ति मे हत्था इमश्श वज्झशुमणं पिणद्धुम्।

[पुरुषं निर्दिशति]

पुरु—णोलुहदि भावे अकालणे मालणं कादुम्।

द्विती—(विलोक्य) एशे अह्माणं शामी लेहपत्ते गह्णिअ लाअशाशणं आअच्छइ। शुणो मुहं दक्खदि गिद्धबली वा भविश्शदि।

(प्रविश्य स्याल:)

सूचक, मुञ्चेदु एसो जालोपजीवी। उववण्णो किल से अंगुलीअस्स आअमो।

सूच—जह भणादि भवम्।

---

१. प्रविशत्वावुत्तस्स्वामिप्रसादाय।

२. जानुक चिरायते खल्वावुत्तः।

३. नन्ववसरोपसर्पणीया राजानः।

४. जानुक स्फुरतो मे हस्तावस्य वध्यसुमनसं पिनद्धुम्।

५. नार्हति भावः अकारणे मारणं कर्तुम्।

६. एषोऽस्माकं स्वामी लेखपत्रे गृहीत्वा राजशासनं आगच्छति। शुनो मुखं द्रक्ष्यति गृध्रबलिर्वा भविष्यति।

७. सूचक मुच्यतामेष जालोपजीवी। उपपन्नः किलास्यांगुलीयकस्यागमः।

८. यथा भणति भवन्।

जानुक इति गण्डभेदक। स्फुरत. प्रसरत। वध्यसुमनस वध्यचिह्नभूतां मालाम्। गृध्रबलिरिति। अयमिति शेष। अस्य वधमात्र वा शूलारोहणं वा भविष्यति [illegible]

जानु—ऐशे[1] जमशदणं पेक्खिअ पडिणिवुत्ते।

[पुरुषं मुक्तबन्धनं करोति]

पुरु—(स्यालं प्रणम्य) तव[2] केलए मे जीविदे।

स्यालः—एसो[3] भट्टिणा अंगुलीअअमुल्लसम्मिदो पारितोसिओ दिण्णो।

[पुरुषायार्थं प्रयच्छति]

पुरु—(सप्रणामं प्रतिगृह्य) भट्टालकेण[4] अणुग्गाहिदह्मि।

सूच—दे[5] णाम अणुग्गाहिदे जे सूलादो ओदारिअ हत्थिक्कन्धे पडिट्ठिदे।

जानु—आवुत्त[6] लण्णो पलिदोशं कहेहि तेण अंगुलीअएण भट्टिणो शम्मदेण होदव्वम्।

स्यालः—ण[7] तस्सिं महारुहं रअणं भट्टिणो बहुमदं त्ति तक्केमि। तस्स दंसणेण को वि अहिमदो भट्टिणो जणो सुमरिदो। मुहुत्तअं पकिदिगंभीरो पि पज्जूसुअणअणो आसि।

१. एष यमसदनं दृष्ट्वा प्रतिनिवृत्तः।

२. तव केरकं मे जीवितम्।

३. एष भर्त्रा अंगुलीयकमूल्यसम्मितः पारितोषिको दत्तः।

४. भट्टारकेणानुगृहीतोऽस्मि.

५. ते नामानुगृहीताः ये शूलादवतार्य्य हस्तिस्कन्धे प्रतिष्ठिताः।

६. आवुत्त राज्ञः परितोषं कथय। तेनांगुलीयकेन भर्त्तुस्सम्मतेन भवितव्यम्।

७. न तस्मिन् महार्हं रत्नं भर्तुर्बहुमतमिति तर्कयामि। तस्य दर्शनेन कोऽपि अभिमतो भर्तुर्ज्जनस्स्मृत। मुहूर्तं प्रकृतिगंभीरोऽपि पर्युत्सुकनयन आसीत्।

तव केरकं त्वदीयम्। पारितोषिकः अर्थः। भट्टारक इति पूज्यवाची। **ते नाम** इति।

सूच—शेविदं णाम आवुत्तेण ।

जानु--णं भणामि इमश्श किदे मच्छशत्तुणेत्ति ।

[पुरुषमसूयया पश्यति]

पुरु--ईदो वि अद्धं भट्टालके तुह्माणं शुमणोमुल्लं होदु ।

जानु--एत्तके जुज्जइ ।

स्यालः--धीवेल महत्तरं पिअवअस्सो दाणीं संवुत्तो । कादंबरिसिक्खिअं अह्माणं पुढमं सोहिदं इच्छीअदि। तेण सुण्डिआभवणं एव्व पविसामो ।

पुरु--तह ।

[निष्क्रान्तास्सर्वे]

(प्रवेशकः)

---

१. सेवितं नाम आवुत्तेन ।

२. ननु भणाम्यस्य कृते मत्स्यशत्रोरिति ।

३. इतोऽप्यर्धं भट्टारका युष्माकं सुमनोमूल्यं भवतु ।

४. एतद्युज्यते ।

५. धीवर महत्तरं प्रियवयस्य इदानीं संवृत्तः । कादंबरीसाक्षिकमस्माकं प्रथमं सौहृदमिष्यते। तेन शुण्डिकाभवनमेव प्रविशामः ।

६. तथा ।

नामेत्यवधारणे । प्रतिष्ठिताः स्थापिताः । **कादम्बरी** मद्यम् । शुण्डिका तत्सम्पादयित्री ।

एवं राज्ञोऽङ्गुलीयस्य दर्शनं तेन तत्क्षणात् । मुनिशापनिवृत्तिश्च कान्तायास्स्मरणं ततः । एतानि सूचितान्यत्र प्रवेशे सूच्यतेऽधुना । तस्यैवानन्तरावस्था पात्रैरङ्कमुखोदितैः । **तत** इति । सन्त्यक्ता सा प्रियेणैवमनुयान्ती पुरोहितं । कयाचिद्दिव्यया नीता मारीचस्य तपोवनम् । शुश्रूषमाणया तत्र तदर्न्नां दक्षसम्भवां । मात्रा मेनकया सार्द्धं न्यवसत्सा-तपोवने । मारीचस्याश्रमे तत्र निवसन्ती शकुन्तला । असूत तनयं साध्वी दिक् प्राचीव दिवाकरम् । सुतेन सह सा तत्र निवसन्ती कदाचन । आसीद्वसन्तसमये प्रेयोविरहविह्वला । विवशा साप्सरस्तीर्थसान्निध्यं कर्तुमुद्यता । सखीं सानुमतीं नाम सन्दिदेश समुत्सुका । प्रविश्य हास्तिनपुरं सखि सानुमति त्वया । मम प्रियतमोदन्त. प्रत्यक्षीक्रिय-

[ततः प्रविशत्याकाशयानेन सानुमती नामाप्सराः]

सानु—णिव्वत्तिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसण्णिद्धम् । दाणीं साहुजणस्स अहिसेअकालो त्ति सम्पदं इमस्स राएसिणो उदन्तं पच्चक्खीकरिस्सम् । मेणआसंबन्धेण सरीरभूदा दाणीं मे सउन्दला । ता एतण्णिमित्तं सन्दिट्ठपुरुव्हि । (समन्तादवलोक्य) किण्णुखु उच्छवे वि णिरुच्छवारंभं विअ एदं राअउळं दीसइ । अत्थि खु मे विहवो णिज्झाणेण सव्वं परिण्णादुम् । किंदु सहीए मे आदरो माणइदव्वो । होदु इमाणं दाव उज्जाणपालिआणं तिरक्खरणीपडिच्छण्णा पस्सपरिवट्टिणी भविअ उवलभिस्सम् ।

[नाट्येनावतीर्य स्थिता]

[ततः प्रविशति चूतांकुरमवलोकयन्ती चेटी । अपरा च पृष्ठतोऽस्याः]

प्रथमा—आअम्महरिअपण्डरजीविअसव्वं वसन्दमासस्स ।
दिट्ठिअ चूदङ्कुरअ उदुमङ्गळअं तुमं खु पेक्खामि ॥ २ ॥

---

८. निर्वर्तितं मया पर्यायनिर्वर्तनीयं अप्सरस्तीर्थसान्निध्यम् । इदानीं साधुजनस्याभिषेककाल इति साम्प्रतमस्य राजर्षेरुदन्तं प्रत्यक्षीकरिष्ये । मेनकासंबन्धेन शरीरभूता इदानीं मे शकुन्तला । तया तन्निमित्तं सन्दिष्टपूर्वास्मि । किन्नुखलूत्सवेऽपि निरुत्सवारंभमिवैतद्राजकुलं दृश्यते । अस्ति खलु मे विभवः निध्यानेन सर्वं परिज्ञातुम् । किन्तु सख्या आदरो मानयितव्यः । भवतु एतयोस्तावदुद्यानपालिकयोः तिरस्करणीप्रतिच्छन्ना पार्श्ववर्तिनी भूत्वा उपलप्स्ये ।

२. आताम्रहरितपाण्डरजीवितसर्वं वसन्तमासस्य ।
दिष्ट्या चूताङ्कुरक ऋतुमङ्गलं त्वां खलु पश्यामि ॥

तामिति । निर्वर्तितस्वकार्यैव तत्प्रस्थिता सुराङ्गना । विशन्ती हस्तिनपुरं प्राह **णिव्वत्तिदं** इति । पर्याये अवसरेऽपि. वारक्रमेण निर्वर्तनीयम् । **उत्सवेऽपि** । उत्सवोचितकाले ऽपि । निध्यानेन दिव्यदृष्ट्या । "निध्यानमवलोकनं" मिति वैजयन्ती । सख्या आदरो मानयितव्यः । मां चक्षुषा प्रत्यक्षीकरणं शकुन्तलया सन्दिष्टम । तत्तथाकर्तव्यमित्यर्थः । उद्यानपालिके दृष्ट्वाह **भवत्विति** । **आताम्रे**ति । हरित **श्यामम्** ।

द्वितीया—परहुदिए किं एदं एआइणी मन्तेसि ।

प्रथ—महुअरिए चूअकलिअं दक्खिअ उम्मत्तआ परहुदिआ होदि-ण्णु ।

द्विती—(सहर्षं त्वरयोपगम्य) कहं उवट्ठिओ महुमासो ।

प्रथ—महुआरिए तुह दाणीं कालो एस समदविब्भमुग्गीदाणम् ।

द्विती—सहि ओलम्ब मं जाव णं अग्गपादट्ठिआ भविअ चूदङ्कुरं गिण्हिअ कामदेव्वच्चणं करेमि ।

प्रथमा—जइ मम वि अद्धं अच्चणफलस्स ।

द्वितीया—अभणिदे वि एवं एव्वं संपज्जइ । जदो एक्कं एव्व णो जीविदं दुहा ट्ठिअं सरीरम् ।

---

१. परभृतिके किमेतदेकाकिनी मन्त्रयसे ।

२. मधुकारिके चूतकलिकां दृष्ट्वा उन्मत्ता परभृतिका भवति ननु ।

३. कथमुपस्थितो मधुमासः ।

४. मधुकारिके तवेदानीं काल एष समदविभ्रमोद्गीतानाम् ।

५. सखि अवलंबस्व मां यावदेनमग्रपादस्थिता भूत्वा चूताङ्कुरं गृहीत्वा कामदेवार्चनं करोमि ।

६. यदि ममाप्यर्धमर्चनफलस्य ।

७. अभणितेऽप्येतदेवं सम्पद्यते । यत एकमेवावयोर्जीवितम् । द्विधा स्थितं शरीरम् ।

जीवितानां सर्वजीवितम् । वसन्तमासस्य मधुमासस्य । पश्यामि दृश्यबुध्यावलोकयामि । मन्त्रयसे इति । किमुपक्रान्तासीति भावः । श्लेषवक्रोक्त्या प्रतिवक्ति मधुकारिके इति । ननु अहं हि परभृतिका कोकिला इति । मधुकारिके इति । अत्रापि पूर्ववक्रोक्तिः । त्वं हि मधुकारिका भृङ्गी । अर्चनफलस्येति । तदवलम्बस्वेति भावः ।

[सख्यावलम्बिता चूतांकुरं गृह्णाति]

अम्महे अप्पडिबुद्धो वि चूदप्पसवो एस बन्धणभंगसुरही होदि ।

(कपोतकं कृत्वा)

तुमसि मए चूदङ्कुर दिण्णो कामस्स गहिदधणुअस्स ।
पहिअजणजुवइलक्खो पञ्चब्भहिओ सरो होहि ॥ २ ॥

[चूतांकुरं विक्षिपति]

(प्रविश्यापटाक्षेपेण कुपितः कांचुकीयः)

मा तावदनात्मज्ञे देवेन प्रतिषिद्धे वसन्तोत्सवे किमाम्रकलिकाभङ्गमारभसे? ।

उभे—(भीते) पसीददु अज्जो अगहिदत्था अम्ह ।

कांचु—न किल श्रुतमाभ्याम् । यदा वासन्तिकैस्तरुभिरपि देवशासनं प्रमाणीकृतं तदाश्रयिभिश्च । तथाहि—

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरवकं तत् कोरकावस्थया ।

---

१. अम्महे अप्रतिबुद्धोऽपि चूतप्रसव एष बन्धनभंगसुरभिर्भवति ।

२. त्वमसि मया चूताङ्कुर दत्तः कामाय गृहीतधनुषे ।
पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकश्शरो भव ॥

३. प्रसीदत्वार्यः अगृहीतार्थे आवाम् ।

अम्महे । आश्चर्यम् । अप्रतिबुद्धः अविकसितः । बन्धनं वृन्तम् । "वृन्तं प्रसवबन्धन" मित्यमरः । कपोतकं अञ्जलिम् । **त्वमसीति** । अर्चनमर्थमेतत् । **मा तावदिति** । विरुद्धमेतदित्यर्थः । किं तदित्याह **देवेनेति** । कलिका मञ्जरी । अज्ञानादेव कृतमित्याह **प्रसीदत्विति** । अज्ञानस्यासम्भावनमाह **न किलेति** । किलेत्यसम्भावनायाम् । "वार्तासम्भाव्ययोः किल" इत्यमरः । कुत इत्याह **यदेति** । यदा । यदीत्यर्थः । तरुभिः अचेतनैरपि । तदाश्रयिभिः पुंस्कोकिलादिभिः । उक्तमुपपादयति **तथाहीत्यादिना** ।

कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम् ॥ ४ ॥

सानु—ण एत्थ सन्देहो महप्पभावो राएसि ।

चेट्यौ—अज्ज कइ दिअहाइ अह्माणं मित्तावसुणा रट्टिएण भट्टिणो पादमूलं पेसिदाणम् । इह अ अह्माणं पमदवणस्स सअलं पडिकम्मं समप्पिदम् । ता आअन्तुअदाए ण सुदपुरुवो अह्माणं एस वुत्तन्तो ।

कांचु—भवतु न पुनरेवं प्रवर्तितव्यम् ।

उभे—अज्ज कोदूहलं णो जइ इमिणा जणेण सोदव्वं कहेदु अज्जो किण्णिमित्तं भट्टिणा वसन्तूसवो पडिसिद्धो ।

सानु—ऊसवप्पिआ खु माणुसा ता गुरुणा कालणेण होदव्वम् ।

कांचु—बहुलीभूतमेतत् किं न कथ्यते । किमत्रभवत्योः कर्णपथं न तदायातं शकुन्तलाप्रत्यादेशकौलीनम् ।

उभे—आम सुदं रट्टिअमुहादो जाव अङ्गुलीअअदंसणम् ।

---

१. नात्र सन्देहः महाप्रभावो राजर्षिः ।

२. आर्य कतिचित् दिवसान्यावयोर्मित्रावसुना राष्ट्रियेण भर्तुः पादमूलं प्रेषितयोः । इह चावयोः प्रमदवनस्य सकलं प्रतिकर्म समर्पितम् । तदागन्तुकतया न श्रुतपूर्व आवयोरेष वृत्तान्तः ।

३. आर्य कौतूहलं नौ यद्यनेन जनेन श्रोतव्यं कथयत्वार्यः किन्निमित्तम् भर्त्रा वसन्तोत्सवः प्रतिषिद्धः ।

४. उत्सवप्रियाः खलु मनुष्याः तत् गुरुणा कारणेन भवितव्यम् ।

५. आं श्रुतं राष्ट्रियमुखात् यावदङ्गुलीयकदर्शनम् ।

वस्थयावस्थितमित्यन्वयः । कलिकेति कुरवकमिति च जातावेकवचनम् । **नात्रे**ति - अत्र स्मरावस्थायाम् । कुत इत्याह महाप्रभाव इति । उत्सवप्रतिषेधस्याश्रवणे साङ्गतिमाह **आर्ये**ति । कतिचित् द्वित्राणि । राष्ट्रियेण राष्ट्रे नियुक्तेन । प्रतिकर्म उत्कर्षाधानम् । **कौतूहलमि**ति । अस्तीति शेषः । यदीति । तर्हीत्यर्थात् । किं जिज्ञासितमित्याह किं निमित्तमित्यादि । बहुलीभूत व्याप्तम् । कौलीनं जनवादः । आम इत्य-

काञ्चु—तेन ह्यल्पं कथयितव्यम्। यदैव खलु स्वाङ्गुलीयकदर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा मया तत्रभवती रहसि शकुन्तला मोहात् प्रत्यादिष्टेति। तदाप्रभृत्येव पश्चात्तापमुपगतो देवः।

रम्यं द्वेष्टि यथापुरं प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्याप्रान्तविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम्॥ ५॥

सानु—पिअं मे[1]।

कांचु—तस्मात् प्रभवतो वैमनस्यादुत्सवप्रत्याख्यानम्।

उभे—जुज्जइ[2]।

नेपथ्ये—एदु भवम्[3]।

कांचु—अये इत एवाभिवर्तते देवः। स्वकर्मानुष्ठीयताम्।

उभे—तह[4]।

[निष्क्रान्ते]

[ततः प्रविशति पश्चात्तापसदृशवेषो राजा विदूषकः प्रतीहारी च]

काञ्चु—(राजानमवलोक्य) अहो सर्वास्ववस्थासु रमणीयत्वमाकृतिविशेषाणाम्। तथा हि एवमुत्सुकोऽपि प्रियदर्शनो देवः।

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं
बिभ्रत् काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः।
चिन्ताजागरणप्रतान्तनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते॥ ६॥

---

१. प्रियं मे।
२. युज्यते।
३. एतु भवान्।
४. तथा।

तुमतौ। **रम्यमिति**। लोके यद्यदाह्लादकं [illegible] तत्तद्द्वेष्टि। [illegible]जकत्वात्- यथापुरं पूर्ववत्। दाक्षिण्येन पूर्वकृतानुरागानुरोधेन। उचिताम् [illegible]। गोत्रेषु नामसु। **प्रत्यादिष्टेति**। उपरक्तः [illegible]रागः। तेजोगुणात् [illegible] न [illegible]नासौ न कु-

सानु — (राजानं दृष्ट्वा) ठाणे क्खु पच्चादेसविमाणिदा वि इमस्स किदे सउन्दला किलमइ ।

राजा — (ध्यानमन्दं परिक्रम्य)

प्रथमं सारंगाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् ।
अनुशयदुःखायेदं हतहृदयं संप्रति विबुद्धम् ॥ ७ ॥

सानु — णं ईरिसाणि तवस्सिणीए भाअहेआणि ।

विदू — (अपवार्य) लंघिदो एसो भूओ वि सउन्दलावाहिणा । ण आणे कहं चिइच्छिदव्वो भविस्सदित्ति ।

कञ्चु — (उपगम्य) जयतु देवः । महाराज! प्रत्यवेक्षिताः प्रमदवनभूमयः । यथाकाममध्यास्तां विनोदनस्थानानि महाराजः ।

राजा — वेत्रवति मद्वचनादमात्यमार्यपिशुनं ब्रूहि । चिरप्रबोधान्न संभावितमस्माभिरद्य धर्मासनमध्यासितुम् । यत् प्रत्यवेक्षितं पौरकार्यमार्येण तत् पत्रमारोप्य दीयतामिति ।

१. स्थाने खलु प्रत्यादेशविमानिताप्यस्य कृते शकुन्तला क्लाम्यति ।
२. ननीदृशानि तपस्विन्या भागधेयानि ।
३. लङ्घित एष भूयोऽपि शकुन्तलाव्याधिना । न जाने कथं चिकित्सितव्यो भविष्यतीति ।

स्थाने । उल्लिखितः । उत्तेजितः । नालक्ष्यते । दृष्टिप्रतिघातात् । अत्र निद्राच्छेदतनुतादिपर्यनिरूपणस्यसूचिताः । चिन्तानिश्वासग्लान्यभूषणानि च । इदानीमुन्मादावस्था प्रारभ्यते । तस्याकृतेर्लोकोत्तरगुणविशिष्टत्वमवधार्याह **स्थाने** इति । एवं मुद्रालोका..संस्मृतानि जवक्षमापरित्यागः । हृदयमुपालभते स्व पश्चात्तापेन परवशो राजा । **प्रथम**मिति । प्रथमं प्रियतमासमागमसुखानुभवे उपनते सति । सुप्तं जडम् । अनुन्मेषम् । सारङ्गाक्ष्येति तदानीं तदवस्थास्मरणानुभावः । अनुशयदुःखाय । अनुशयः पश्चात्तापः अनुशयदुःखमनुभावितुम् । हतं अस्पृष्टमुक्तगन्धम । सम्प्रति तस्यामसुलभदर्शनायाम । विबुद्धं सोन्मेषम् । अत्र निर्वेदाख्यो व्यभिचारी व्यज्यते । **नन्वि**ति । ईदृशानि अतिमहान्ति । भागधेयानीति कार्ये कारणोपचारः । ननीदृशोऽस्य तस्यामनु-

प्रति—जं देवो आणवेदि ।[1]

[निष्क्रान्ता ।]

राजा—वातायन त्वमपि नियोगमशून्यं कुरु ।

[निष्क्रान्तः कञ्चुकी ।]

विदू—किदं भवदा णिम्मक्खिअम् । संपदं सिसिरातवच्छेदरमणिज्जे इमस्सिं पमदवणुद्देसे सुहं अत्ताणं रमइस्ससि ।[2]

राजा—रन्ध्रोपनिपातिनो विनिपाता इति यदुच्यते तदव्यभिचारि वचः । कुतः—

मुनिसुताप्रणयस्मृतिरोधिना
मम च मुक्तमिदं तमसा मनः ।
मनसिजेन सखे प्रहरिष्यता
धनुषि चूतशरश्च निवेशितः ॥ ८ ॥

विदू—चिट्ठ दाव इमिणा दण्डकट्ठेण कन्दप्पवाहिं णासेमि ।[3]

राजा—(सस्मितम्) भवतु दृष्टं ब्रह्मवर्चसम् । सखे क्वोपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टिं विलोभयामि ।

---

१. यद्देव आज्ञापयति ।

२. कृतं भवता निर्मक्षिकम् । साम्प्रतं शिशिरातपच्छेदरमणीयेऽमुष्मिन् प्रमदवनोद्देशे सुखमात्मानं रमयिष्यति ।

३. तिष्ठ तावदमुना दण्डकाष्ठेन कन्दर्पव्याधिं नाशयामि ।

राग इत्यर्थः । **शिशिरातपच्छेदो** वसन्तारम्भः । सुखं अश्रमेण । आत्मानं मन । **रन्ध्रेति** । रन्ध्रे छिद्रे । अव्यभिचारि सत्यम् । **मुनिसुतेति** । प्रणय प[illegible] । तमसा अज्ञानेन । अत्रचशब्दौ भिन्नक्रमौ क्रिययोर्यौगपद्य द्योतयतः । [illegible] दुर्विषहत्व व्यज्यते । समुच्चयोऽत्रालङ्कारः । "गुणक्रियायौगपद्य समुच्चयः" इति । अतिशयोक्तिश्च । "कार्यकारणयोस्समकालत्वे पौर्वापर्यविपर्यये चातिशयोक्तिः" इति । अत्र समकालत्वम् । **ब्रह्मवर्चसं** ब्राह्म तेजः । विनोदस्थलं पूर्वमेव हि [illegible]

विदू—णं मालदिआ चदुरिआ भवदा सन्दिट्ठा माहवीमण्डवे इमं वेळं अदिवाहइस्सम्। तहिं मए चित्तफलए सहत्थलिहिदं तत्तहोदीए सउन्दलाए पडिकिदिं आणेहि त्ति।

राजा—ईदृशं हृदयविनोदनस्थानम्। तत्तमेव मार्गमादेशय।

विदू—इदो भवम्।

[निष्क्रामतः। सानुमती अनुगच्छति]

विदू—एसो मणिसिलापट्टअसणाहो माहवीमण्डवो उपआररमणिज्जदाए णिस्संसअं साअदेण विअ णो पडिच्छइ। ता पविसिअ णिसीददु भवम्।

[उभौ प्रविश्योपविशतः]

सानु—लदासंसिदा पेक्खिस्सं दाव सहीए पडिकिदिम्। तदो से भत्तुणो बहुमुहं अणुराअं णिवेदइस्सम्।

[तथा कृत्वा स्थिता]

राजा—सखे सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृत्तान्तम्। कथितवानस्मि भवते च। स भवान् प्रत्यादेशवेलायां मत्सकाशमुपगतो नासीत्। पूर्वमपि न त्वया कदाचित् सङ्कीर्तितं नाम तत्रभवत्याः। कच्चिदहमिव विस्मृतवांस्त्वमपि।

१. ननु मालतिका चतुरिका भवता सन्दिष्टा माधवीमण्डप इमां वेलामतिवाहयिष्यामि। तत्र मया चित्रफलके स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिमानयेति।

२. इतो भवान्।

३. एष मणिशिलापट्टकसनाथो माधवीमण्डप उपचाररमणीयतया निःसंशयं स्वागतेनेव नौ प्रतीच्छति। तत् प्रविश्य निषीदतु भवान्।

४. लतासंश्रिता प्रेक्षिष्ये तावत् सख्याः प्रतिकृतिम्। ततोऽस्या भर्तुर्बहुमुखमनुरागं निवेदयिष्यामि।

[illegible]। [illegible]। [illegible]। सन्देशप्रकारमाह [illegible] अवेलादि। लतासंसिदा [illegible] कथयति। लतान्तरेहि-

विदू—ण विसुमरामि। किन्तु सव्वं कहिअ अवसाणे तुए परिहासविअप्पो एसो ण भूदत्थो त्ति आचक्खिदम्। मए उण मिप्पिण्डबुद्धिणा तह एव्व गहिदं अहव भविदव्वदा बलवइ।

सानु—एव्वं एदम्।

राजा—(ध्यात्वा) सखे परित्रायस्व माम्।

विदू—भो किं एदं अणुववण्णं खु ईदिसं तुइ। ण कदा वि सप्पुरुसा सोअवत्तव्वा होन्ति। णं पवादे वि णिक्कम्पा गिरओ।

राजा—वयस्य निराकरणविक्लवायाः प्रियायास्समवस्थामनुस्मृत्य बलवदशरणोऽस्मि। सा हि—

इतः प्रत्यादिष्टा स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।
मुहुर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति माम् ॥९॥

सानु—अम्महे ईदिसी सकज्जपरदा। इमस्स सन्दावेण अहं रमामि।

---

१. न विस्मरामि। किन्तु सर्वं कथयित्वा अवसाने त्वया परिहासविजल्प एषः न भूतार्थ इति आख्यातम्। मया पुनर्मृत्पिण्डबुद्धिना तथैव गृहीतम्। अथवा भवितव्यता बलवती।

२. एवमेतत्।

३. भोः किमेतत्। अनुपपन्नं खलु ईदृशं त्वयि। न कदापि सत्पुरुषाश्शोकप्रतप्ता भवन्ति। ननु प्रवातेऽपि निष्कम्पा गिरयः।

४. अम्महे ईदृशी स्वकार्यपरता। अमुष्य सन्तापेनाहं रमे।

तेति भावः। [illegible] **अख्यात**-मिति। "[illegible] [illegible] स्थ [illegible] **यच**-स्यैत। **इत** इतः। [illegible] [illegible]त्वं च। क्रूर [illegible] [illegible]। आभिना दृष्टिरिति पर्यवस्यति। विशिष्टाया दृष्टेव विशिष्टशल्यसाम्यं स्यात्। **स्वकार्य**

विदू—[1]अत्थि मे तक्को केण वि आआसचारिणा तत्तहोदी णीदत्ति।

राजा—कः पतिदेवतामन्यः परामृष्टुमुत्सहेत। मेनका किल सख्यास्ते जन्मप्रतिष्ठेति श्रुतवानस्मि। तत्सहचारिणीभिस्सखी ते हृतेति हृदयमाशङ्कते।

सानु—[2]सम्मोहो विम्हअणीओ ण पडिबोहो।

विदू—[3]जइ एव्वं अत्थि खु समाअमो कालेण मए विदिओ तत्तहोदीए।

राजा—कथमिव।

विदू—[4]ण खु मादापिदरो भत्तुविओअदुक्खिअं दुहिदरं पेक्खिदुं चिरं पारेन्ति।

---

१. अस्ति मे तर्कः केनाप्याकाशचारिणा तत्रभवती नीतेति।

२. सम्मोहः विस्मयनीयः न प्रतिबोधः।

३. यद्येवं अस्ति खलु समागमः कालेन मया विदितस्तत्रभवत्याः।

४. न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं द्रष्टुं चिरं पारयतः।

शकुन्तलाश्वासनम्। किन्त्वित्याह अमुष्येति। **अपनीतेति**। तत्रेत्याह मेनकेति। प्रतिष्ठा जन्मकारणम्। * सम्मोहः उन्मादावस्था। विस्मयनीयः। वस्तुवृत्तप्रतिभानात्। न प्रतिबोधः। स्वदारान् प्रति परदारत्वप्रतीतिः। **विदितः**। ऊहेन। कथमित्याह **न खल्वि**ति। अतो मेनका तां त्वया संयोजयिष्यतीत्यर्थः। तत्रेत्येहि

---

* वस्तुतस्तु—सम्मोहः भ्रमः। स्वदारेषु परदारत्वबुद्धिरूपः विस्मयनीयः। एवंविधयाथार्थ्यज्ञानहेतुप्रतिभाशालिनि कथञ्चिदप्यस्मिन् भ्रमस्यासम्भाव्यत्वादसम्भाव्यसम्भव इत्याश्चर्यहेतुः। न प्रतिबोधः। प्रतिबोधस्यैव प्रतिभाशालिनोऽस्य स्वभावसिद्धत्वात्। इत्येवार्थस्साधीयान् प्रतिभाति।

राजा— वयस्य—

स्वप्नो नु माया नु मतिभ्रमो नु क्लिष्टं नु तावत् फलमेव पुण्यम् ।
असन्निवृत्त्यै तदतीतमेते मनोरथा नाम तटप्रपाताः ॥१०॥

विदू— मा एव्वं णं अङ्गुलीअअं एव्व णिदंसणं अवस्संभाविणो अचिन्तणिज्जो समाअमो होदित्ति ।

राजा—अये इदं तावदसुलभस्थानभ्रंशि शोचनीयम् ।

तव सुचरितमङ्गुलीय नूनं प्रतनु ममेव विभाव्यते फलेन ।
अरुणनखमनोहरासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु ॥११॥

सानु— जइ अण्णहत्थगअं भवे सच्चं एव सोअणिज्जम् ।

---

१. मैवम् । नन्वङ्गुलीयकमेव निदर्शनं अवश्यंभाविनोऽचिन्तनीयस्समागमो भवतीति ।

२. यद्यन्यहस्तगतं भवेत्सत्यमेव शोचनीयम् ।

स्वप्नो न्विति असन्निवृत्त्यै । अतीतं तादित्यनुभूतदयितासमागमसुखप्रकारम् । तस्य न सन्निवृत्तिरित्यर्थः । उक्तमर्थमन्देहैर्द्रढयति स्वप्नो नु स्वाप्नं वस्तु नु । माया नु ऐन्द्रजालिकादिनिर्मितं वस्तु नु । मतिभ्रमो नु मतिभ्रमात् प्रतीतं वस्तु नु । यथा रज्ज्वां सर्पः । क्लिष्टं क्षीणम् । तावत्फलं यावत्क्षयफलम् । पुण्यफलभोगेन क्षीणं पुण्यं नु इत्यर्थः । एवमतीतस्य तस्यासन्निवृत्तिं सन्देहैरुपपाद्य तस्यात्ययं विशेषरूपं सामान्येनोपपादयति **एत** इति । एते लोके दृश्यमाना मनोरथाः मनोरथफलानि । तटप्रपाताः तटस्य नदीकूलस्य प्रपात इव झटिति प्रपातो येषां ते तथा । प्रपातो विनाशः नद्यां पतनं च । नाम प्रसिद्धौ । * अत्र सन्देहोऽर्थान्तरन्यासश्च । **निदर्शन**मिति । अत्रेति शेषः । निदर्शनं दृष्टान्तः । उन्मादावस्थामुपगतः प्रमद्वादङ्गुलीयकमचेतनं चेतनवदनुशोचति **इद**मिति । असुलभं सुकृतशतलभ्यं । **तवे**ति । प्रतनु अल्पम् । विभाव्यते अनुमीयते । फलमाह **अरुणे**ति । अरुणत्वेन परभागलाभो व्यज्यते । तस्या अंगुलीषु लब्धपदं त्वं ततश्च्युतमसीति । यदित्यन्वयः । अंगुलीयकमिदानीमभ्युन्नतावस्थितं अतो न शोचनीयमित्याह **यदी**ति । तदीयस्थानात् ।

* मनोरथानां अतटप्रपाताः इति च्छेदं कृत्वा वा व्याख्येयम् । यथा एते त्वत्संभाविताः समागमः । प्रपाता इति विधेयप्राधान्यात् बहुवचनम् । समागमप्रकारा इति वा । मनोरथानां अतटप्रपाताः दुरारोहाणि शृङ्गाणि । समागमप्रार्थना मनोरथस्याप्यतिभूमिरित्यर्थः । 'मनोरथानामगतिर्नविद्यते' इति कुमारसंभवश्लोकपादस्यैव भङ्ग्यान्तरमिदम् ।

विदू—भो ईअं णाममुद्दा केण उवाएण तत्तहोदीए हत्तसंसग्गं पाविदा ।

सानु—ममं वि कोदूहलेण आआरिदो एसो ।

राजा—श्रूयतां—तदा स्वनगराय मां प्रस्थितं प्रिया सबाष्पमिद‌माह । कियच्चिरेणार्यपुत्रः प्रतिपत्तिं दास्यतीति ।

विदू—तदो ।

राजा—पश्चादिमां नाममुद्रां तदङ्गुलौ निवेशयता मया प्रतिज्ञातम् ।

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तं ।
तावत् प्रिये मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपेष्यतीति ॥१२॥

तच्च दारुणेन मया मोहान्नानुष्ठितम् ।

सानु—रमणीओ खु ववही विहिणा सम्पाहिओ ।

विदू—कहं णु धीवलकप्पिअस्स लोहिअमच्छस्स उदलब्भन्तले आसि ।

---

१. भो इयं नाममुद्रा केनोपायेन तत्रभवत्या हस्तसंसर्गं प्रापिता ।
२. ममापि कौतूहलेन आकारित एषः ।
३. ततः ।
४. रमणीयः खलु व्यवधिर्विधिना सम्पादितः ।
५. कथं नु धीवरकल्पितस्य रोहितमत्स्यस्य उदराभ्यन्तर आसीत् ।

आकारितः । अंकुरितः । एषः प्रश्नः । श्रूयतामिति । अवहितो भवेत्यर्थः । प्रतिपत्तिं प्राप्तिम् । अभिधानप्रकारमाह **एकैकमिति** । स्पष्टोऽयम् । मोहात् विस्मरणात् । व्यवधिः व्यवधानं तिरोधानम् । एवंविधस्यानुरागस्य विस्मारकम । विधिना । प्रति-

राजा—शचीतीर्थं वन्दमानायाः किल सख्यास्ते हस्तात् गङ्गास्रोतसि परिभ्रष्टम् ।

विदू—जुज्जइ[1] ।

सानु—अदो तपस्सिणीए सउन्दलाए अधम्मभीरुणो राएसिणो परिणए सन्देहो । अहव ण ईदिसो अणुराओ अहिण्णाणं अवेक्खदि । कहं विअ एदम्[2] ।

राजा—उपालप्स्ये तावदिममङ्गुलीयकम् ।

विदू—गैहिदो णेण पन्था उम्मत्तआणम्[3] ।

राजा—

कथं नु तं कोमलबन्धुराङ्गुलिं करं विहायासि निमग्नमंभसि ।

अथवा—

अचेतनं नाम किमित्युपालभे मयैव कस्मादवधीरिता प्रिया ॥ १४ ॥

विदू—(आत्मगत) अहं खु बुभुक्खाए खादइदव्वं त्ति[4] ।

---

१. युज्यते ।

२. अतस्तपस्विन्याश्शकुन्तलाया अधर्मभीरो राजर्षः परिणये सन्देहः । अथवा नेदृशोऽनुरागोऽभिज्ञानमपेक्षते । कथमिवैतत ।

३. गृहीतोऽनेन पन्था उन्मत्तानाम् ।

४. अहं खलु बुभुक्षया खादितव्य इति ।

कूलेन । शचीतीर्थमिति शचीदेव्यास्तत्र सांनिध्यात् । **अत** इति । अत अंगुलीयकादर्शनात् । अथवेति तन्नेत्यर्थः । **गृहीत** इति । अचेतनोपालम्भो नक्रमादिति भावः । **कथं** न्विति । बन्धुरं सुन्दरम् । अत्र निरपेक्षत्वं व्यज्यते । **अथवेति** । नेदमुपालम्भनविषयमित्यर्थः । अहमेवोपालम्भविषय इत्याह **अचेतनमि**ति । नामेत्यसम्भावनायाम् । अचेतनं गुणापेक्षात्यसम्भावि । मयैव गुणपक्षपातिना मयैव । मत्कर्तृकमवधीरणमनुचितमेव । अगुलीयककर्तृकस्तदङ्गुलीत्यागस्तथा नेत्यर्थः । कस्मादवधीरिता प्रियेत्यवधारणे हेतुः पृष्ट इति तत्रायमत्र हेतुरित्युत्तरमाह **अहं खल्वि**ति । इतिहेतौ । इत्यतो हेतोस्त्वयावधीरितेत्यर्थः । बुभुक्षाकर्तृकेण स्वकर्मकेण च खादनेन तस्य अति-

राजा—अकारणपरित्यागानुशयपरितप्तहृदयस्तावदनुकंप्यतामयं जनः पुनर्दर्शनाय ।

(प्राविश्यापटाक्षेपेण चतुरिका)

ईअं चित्तगआ भट्टिणी ।

[इति फलकं दर्शयति]

विदू— (चित्रफलकमवलोक्य) साहु वअस्स महुरावत्थाणदंसणिज्जो भावाणुप्पवेसो । खलदि विअ मे दिट्ठी णिण्णुण्णदप्पदेसेसु ।

सानु—अहो राएसिणो वत्तिआणिउणदा । जाणे मे सही अग्गदो वट्टइत्ति ।

राजा—

यद्यत्साधु न चित्रे स्यात् क्रियते तत्तदन्यथा ।
तथापि तस्या लावण्यं लेखया किञ्चिदन्वितम् ॥१४॥

सानु—सदिसं एदं पच्चादावगुरुणो सिणेहस्स अणवलेवस्स अ ।

---

१. इयं चित्रगता भट्टिनी ।

२. साधु वयस्य मधुरावस्थानदर्शनीयो भावानुप्रवेशः । स्खलतीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु ।

३. अहो राजर्षेर्वर्तिकानिपुणता । जाने मे सखी अग्रतो वर्तत इति ।

४. सदृशमेतत् पश्चात्तापगुरोः स्नेहस्यानवलेपस्य च ।

शय उक्तः । **अकारणेति** । अनुशयः पश्चात्तापः । **इयमिति** । "देवी कृताभिषेकायामितरासु तु भट्टिनी"त्यमरः । **भावानुप्रवेशश्चित्रम्** । निम्नोन्नतप्रदेशेषु नाभिस्तनादिषु । वर्तिका तूलिका । चित्रगतप्रतिकृत्यपेक्षया प्रकृतेरतिशयमाह **यद्य-दिति** । चित्रे आलिख्यमानं यद्यत्साधु न स्यात् सम्यङ्नायाति तत्तदन्यथा पौनःपुन्येन प्रयत्या साधु क्रियते । अत्र सामान्याद्विशेषः प्रस्तुतः प्रतीयते । मया चित्रे तस्या लावण्यं सर्वं संपादयितुं पौनःपुन्येन यत्नः कृतः तथापि रेखया चित्रेण तस्या

विदू—भो दाणीं तिस्सो तत्तहोदीओ दीसन्ति । सव्वाओ दंसणीआओ । कदमा एत्थ तत्तहोदी सउन्दला [1] ।

सानु—अणहिण्णो खु रूवस्स मोहदिट्ठी अअं जणो [2] ।

राजा—त्वं तावत् कतमां तर्कयसि ।

विदू—भो तक्केमि जा एसा सिढिलिअकेसबन्धणुव्वन्तकुसुमेण केसन्तेण उब्भिण्णसेअविन्दुणा वअणेण विसेसदो ओसरिदाहिं बाहाहिं अवसेअसिणिद्धतरुणपल्लवस्स चूदपादवस्स पस्से ईसिपरिस्सन्ता विअ आलिहिदा । सा तत्तहोदी सउन्दला इदराओ सहीओत्ति [3] ।

राजा—निपुणो भवान् । अस्त्यत्र मे भावचिह्नम् ।

स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः ।
अश्रु च कपोलपतितं लक्ष्यमिदं वर्तिकोच्छ्वासात् ॥१२॥

---

१. भो इदानीं तिस्रस्तत्रभवत्यो दृश्यन्ते । सर्वा दर्शनीयाः । कतमात्र तत्रभवती शकुन्तला ? ।

२. अनभिज्ञः खलु रूपस्य मोघदृष्टिरयं जनः ।

३. भोः तर्कयामि येषा शिथिलितकेशबन्धनोद्वान्तकुसुमेन केशान्तेन उद्भिन्नस्वेदबिन्दुना वदनेन विशेषतोऽपसृताभ्यां बाहाभ्यां अवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत्परिश्रान्तेवालिखिता । सा तत्रभवती शकुन्तला इतरे सख्यौ इति ।

लावण्यं किञ्चिदत्यल्पमेवान्वितं अनुगतम् । [illegible] अर्थः । **भोस्तर्कयामीति** । बाहा बाहुः अपसृतिरपगतिः । केशान्तेनेत्यादावुपलक्षणे [illegible] । तर्कस्य साधुत्वात्तं श्लाघते **निपुण** इति । निपुणत्वमुपपादयति अस्त्यत्रेति [illegible] । चिह्नस्य स्वरूपम् दुरवबोधत्वं चाह **स्विन्नेति** । विनिवेशो विन्यासस्य [illegible] । तस्य दृश्यत्वमलिनत्वोपपत्तेः । रेखाया आलेख्यस्य । प्रान्तेषु उपान्तेषु । [illegible] । अत्रांगुलीनां विन्यासस्थानमालिन्यात्तासां स्वेद [illegible] इति [illegible] तथा अश्रु च लक्ष्यमिति समुच्चयः । कपोलाभ्यां पतितं कपोलपतितम् । [illegible] । वर्तिकोच्छ्वासाद्वर्तिकासाध्यरेखाया उच्छ्वासात् [illegible] । [illegible] इदं कपोलपतितमश्रु च लक्ष्यमित्यन्वयः । अत्रांगुलीनां विन्यास[illegible] स्वेद [illegible] वर्तिकोच्छ्वासादश्रु च ताभ्यां अनुरागः तेन सा इति [illegible] तर्को निपुणम-

चतुरिके अर्धलिखितमिदं विनोदस्थानमस्माभिः गच्छ वर्तिकां तावदानय।

चतुरिका—अज्ज माढव्व ओलंब चित्तफलअं जाव आअच्छामि।

राजा—अहमेवैतदवलंबे।

[इति यथोक्तं करोति। निष्क्रान्ता चतुरिका]

राजा—अहं हि

साक्षात् प्रियामुपनतामपहाय पूर्वं
चित्रार्पितां पुनरिमां बहुमन्यमानः।
स्रोतोवहां पथि निकामजलामतीत्य
जातस्सखे प्रणयवान् मृगतृष्णिकायाम् ॥ १६ ॥

विदू—(आत्म) एसो अत्तभवं णदीं अतिक्कमिअ मिअतिह्णिआअं सङ्कन्तो (प्रकाशं) भो अवरं किं एत्थ लिहिदव्वम्।

सानु—असंसअं जो जो पदेसो आहेरुइदो तं तं आलिहिदुकामो हवे।

राजा—श्रूयतां—

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी?
पादान्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।
शाखालंबितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
श्रृंगे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥ १७ ॥

---

१. आर्य माढव्य अवलंम्ब चित्रफलकं यावदागच्छामि।

२. एषोऽत्रभवान् नदीमतिक्रम्य मृगतृष्णिकायां संक्रान्तः। भो अपरं किमत्र लिखितव्यम्।

३. असंशयं यो यः प्रदेशोऽभिरुचितस्तं तं आलिखितुकामो भवेत्।

निबाध्य एव अतो निपुणो भवानित्यर्थः। **साक्षा**दिति। प्रथमं मार्गे महानदीमुत्तीर्य गत्वा तस्यां मृगतृष्णिकायां प्रणय इव पूर्वमुपनतां प्रियामपहाय चित्रार्पितायां तस्यां बहुमानं दृश्यते। जलमिति इति स्वयमेवानुवदति। **कार्ये**ति। लिखितव्येत्यर्थः। पादाः पर्यन्तभूमयः। तामाभितस्तस्यास्तीरे। पादविशेषणाभ्यां तेषामाश्रमपदत्व-

विदू— (आत्म) जहं अहं पेक्खामि पूरिदव्वं णेण चित्तफलअं लंबकूच्चाणं तापसाणं कदंबेहिम् ।

राजा—अन्यच्च । शकुन्तलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः ।

विदु—किं विअ ।

सानु—वणवासस्स सोउमारस्स अ जं सरिसं भविस्सदि ।

राजा—

कृतन्न कर्णार्पितबन्धनं सखे शिरीषमागण्डविलंबिकेसरम् ।
न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे ॥ १८॥

विदू---भो किण्णु खु तत्तहोदी रत्तपल्लवसोहिणा अग्गहत्थेण मुहमावरिअ चइदचइदा विअ ठिदा (सावधानं निरूप्य) आ एसो महुअरो दासीएपुत्तो कुसुमासवपाडच्चरो अत्तहोदीए वअणं अदिलङ्घेदि ।

---

१. यथाहं पश्यामि पूरयितव्यं अनेन चित्रफलकं लंबकूर्चानां तापसानां कदंबैः ।

२. किमिव ।

३. वनवासस्य सौकुमार्यस्य च यत्सदृशं भविष्यति ।

४. भो किन्नुखलु तत्रभवती रक्तपल्लवशोभिनाग्रहस्तेन मुखमावृत्य चकितचाकितेव स्थिता । आ एष मधुकरो दास्याःपुत्रः कुसुमासवपाटच्चरोऽत्रभवत्या वदनमतिलङ्घयति ।

सुक्तम् । वाम सुन्दरं नयनं वामनयनम् । लम्बकूर्चानां दीर्घश्मश्रुणाम । "कूर्चोऽस्त्री श्मश्रुपीठयो"रिति केशवः । **अन्यच्चेति** । अभिप्रेतम् । अत एव लिखितव्यत्वं व्यज्यते । विस्मृतम् । लिखितुमित्यर्थात् । तदपि लिखितव्यमिति भाव । **किमिव** किन्तादित्यर्थः । **भविष्यतीति** । तादृशं किमपीति शेषः । **कृतमिति** । बन्धनं वृन्तम् । वाशब्दस्समुच्चये । **पाटच्चरः** चोरः । **अयि भो** इति । कुसुमलताप्रिये-

राजा—ननु वार्यतामेष दुष्टः ।

विदू—[1]भवं एव्व अविणीदाणुसासी इमस्स वारणे पभविस्सदि ।

राजा—युज्यते– अयि भोः कुसुमलताप्रियातिथे किमतः परिपतनखेदमनुभवसि ।

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता ।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति ॥१९॥

सानु—[2]अज्ज वि अभिआदं एसो वारिदो ।

विदू—[3]पडिसिद्धे पि वामा एसा जादी ।

राजा—एवम् । भोः न मे शासने तिष्ठसि । श्रूयतां तर्हि सम्प्रति ।

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु ।
बिम्बाधरं स्पृशसि चेत् भ्रमर प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम् ॥२०॥

---

१. भवानेवाविनीतशासी अस्य वारणे प्रभविष्यति ।

२. अद्यापि अभिजातमेष वारितः ।

३. प्रतिषिद्धेऽपि वामा एषा जातिः ।

त्यादि । कुसुमलता समुपस्थिता त्वां सत्करिष्यति अतस्तामेवाभिसरेत्यर्थः । परिपतनं सञ्चरणम् । किंचेत्याह एषेति । पातुं व्यवसिता तृषिता । आग्रहवती । अनुरक्तेति प्रतिपालनहेतुः । तत्त्वरितमभिगम्यतामेषेति भावः । **अद्यापि** उन्मादावस्थायामपि । यदि वा प्रियापरिभवेऽपि । अभिजातं अपरुषम् । त्वया वारितोऽप्येष न विरमतीत्याह **प्रतिषिद्ध** इति । वामत्वे प्रतिषिद्धेऽपि वामा विरुद्धमार्गवर्तिनी । एषा मधुपजातिः । त्वदाज्ञां न बहुमनुत इत्यर्थः । तिष्ठसीत्यत्र काका प्रश्नः । **अक्लिष्टेति** । अक्लिष्टमन्यूनगुणम् । बालस्तरुः बालतरुः तस्य । तेन पल्लवस्य गुणोत्कर्ष उक्तः । **स्पृशसि चेदिति** । स्पर्शोऽपि न कर्तव्यः का कथा रसास्वाद इत्यर्थः । कमलोदरमेव

विदू—एवं तिक्खणदण्डस्स किं ण भविस्सदि । (प्रहस्यात्मगतम्) एसो दाणीं उम्मत्तओ अहं वि एदस्स संसग्गेण ईरिसवण्णो विअ संवुत्तो (प्रकाशं) भो चित्तं खु एदम् ।

राजा—कथमेतत् ।

सानु—अहं वि दाव दाणीं अणवगदत्था किं उण जहा लिहिदाणुभावी एसो ।

राजा—किमनुष्ठितं पौरोभाग्यम् ।

दर्शनसुखमनुभवतस्साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥ २१ ॥

[बाष्पं विहरति]

सानु—पुव्वापरविरोही अपुव्वो एस विहाणमग्गो ।

---

१. एवं तीक्ष्णदण्डस्य किन्न भविष्यति । एष इदानीमुन्मत्तः अहमप्येतस्य संसर्गेणेदृशवर्ण इव संवृत्तः । भोश्चित्रं खल्वेतत् ।

२. अहमपि तावदिदानीं अनवगतार्था किं पुनर्यथालिखितानुभावी एषः ।

३. पूर्वापरविरोधी अपूर्व एष विधानमार्गः ।

बन्धनं कारागृहं कमलोदरबन्धनम् । **किन्न भविष्यति** एष भवत्येवेत्यर्थः । ईदृशवर्णः एवंविधः । **कथ**मिति । एतच्चित्रं स्यादित्यर्थः । तस्यानवगतार्थत्वं सङ्गच्छत इत्याह अहमपीति । यथा लिखितानुभावी । पूर्वमनुभूतं हि लिखितम् । **पौरोभाग्य**मिति । "दोषैकदृक् पुरोभागी"त्यमरः । किं तदित्याह **दर्शने**ति । साक्षात् प्रत्यक्षम् । तन्मयेन कान्तैवेयमिति दृढबुध्या । स्मृतिकारिणा आलेख्य कान्तेयमिति स्मृतिकारिणा । **विहरति** विसृजति । **पूर्वापरविरोधी**ति । अनास्थया खलु पूर्वं परित्यागः आस्थया हीदानीं पश्चात्ताप इति पूर्वापरविरोधः । अपूर्वः पूर्वमविद्यमानः अदृष्टपूर्वः । विधानमार्गः वृत्तान्तप्रकारः । बाष्पप्रतिहतालेख्यदर्शनवि-

राजा—वयस्य कथमविश्रामदुःखमनुभवामि ।

प्रजागरात् खिलीभूतस्तस्यास्स्वप्ने समागमः ।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥ २२ ॥

सानु—सव्वहा पमज्जिदं तुए पच्चादेसदुःखं सउन्दलाए ।[1]

(प्रविश्य चतुरिका)

भट्टा वत्तिआकरण्डअं गह्णिअ इदोमुहं पत्थिदह्मि ।[2]

राजा--किं च ।

चतुरिका--अन्तरा पिङ्गलिआदुदीआए देवीए वसुमदीए अहं एव्व णं अज्जउत्तस्स उवणइस्सं त्ति हत्थादो सबलक्कारं सो गहिदो ।[3]

विदू—दिट्ठिआ तुमं मुक्का ।[4]

चतुरिका—जाव विडवलग्गं उत्तरीअं देवीए पिङ्गलिआ मोएदि दाव णिव्वासिदो मए अप्पा ।[5]

---

१. सर्वथा प्रमृष्टं त्वया प्रत्यादेशदुःखं शकुन्तलायाः ।

२. भर्तः वर्तिकाकरण्डं गृहीत्वा इतोमुखं प्रस्थितास्मि ।

३. अन्तरा पिङ्गलिकाद्वितीयया देव्या वसुमत्या अहमेवैनमार्यपुत्रस्योपनेष्यामीति हस्तात्सबलात्कारं स गृहीतः ।

४. दिष्ट्या त्वं मुक्ता ।

५. यावद्विटपलग्नमुत्तरीयं देव्याः पिङ्गलिका मोचयति तावन्निर्वासितः मया आत्मा ।

नोद आह **वयस्ये**ति । विनोदराहित्यान्निरन्तरदुःखमनुभवितुमशक्तोऽस्मीत्यर्थः । कुन इत्याह **प्रजागरा**दिति । खिलीभूतः नष्टः । ददाति । अवगमिलर्थात् । कर-

राजा—वयस्य उपस्थिता देवी बहुमानगर्विता च। भवानिमां प्रतिकृतिं रक्षतु।

विदू—अत्ताणं ति भणाहि। (चित्रफलकामादायोत्थाय) जइ भवं अन्तेउरकलहादो मुञ्चीअदि तदो मं मेहप्पडिच्छन्दे पासादे सद्दावेहि।

[द्रुतपदं निष्क्रान्तः]

सानु—अण्णासङ्कन्तहिअओ पि पुढमासंभावणं अवेक्खादित्ति ठिरसोहदो एसो।

(प्रविश्य पत्रहस्ता प्रतीहारी)

जेदु देवो।

राजा—वेत्रवति न खल्वन्तरा दृष्टा त्वया देवी।

प्रति—अहइं, पत्तहत्थं मं दक्खिअ पडिणिवुत्ता।

राजा—कार्यज्ञा कार्योपरोधं मे परिहरति।

प्रति—अमच्चो विण्णवेदि। अत्थजादस्स गणणाबहुलदाए एक्कं एव्व पोरकज्जं पच्चवेक्खिदम्। तं देवो पत्तारूढं पच्चक्खीकरोदुत्ति।

राजा—इतः पत्रं दर्शय।

---

१. आत्मानमिति भण। यदि भवानन्तःपुरकलहान्मुच्येत ततो मां मेघप्रतिच्छन्दे प्रासादे शब्दापय।

२ अन्यासंक्रान्तहृदयोऽपि प्रथमासम्भावनामपेक्षते इति स्थिर-सौहृद एषः।

३. जयतु देवः।

४. अथकिं पत्रहस्तां मां दृष्ट्वा प्रतिनिवृत्ता।

५. अमात्यो विज्ञापयति। अर्थजातस्य गणनाबहुलतया एकमेव पौरकार्यं प्रत्यवेक्षितम्। तद्देवः पत्रारूढं प्रत्यक्षीकरोत्विति।

ण्डकं संग्राहपात्रम्। **बहुमाने**ति। रक्ष आच्छादय। **आत्मानमिती**ति। मय्यपि कुपिता अहमपि गच्छामीति भावः। मेघप्रतिच्छन्द इति प्रासादस्य गुणनाम। **न ख-**

[प्रतिहारी उपनयति]

राजा—(अनुवाच्य) कथं समुद्रव्यवहारी सार्थवाहो धनमित्रो नौव्यसनेन विपन्नः, अनपत्यश्च किल सः। राजगामी तस्यार्थसञ्चय इत्यमात्येन लिखितं (सविषादं) कष्टा खल्वनपत्यता। वेत्रवति महाधनत्वात् तत्रभवता बहुपत्नीकेन भवितव्यम्। विचीयतां काचिदापन्नसत्त्वापि तस्य भार्या स्यात्।

प्रति—[1]देव दाणीं माकेदअस्स सेट्ठिणो दुहिदा णिव्वुत्तपुंसवणा जाआ से सुणीअदि।

राजा—ननु गर्भः पित्र्यं रिक्थमर्हति। गच्छ एवममात्यं ब्रूहि।

प्रति—[2]जं देवो आणवेदि।

[प्रस्थिता]

राजा—एहि तावत्।

प्रति—[3]इअं ह्मि।

राजा—किमनेन सन्ततिरस्ति नास्तीति।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।
स स पापादृते तासां दुष्यन्त इति घुष्यताम् ॥ २३ ॥

---

१. देव इदानीं साकेतकस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जायास्य श्रूयते।

२. यद्देव आज्ञापयति।

३. इयमस्मि।

लिखति। अत्र काका प्रश्नः। **साकेतकस्य** साकेतमयोध्या। साकेते वसतीति साकेतकः। "सर्वत्राघोपहनातिपतेवानुगृहीया" इति वचनमनुसरन्नाह **येने**ति। दुष्यन्त इति। तन्तत् कुलं दुष्यन्तः करोतीति। पापात् दुष्टात्। एवं नाम घोषित-

प्रति---एवं णाम। (निष्क्रम्य पुनः प्रविश्य) काले पवुट्टं विअ अहि-णन्दिअं देवस्स सासणं अमच्चेण।

राजा---(दीर्घं निश्वस्य) एवं भोः सन्ततिविच्छेदनिरवलम्बानां कुलानां मूलपुरुषावसाने संपदः परमुपतिष्ठन्ति। ममाप्यन्ते पुरुवंशश्रिय एष वृत्तान्तः।

प्रति---पडिहदं अमङ्गलम्।

राजा---धिङ्मामुपस्थितश्रेयोऽवमानिनम्।

सानु---असंसअं सहीं एव्व हिअए करिअ णिन्दिदो णेण अप्पा।

राजा---

संरोपितेऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोप्तबीजा ॥२४॥

सानु---अपरिच्छिण्णा सन्तती दे भविस्सदि।

चतुरिका--- (जनान्तिकं) अये इमिणा सत्थवाहवुत्तन्तेण दिउणआणुसओ भट्टा। णं अस्सासइदुं मेहप्पडिच्छन्दादो मादव्वं गह्णिअ आअच्छामि।

१. एवं नाम। काले प्रवृष्टमिवाभिनन्दितं देवस्य शासनममात्येन।

२. प्रतिहतममङ्गलम्।

३. असंशयं सखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा।

४. अपरिच्छिन्ना सन्ततिस्ते भविष्यति।

५. अये अनेन सार्थवाहवृत्तान्तेन द्विगुणितानुशयो भर्ता। एनमाश्वासयितुं मेघप्रतिच्छन्दान्माढव्यं गृहीत्वा आगच्छामि।

व्यामिति भावः। प्रवृष्टं प्रभूतं वर्षम्। **एतद्वृत्तान्तः**। एतद्वृत्तान्तसदृशवृत्तान्तः। स्यादिति शेषः। **संरोपित** इति। संरोपिते निषिक्ते। "आत्मा प्रविश्य जायायां पुत्र-

प्रति--सुट्ठु[1] भणासि ।

[निष्क्रान्ता चतुरिका]

राजा--अहो दुष्षन्तस्य संशयमारूढाः पिण्डभाजः कुतः-

अस्मात् परं बत यथाश्रुति संभृतानि
को नः कुले निवपनानि करिष्यतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिबन्ति ॥२९॥

[मोहमुपगतः]

प्रति-- (ससंभ्रममवलंब्य) अस्ससदु[2] ।

सानु--हद्धी[3] । सदि खु दीवे एसो ववहाणदोसेण अन्धआरं अणुहोदि । अहं दाणीं एव्व णिव्वुदं कारए । अहव सुदं मए सउन्तलं समास्सासअन्तीए महिन्दजणणीए मुहादो जण्णभाउस्सुआ देवा एव्व तह अणुचिट्ठन्ति जह तुमं धम्मपदिणीं अइरेण भट्टा अहिणन्दिस्सदि-त्ति । ता जुत्तं एदं मम कालं खन्तुम् । जाव इमिणा णिरवसेसेण खत्ति-अवुत्तन्तेण समास्सासेमि पिअसहीम् ।

[निष्क्रान्ता]

---

१. सुष्ठु भणासि ।

२. आश्वसितु ।

३. हा धिक् । सति खलु दीपे एष व्यवधानदोषेणान्धकारमनुभवति । अहमिदानीमेव निर्वृतं कारयामि । अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या मुखात् । यज्ञभागोत्सुका देवा एव तथानुतिष्ठन्ति । यथा त्वां धर्मपत्नीमचिरेण भर्ताभिनन्दयिष्यतीति । तद्युक्तमेतं मम कालं क्षन्तुम् । यावदनेन निरवशेषेण क्षत्रियवृत्तान्तेन समाश्वासयामि प्रियसखीम् ।

रूपेण जायते" इति स्मृतेः । कल्पिष्यमाणा महते फलायेति साधारणम् । **अहो** इति । पिण्डभाजः पितरः । संशयम् । पिण्डमस्ति वा न वेति । पितॄणामवस्थामुत्प्रेक्षत **अस्मा**दिति । अस्मात् दुष्षन्तात् । क इति क्षेपे । कोऽपि न करिष्यतीति । "निवापः पितृतर्पण" मित्यमरः । इति मत्वा । धौतमश्रु येन करणेन तद्धौताश्रु । अतश्शेषं धौताश्रुशेषम् । "शेषं त्रिष्वन्यत्रोपयुक्तत"इत्यमरः । **सतीत्या**दि । सत्येव पुत्रे तदज्ञानादेष तद्राहित्यदुःखमनुभवतीत्यर्थः । **निर्वृतं करोमि** । पुत्रसद्भावं निवेदयामि । अथवेति । न

(नैपथ्ये)

अविहा[1] । परित्ताअदु देवो संसअगदं वअस्सम् ।

राजा—केनार्तकण्ठो माणवकः । कोऽत्रभोः ।

(प्रविश्य चतुरिका)

देव अदिट्ठरूपेण केण वि सत्तेण विसत्तेण अक्कमिअ मेहपडिच्छन्दस्स पासादस्स अग्गभूमिं आरोपिदो[2] ।

राजा—(उत्थाय) मा तावत् ममापि सत्त्वैरभिभूयन्ते ग्रहाः । अथवा ।

अहन्यहन्यात्मन एव तावत् ज्ञातुं प्रमादस्खलितं न शक्यम् ।
प्रजासु कः केन पथा प्रयातीत्यशेषतो वेदितुमस्ति शक्तिः ॥ २६ ॥

(नैपथ्ये)

भो वअस्स[3] अविहा ।

---

१. अविहा । परित्रायतां देवस्संशयगतं वयस्यम ।

२. देव अदृष्टरूपेण केनापि सत्वेन विशब्देनाक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्याग्रभूमिमारोपितः ।

३. भो वयस्य अविहा ।

निवेदयामीत्यर्थः । कुत इत्याह श्रुतमिति । अथैवं राजर्षेरुदन्तं प्रत्यक्षाकृत्य तद्विनियोगाय त्वरमाणाह यावदिति । **अविहा** आर्तस्वरः । रोदनम । केन कस्माद्धेतोः । आर्तकण्ठः आर्तस्वरः । अदृष्टरूपेण छन्नेन । आक्रम्य बलात् । सत्वेन भूतपिशाचादिष्वन्यतमेन । **मा तावत्** । विपरीतमेतादित्यर्थः । कथमित्याह । ममापीति सत्वाभिभाविनो मम सत्वैरभिभवः प्रजापचारनिमित्तोऽयमिति मत्वाह **अथवे**ति । नैतदनुपपन्नमित्यर्थः । कुत इत्याह **अहन्यहनी**ति । स्वस्य प्रमादायातं शकुन्तलापरित्यागं हृदि निधायाह आत्मनः प्रमादस्खलितमिति । अस्ति शक्तिरिति काका ।

राजा— (गतिभेदेन परिक्रामन्) सखे न भेतव्यम् ।

(नैपथ्ये पुनस्तदेव पठित्वा)

कहं ण भाइस्सं? एस मं पश्चा एव्व णदसिरोहरं इक्खुविअ तिक्खणभंगं करेदि ।

राजा— (सदृष्टिक्षेप) धनुस्तावत् ।

(प्रविश्य शार्ङ्गहस्ता यवनिका)

भट्टा इदं सरासणं हत्थावापसहिदम् ।

(राजा सशरं धनुरादत्ते)

(नैपथ्ये)

एष त्वामभिनवकण्ठशोणितार्थी शार्दूलः पशुमिव हन्मि वेष्टमानम् ।
आर्तानां भयमपनेतुमात्तधन्वा दुष्यन्तस्तव शरणं भवत्विदानीम् ॥२७॥

राजा— (सरोषं) कथं मामेवोद्दिशति । कुणपाशन त्वमिदानीं न भविष्यसि (शार्ङ्गमारोप्य) वेत्रवति सोपानमार्गमादेशय ।

प्रति—इदो देवो ।

---

१. कथं न बिभेमि । एष मां पश्चादेव नतशिरोधरं इक्षुमिव तीक्ष्णभङ्गं करोति ।

२. भर्तः इदं शरासनं हस्तावापसहितम् ।

३. इतो देवः ।

प्रजापचारं वेदितुं कथं शक्तिस्स्यादित्यर्थः । **भंगः** परिभवः । इक्षुपक्षे भञ्जनम् । **धनुस्तावत्** । आनयेति शेषः शार्ङ्गचापम् । **एष** इति । वेष्टमानं लुठन्तम् । कोपं जनयितुमाह **आर्तानामि**ति । न त्वमिदानीं भविष्यसि । त्वां हन्मीत्यर्थः । अस्त्रं द्रक्ष्यति । तिरस्करणीगर्वमपहरमीति भावः । वध्यरक्ष्यविवेचने दृष्टान्तमाह

[सर्वे सत्वरमुपसर्पन्ति]

राजा— (समन्ताद्विलोक्य) शून्यं खल्विदम् ।

(नेपथ्ये)

अविहा । अहं अत्तभवन्तं पेक्खामि । तुमं ण पेक्खामि । विळाळगहिदो मूसिओ विअ णिरासोह्मि जीविए संवुत्तो ।

राजा—भोस्तिरस्करणीगर्वित मदीयमस्त्रं त्वां द्रक्ष्यति । एष तमिषुं सन्दधे ।

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजम् ।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ॥२०॥

[अस्त्रं सन्धत्ते]

[ततः प्रविशति विदूषकमुत्सृज्य मातलिः]

मातलिः—

कृताश्शरव्या हरिणा तवासुराश्शरासनं तेषु विकृष्यतामिदम् ।
प्रसादसौम्यानि सतां सुहृज्जने पतन्ति चक्षूंषि न दारुणाश्शराः ॥२९॥

राजा—(अस्त्रमुपसंहरन्) अये मातलिः । स्वागतं देवेन्द्रसारथेय।

विदू—अहं जेण इट्ठिपसुमारं मारिदो सो इमिणा साअदेण अहिणन्दीअदि ।

मात—(सस्मितं) आयुष्मन् श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः ।

राजा—अवहितोऽस्मि ।

मात—अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः ।

राजा—श्रुतपूर्वं मया नारदात् ।

१. अविहा । अहमत्रभवन्तं पश्यामि । त्वं न पश्यसि । बिडालगृहीतो मूषिक इव निराशोऽस्मि जीविते संवृत्तः ।

२. अहं येन पशुमारं मारितस्सोऽनेन स्वागतेनाभिनन्द्यते ।

हंस इति । निजागमनकार्यं सामान्येन कथयंस्तस्य कोपं शमयति **कृता** इति । शरव्यः लक्ष्यम् । तेषु लक्ष्यभूतेषु । न मय्यत्यर्थः । इष्टिपशुमारम् । यथा पशुं मारयति तथा । **श्रूयतामिति** । तदित्यादिः । अत आह **अवहित** इति ।

मात—

सख्युस्ते स किल शतक्रतोरजय्यस्तस्य त्वं रणशिरसि स्मृतोऽसि हन्ता ।
उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्तन्नैशं तिमिरमपाकरोति चन्द्रः ॥ ३० ॥

स भवानात्तशस्त्र एवेदानीमैन्द्रं रथमारुह्य विजयाय प्रतिष्ठताम् ।

राजा—अनुगृहीतमनया मघवतस्संभावनया । अथ माढव्यं प्रति भवता किमेवं प्रयुक्तम् ? ।

मात—तदपि कथ्यते । किन्निमित्तादपि मनस्सन्तापादायुष्मान् मया विक्लवो दृष्टः । पश्चात् कोपयितुमायुष्मन्तं तथा कृतवानस्मि । कुतः—

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणं कुरुते ।
प्रायः स्वं महिमानं कोपात् प्रतिपद्यते हि जनः ॥ ३१ ॥

राजा—युक्तमनुष्ठितं भवद्भिः । (जनान्तिकं) वयस्य न पुनरतिक्रमणीया दिवस्पतेराज्ञा । तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यमार्यपिशुनं ब्रूहि ।

त्वन्मतिः केवला तावत् प्रतिपालयतु प्रजाः ।
अधिज्यमिदमन्यस्मिन् कर्मणि व्यापृतं धनुः ॥ ३२ ॥

विदू—जं भवं आणवेदि[१] ।

[निष्क्रान्तः]

मात—इत आयुष्मान् ।

[राजा रथारोहणं नाटयति]

[निष्क्रान्तास्सर्वे]

षष्ठोऽङ्कः ।

---

१. यत् भवानाज्ञापयति ।

सख्युरिति । अत्र दृष्टान्तोऽलङ्कारः । तेन शतक्रतोर्विशिष्टदानवनिधनाशक्तावपि न निकर्ष इति व्यज्यते। किन्निमित्तात् । कस्मादपि निमित्तात् । कोपाधाने हेतुमाह**ज्वलती**ति । कोपोद्भवेनात्मनो महिमानं प्रतिपद्येतेति मया भवान् कोपित इति भावः ।

इत्यभिरामविरचितेऽभिज्ञानशाकुन्तले दिङ्मात्रदर्शने
षष्ठोऽङ्कः ।

सप्तमोऽङ्कः

[ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च]

राजा—मातले! अनुष्ठितनियोगोऽपि मघवतस्सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये ।

मातलिः—(सस्मितं) आयुष्मन् उभयमप्यपरितोषम् ।

प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यपदानविस्मितो भवतस्सोऽपि न सत्क्रियागुणान् ॥ १ ॥

राजा—मा मैवम् । स खलु मनोरथानामप्यतिभूमिर्विसर्जनावसरसत्कारः । मम हि दिवौकसां समक्षमर्द्धासनोपनिवेशितस्य—

अन्तर्गतप्रार्थितमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन ।
आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा ॥ २ ॥

मात—किमिवायुष्मानमरेश्वरान्नार्हति । पश्य—

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुना नतपर्वभिः पुरुषकेसरिणश्च पुरा नखैः ॥ ३ ॥

एवं प्रदर्श्य नृपतेस्स्वर्यात्रां देवराजशासनतः पूर्वाङ्कोपक्षिप्तं प्रेयस्याऽस्समागम प्रदर्शयति । संहृतदेवारातिनिर्हरिणा हृष्टेन सादरं मुक्तः राजा रथेन गच्छन् भूलोकं मातलिं प्राह **मातले** इति । अनुष्ठितेति । आत्मना उपयोगे जातेऽपीत्यर्थः । अपरितोषं अनलम्भावम् । तत्प्रकारमाह **प्रथमे**ति । प्रथमं सत्कारात् पूर्वमुपकारं दानवनिधनलक्षणम् । प्रतिपत्त्या बहुमानेन । तत्कार्येण सत्करणेन । **सत्क्रियागुणान्** । गुण आवृत्तिः । पौनःपुन्येन कृतान् सत्कारानित्यर्थः । "गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्वि"ति वैजयन्ती । **मेति** । एवं तस्यापरितोषस्य नावकाश इति भावः । कुत इत्याह **स खल्वि**ति । तत्स्वरूपमाह **ममहीति** । दिवौकसां समक्षं आस्थानमण्डपे । अर्द्धासने सिंहासनस्य समेंऽशे । उप समीपे स्वाङ्गसंसर्गम । निवेशितस्य स्वयं गृहीत्वा स्थापितस्य । **अन्त**रिति । प्रार्थितं प्रार्थनम् । अकुरिताभिलाषमित्यर्थः । कृतस्मितेन । इदानीं त्वत्तोऽयमस्याधिकारीति भावः । आमृष्टं संश्लिष्टम् । आमृष्टेत्यनेन सौभाग्यातिशय उक्तः । पिनद्धा वक्षस आकृष्य मम शिरसि स्वयं निबद्धा । **अमरेश्वरात्** । आदातुमिति शेषः । कुत इत्याह **सुखे**ति । कण्टका दुष्टाः । किं तदुभयमित्याह नतेति । नतं पर्व सन्धिबन्धो येषाम् । साधा-

राजा—मा मैवं अत्र खलु शतक्रतोरेव महिमा स्तुत्यः । कुतः-

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावनागुणमवेहि तमीश्वराणाम् ।
किं वाभविष्यदरुणस्तमसां निहन्ता
तं चेत् सहस्रकिरणो धुरि नाकरिष्यत् ॥ ४ ॥

मात--सदृशमेवैतदायुष्मतः (स्तोकमन्तरमतिक्रम्य) आयुष्मन्नितः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः ।

विच्छित्तिशेषैस्सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु ।
सञ्चिन्त्य गीतिक्षममर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति ॥ ५ ॥

रणमेतन्नखानाम् । अत्र नरसिंहस्य राज्ञश्च नखानां शराणां चोपमानोपमेयभावो व्यज्यते । तेन राज्ञः पराक्रमस्य लोकोत्तरत्वं च । **मा मैवम्** । वादीरिति शेषः । कुत इत्याह अत्रेति । शतक्रतोरेव । न मम । **सिध्यन्तीति** । नियोज्या भृत्याः । सम्भावना बहुमानः नियोज्यविषयः । गुण उत्कर्षः । ईश्वराणां स्वामिनाम् । अत्र हेतुमति हेतुरारोप्यते । सिध्यन्तीति यत् तत्र हेतुरीश्वराणां सम्भावनागुण इति । यदुक्तं भारविणा "ईश्वराणां सम्भावना ह्यधिकृतस्य तनोति तेजः" इति । उक्तसामान्यं विशेषेणोपपादयति किं वेति । **सदृशमिति** । एतेन आत्मनोऽपदानस्य शतक्रतावारोपणम् । आयुष्मतः [illegible] । **अन्तरं** अवकाशम् । सौभाग्यमुपपादयति **विच्छित्तीति** । विच्छित्तिरलङ्कारः तिलकादिः । वर्णैः हरिचन्दनादिभिः । अंशुकेष्विति पल्लवानां अंशुकत्वेन । सञ्चिन्त्य सम्यगभिचिन्त्य । विरचय्येत्यर्थः ।

* "रम्याणामप्यलङ्कारकुसुमाञ्जनादीनाम् अनादरेण कल्पाना न्यासो विच्छित्तिरुच्यते" इत्युक्तलक्षणानादरेण स्वल्पाल्पादिविच्छित्तिशेषैर्वर्णैः कुङ्कुमहरिचन्दनादिभिः कल्पलतांशुकेषु कल्पलतास्वलङ्करणार्थं संलग्नेषु क्षौमादिवस्त्रेषु त्वच्चरितं लिखन्ति । कल्पलताः वस्त्रभूषणादिभिर्महोत्सवकालेषु विशेषतोऽप्यलंक्रियन्त इति प्रसिद्धिः ।

राजा—मातले असुरसम्प्रहारोत्सुकेन पूर्वेद्युरधिरोहता मया न लक्षितो स्वर्गमार्गः । कतमस्मिन् मरुतां पथि वर्तामहे ? ।

मात—

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्तयति च प्रविभक्तरश्मिः ।
तस्य द्वितीयहरिविक्रमनिस्तमस्कं
वायोरिमं परिवहस्य वदन्ति मार्गम् ॥ ६ ॥

राजा—अतः खलु सबाह्यकरणोऽन्तरात्मा प्रसीदति । (रथाङ्गं विलोक्य) मेघपदवीमवतीर्णौ स्वः ।

मात—कथमवगम्यते ।

राजा—

अयमरविवरेभ्यश्चातकैर्निष्पतद्भि-
र्हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः ॥ ७ ॥

अर्थबन्धं सन्दर्भम् । तच्चरितं प्रबन्धरूपेण विरचय्य लिखन्ति । **स्वर्गमार्गः** स्वर्गारोहणपदवी । कतमस्मिन्मरुतां पथि । सप्तवायुस्कन्धाः । "आवहः प्रवहश्चैव तथैवान्वहस्तथा संवहो विवहश्चैव ततश्चोर्ध्वं परावहः द्विजाः परिवहश्चैव वायोर्वै सप्त नेमयः" इति भारतोक्तेः । गगनप्रतिष्ठां त्रिस्रोतसमाकाशगङ्गाम् । द्वितीयेति भूगतविक्रमापेक्षया । **अतः खलु** उक्तगुणविशिष्टवायुमार्गवर्तनेन । सबाह्यकरणः सेन्द्रियवर्गः । रथाङ्गं चक्रम् । अवगमनहेतुमाह **अयमिति** । अरविवरेभ्य अराणां परस्परसंश्लिष्टानां अन्तरान्तरा विवराणि सन्ति । यथा "स्यैरचक्रस्यान्तरान्तरेषु जनयत्यन्यामिवारावलिं" इति । मेघमार्गे चातकसञ्चारः कविप्रसिद्धः । हरिभिरश्वैः ।

मात—क्षणादायुष्मानधिकारभूमौ वर्तिष्यते ।

राजा—(अधो विलोक्य) वेगावतरणादाश्चर्यदर्शनं संलक्ष्यते मनुष्यलोकः

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
वर्णस्वास्तरलीनतां विजहति स्कन्धोदयात् पादपाः ।
सन्तानं तनुभावनष्टसलिला व्यक्तं व्रजन्त्यापगाः
केनाप्युत्क्षिपतेव मर्त्यभवनं मत्पार्श्वमानीयते ॥ ८ ॥

मात—साधु दृष्टम् । (सबहुमानं विलोक्य) अहो **उदग्ररमणीया** पृथिवी ।

राजा—मातले कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिष्यन्दी सान्ध्य इव मेघपरिघस्सानुमानालक्ष्यते ।

मात—आयुष्मन् एष खलु हेमकूटो नाम किंपुरुषपर्वतः परं तपस्विनां सिद्धिक्षेत्रम् । पश्य--

गतं गमनम् । उपरि पृष्ठे । पिशुनयति सूचयति । आसन्नो भूलोक इत्याह **क्षणा**दिति । **शैलाना**मिति । अत्र शैलकर्तृकमुन्मज्जनमपि सम्भाव्यमानमेव । मेदिनीशैलानां शिखरादवरोहतीव, शैला मेदिन्या उन्मज्जन्तीव इत्यर्थः । यदुक्तं "एकत्रोत्प्रेक्षितत्वेन यत्रार्था बहवः स्मृताः तत्रेवादिः प्रयोक्तव्यः प्रधानादेव नान्यतः" इति । वर्णस्वास्तरलीनताम् । वर्णः श्यामादिः वर्ण एव स्वास्तरः प्रच्छदपटो **वर्ण**स्वास्तरः । तत्र लीनता पृथगनुपलब्धिः । स्कन्धानामुदयादाविर्भावात् । यदुक्तमनर्घराघवे "स्वस्ववर्णविनिविष्टपदार्थे"ति । पर्णस्वास्तरलीनतामिति वा पाठः । सन्तानमविच्छिन्नप्रवाहताम् । तनुभावेन पूर्वं नष्टसलिलत्वेन प्रतीयमानाः । केनापीति । कश्चिन्ममोत्कण्ठामपनेतुं मर्त्यभुवनमुत्क्षिप्य मत्समीपं नयतीवेत्यर्थः । **कनकरसनिष्यन्दी** कनकमयधातुरसनिष्यन्दी । परिघाकारो मेघः मेघपरिघः । किंपुरुषपर्वतः किंपुरुषवर्षस्यमर्यादापर्वतः । यदुक्तं भागवते । "दक्षिणेनेलावृतं निषधो हेमकूटो हिमालयः इति त्रयो हरिवर्षकिंपुरुषभारतानां त्रयाणां मर्यादा गिरय" इति । अभि-

स्वायंभुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुस्सोऽस्मिन् सपत्नीकस्तपस्यति ॥ ९ ॥

राजा—तेन ह्यनतिक्रमणीयानि श्रेयांसि । प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि ।

मात—प्रथमः कल्पः ।

[नाट्येनावतीर्णौ]

राजा—(सविस्मयं)

उपोढशब्दा न रथाङ्गनेमयः
प्रवर्तमानं न च दृश्यते रजः ।
अभूतलस्पर्शतया निरुन्धत-
स्तवावतीर्णोऽपि न लक्ष्यते रथः ॥ १० ॥

मात—एतावानेव शतक्रतोरायुष्मतश्च विशेषः ।

राजा—कतमस्मिन् प्रदेशे मारीचाश्रमः ।

मात— (हस्तेन दर्शयन्)

वल्मीकार्धनिविष्टमूर्तिरुरसा सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः ।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिंबं स्थितः ॥ ११ ॥

लषितासिद्धेः क्षेत्रमुत्पत्तिस्थानम् । महत्वान्तरमाह **स्वायंभुवा**दिति । प्रजापतिः मारीचनामा । **तेन ही**ति । अनतिक्रमणीयानि आदरणीयानि । श्रेयांसि श्रेयस्कराणि । प्रदक्षिणीकृत्येति । यदुक्तं "मृद्गान् दैवतं विप्रं घृतं मधु चतुष्पथं प्रदक्षिणानि कुर्वीत प्रख्यातं च वनस्पतिं" इति । एवं कर्तव्यमित्याह **प्रथम** इति । मुख्यः पक्ष एष इत्यर्थः । **उपोढे**ति । हेतुभावगर्भम् । अभूतलस्पर्शतया स्वर्गमनत्वादित्यर्थः । न लक्ष्यते । **एतावान्** भूतलस्पर्शाभावः । **वल्मीके**ति । परित उद्गतेन वल्मीकेन तिरोहितनाभ्यधःकाय इत्यर्थः । उरसा । उपलक्षणे तृतीया । सन्दष्टा संलग्ना । लताप्रतानवलयेन । प्रतिक्षणं वर्द्धिष्णुना । नीडः कुलायः । निचितं व्याप्तम् । अभ्यर्कबिम्बमिति तदानीन्तनावस्था । असावित्यभिनये । कष्टं

राजा—नमोऽस्मै कष्टतपसे ।

मात—(संयतप्रग्रहं कृत्वा) एतावति परिवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः ।

राजा—स्वर्गादधिकतरनिर्वृतिस्थानं । अमृतह्रदमिवावगाढोऽस्मि ।

मातलिः—(रथं स्थापयित्वा) अवतीर्यताम् ।

राजा—(अवतीर्य) भवान् कथमिदानीम् ।

मात—सुसंयन्त्रितो मया रथो वयमप्यवतरामः (तथा कृत्वा) इत आयुष्मान् ।

(उभौ परिक्रामतः)

मात—आयुष्मन् दृश्यतामत्रभवतामृषीणां तपोवनभूमयः ।

राजा—ननु विस्मयादवलोकयामि ।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत् कांक्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥ १३ ॥

कृच्छ्रं तपो यस्य । इत आरभ्याश्रम इत्याह **एतावती**ति । प्रदेशे । तस्य लक्षणमाह परिवर्द्धितेति । अथ सात्विकस्सत्वोद्दीपनस्थलसंसर्गेण प्रवृद्धसत्वगुणतया प्रहृष्यदन्तःकरण आह **स्वर्गा**दिति । अधिकतरा निर्वृतिर्यस्मिंस्तदधिकतरनिर्वृति । **कथमिति** । अवतरति वा न वेत्यर्थः । विस्मयावहत्वमुपपादयति **प्राणाना**मिति । उचिता उचितकालभवा । सत्कल्पवृक्ष इत्यनेन स्वादुभोजनसुलभता व्यज्यते । पुण्याभिषेकक्रिया त्रिषवणस्नानम् । काञ्चनेत्यनेन जलक्रीडायोग्यत्वं व्यज्यते । **रत्नशिलातलेषु** । उपविश्येत्यर्थात् । रत्नशिलेत्यनेन सरसगोष्ठीयोग्यत्वं द्योत्यते । **विबुधस्त्रीसन्निधा**वित्यनेन सम्भोगयोग्यता च । यत् अन्यमुनयः तपोभिः कांक्षन्ति । यत्कांक्षया अन्ये तपांसि चरन्तीत्यर्थः । अत्राश्रमस्य स्वर्गसाम्यं व्यज्यते । भोगयोग्यस्थाने योगमभ्यस्यन्तीति मुनीनां धैर्यातिशयश्च । **उत्सर्पिणी** ऊर्ध्वसर्पणशीला ।

मात--उत्सर्पिणी खलु महतां प्रार्थना। (परिक्रम्याकाशे) अये वृद्धशाकल्य! किमनुतिष्ठति भगवान्मारीचः। किं ब्रवीषि? दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तदस्यै महर्षिपत्नीसहितायै कथयतीति। तर्हि प्रतिपाल्यावसरः प्रस्तावः। (राजानमवलोक्य) अस्मिन्नशोकवृक्षे तावदास्तामायुष्मान्। यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि।

राजा--यथा भवान्मन्यते।

मात--आयुष्मन् साधयाम्यहम्।

[निष्क्रान्तः]

राजा (निमित्तं सूचयित्वा)

मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते॥ २३॥

(नेपथ्ये)

मा खु चावलं करेहि। कहं गदो एव्व अत्तणो पकिदिम्।

राजा-- (कर्णं दत्वा) अभूमिरियमविनयस्य। को नु खल्वेष निषिध्यते। (शब्दानुसारेणावलोक्य) अये को नु खल्वयमनुबध्यमानस्तापसीभ्यामबालसत्वो बालः।

---

१. मा खलु चापलं कुरु। कथं गत एवात्मनः प्रकृतिम्।

प्रतिपाल्यः प्रतीक्ष्यः अवसरो यस्य। प्रस्तावः मारीचदर्शनान्मम। अशोकवृक्षे। तद्वेद्याम्। इन्द्रगुरवे इन्द्रस्य पित्रे मारीचाय। अन्तरमवकाशः। **निमित्तम्।** दक्षिणबाहुस्पन्दनलक्षणम्। तस्य दयितलाभसूचकत्वात्। तेनोद्बोधितदयितापरित्यागखेदस्तामनुसन्धाय सानुशयमाह **मनोरथाये**ति। विषये विषय्युपचारः। मनोरथविषयाय। प्रेयसीमवाप्तुम्। न ममाशा। प्रेयसी न संनिवर्तेत। तस्मात् बाहो तव स्पन्दनं वृथैवेत्यर्थः। उक्तमर्थं सामान्येनोपपादयति पूर्वावधीरितम्। दुःखं कृच्छ्रात्। परिवर्तते। न परिवर्तत इति भावः। अथ। बालं शकुन्तलायाः प्रसूतं कर्मापि केसरिकिशोरं उपमातृस्थानीये तापसपत्न्यौ निवारयतः **मा खलु** इति। चपलस्य कर्म चापलं अकृत्यम्। प्रकृतिं स्वभावम्। चापलम्। **अभूमिः** अस्थानम्। अनुबध्यमानः कृच्छ्रेणानुगम्यमानः। अबालमस्तोकं प्रभूतं सत्वं पराक्रमो यस्य सः अबालः

अर्द्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥ १४ ॥

[ततः प्रविशति यथानिर्दिष्टकर्मा बालस्तापसीभ्याम्]

बालः—जिंभ सिंह दन्दाणि दे गणइस्सम् ।

प्रथमा—अविणीद किण्णो अपच्चणिव्विसेसाणि सत्ताणि विप्पअरेसि । हन्त वड्ढदे संरम्भो । ठाणे खु इसिजणेण सव्वदमणोत्ति किदणामहेओसि ।

राजा—किन्नुखलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः । नूनमनपत्यता मां वत्सलयति ।

द्वितीया—सव्वदमण एसा खु केसरिणी तुमं लङ्घेति जइ से पुत्तअं ण मुञ्चेसि ।

बालः—(सस्मितम्) अम्मो बलिइं खु भीतोह्मि ।

[अधरं दर्शयति]

राजा—

१. डिंभ सिंह दन्तांस्ते गणयिष्यामि ।

२. अविनीत किन्नापत्यनिर्विशेषाणि सत्वानि विप्रकरोषि । हन्त वर्द्धते ते संरंभः । स्थाने खल्वृषिजनेन सर्वदमन इति कृतनामधेयोऽसि ।

३. सर्वदमन एषा खलु केसरिणी त्वां लंघयति यदि अस्याः पुत्रं न मुञ्चसि ।

४. अम्मो बलवत् खलु भीतोऽस्मि ।

सत्वः । "सत्वोऽस्त्री जन्तुषु क्लीं तु व्यवसाये पराक्रमे" इति केशवः । **अर्द्धेति** । अर्द्धपीतमातृस्तनमित्यर्थः । आमर्द्दनेन कर्षणार्थेन स्कन्धग्रहणेन क्लिष्ट अयथातथं केसरं सटा यस्य । **तापसीभ्याम्** । सहेति शेषः । **विप्रकरोषि** बाधसे । **स्थाने** इति । नामधेयस्य योग्यत्वमन्वर्थत्वात् । "आत्मा प्रविश्य जायायां पुत्ररूपेण जायते" इति पुत्रस्य तादात्म्यात्तद्दर्शनेन वत्सलहृदयस्तत्वमजानन् तद्धेतुं विमृशति **किन्नुखल्विति** । हेतुमुत्प्रेक्षते नूनमिति । **भीताः स्मः** । विपरीतलक्षणैषा ।

महतस्तेजसो वीजं बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः ॥ १९ ॥

प्रथमा--वच्छ एदं बालमिइन्दअं मुञ्च अपरं दे कीलिणीअं दाइस्सम् ।

बालः--कहिं देहि णम् ।

[हस्तं प्रसारयति]

राजा-- (दृष्ट्वा सविस्मयं) कथं चक्रवर्तिलक्षणमनेन धार्यते । तथा ह्यस्य ।

प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिः करः ।
अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपङ्कजम् ॥ १६ ॥

द्वितीया—सुव्वदे न सक्को एस वाआमत्तएण विसुमारइदुम् । गच्छ मम केरके उडजे मक्कण्डेअस्स इसिकुमारअस्स वण्णाचित्तिदो मित्तिआमोरओ चिट्ठइ । तं से उवहर ।

प्रथमा--तह । [निष्क्रान्ता]

---

१. वत्स एतं बालमृगेन्द्रं मुञ्च अपरं ते क्रीडनीयकं दास्यामि ।

२. कुत्र देहि ननु ।

३. सुव्रत न शक्य एष वाङ्मात्रेण विस्मारयितुम् । गच्छ मम केरके उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति । तमस्मै उपहर

४. तथा

अहं सिंहातो मनागपि न बिभेमीत्यर्थः । अतो नैव मुञ्चामीति भाव । **महत** इति । यथा बीज प्रतनुक्रमेण म॰ांस्तरुर्भवति । तथायं बालो महातेजा भविष्यतीत्यर्थः । एध इन्धने अपेक्षा यस्य स एधापेक्षः । स्फुलिङ्गावस्थया स्थितः एधापेक्षो वह्निरिव वर्द्धिष्यमाणो वह्निरिवेत्यर्थः । "काष्ठं दार्विन्धनं त्वेध इध्ममेधस्समित् स्त्रिया" मिति सि॰ः । चक्रवर्तिलक्षणम् । न केवलं महापुरुषलक्षणम । **प्रलोभ्येति** । प्रलोभ्यवस्तुनः क्रीडनीयस्य वस्तुनः प्रणये याच्ञायां प्रसारितः । जालग्रथिताः परस्परं निरन्तरसंश्लिष्टाः अंगुल्यो यस्य । अलक्ष्यं पत्राणां दलानां अन्तरं इतरेतरान्तरालं यस्य । इद्धो रागो लौहित्यं यस्याः । नवोषसा उष प्रारम्भेण । भिन्नं

बालः—इमिणा एव्व दाव कीळिस्सं ।

[तापसीं विलोक्य हसति]

राजा—स्पृहयामि खलु दुर्ललितायास्मै ।

आलक्ष्यदन्तमुकुळानिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥ १७ ॥

तापसी—एदु । ण मं अअं गणेइ (पार्श्वं विलोकयन्ती) को एत्थ इसिकुमारआणम् । (राजानं दृष्ट्वा) भद्दमुह मोएहि इमिणा दुम्मोअहत्थग्गाहेण डिंभळीळाए बाहिअमाणं बाळमिएन्दअं ।

राजा—तथा (उपगम्य) अयि भो महर्षिपुत्र ।

एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मनस्त्वया ।
सत्वसंश्रयसुखो विदूष्यते कृष्णसर्पशिशुनेव चन्दनः ॥ १८ ॥

---

१. अनेनैव तावत् क्रीडिष्यामि ।

२. एतु । न मामयं गणयति । कोऽत्र ऋषिकुमाराणाम् । भद्रमुख मोचयानेन दुर्मोचकहस्तग्राहेण डिंभलीलया बाध्यमानं बालमृगेन्द्रम् ।

विकासितम् । प्रसारितेऽपि जालग्रथितांगुलित्व लक्षणम् । **दुर्ललिताय** दुर्निवारशीलाय । विशिष्टबालस्वभावेनोद्बोधितानपत्यताखेद आत्मानं प्रत्यनुशोचति । **आलक्ष्येति** । आलक्ष्या ईषल्लक्ष्या दन्तांकुरा येषाम् । अनिमित्तो निरभिसन्धिःहासो अनिमित्तहासः । अव्यक्तवर्णा अस्पष्टाक्षरा अत एव रमणीया श्राव्या वचःप्रवृत्तिः वाक्प्रसरो येषाम् । अङ्क उत्सङ्ग आश्रयः स्थितिरङ्काश्रयः अङ्काश्रये प्रणयो वाञ्छास्त्येषामित्यङ्काश्रयप्रणयिनस्तान् । अत्र धन्या एवंभूतांस्तनयान् वहन्तस्तदङ्गरजसा मलिनीभवन्तीत्यप्रस्तुतादर्थाद्वैधर्म्येण प्रस्तुतोऽर्थः प्रतीयते । अतोऽहमधन्यः एवंविधं तनयमवहंस्तदङ्गरजसा न मलिनीभवामीत्यर्थः । अप्रस्तुतप्रशंसात्रालङ्कारः स्वभावोक्तिश्चेति तयोस्संसृष्टिः । सिंहशिशुपीडामसहमाना स्वयं वारयितुमशक्ता मुनिकुमारेष्वन्यतममाह्वयति **एत्विति** । न मां गणयति । मामनादृत्य सिंहशिशुं पीडयति । **एवमिति** । आश्रमविरुद्धवृत्तिना सिंहशिशुं पीडयता । किमिति कस्माद्धेतोः । जन्मनस्संयमः ब्राह्मणजातिविहितोहिंसादिभ्य उपरमः । यदुक्तं महाभारते "अहिंसा परमो धर्मः सर्वप्राणिहितं परं तस्मात् प्राणभृतस्सर्वान् न हिंसेत् ब्राह्मणः क्वचित् ब्राह्मणस्सौम्य एवेह जायतेति परा श्रुति" रिति । सत्वसंश्रयसुखः

तापसी—भद्दमुह ण खु एसो इसिकुमारओ ।

राजा—आकारसदृशं चेष्टितमेवास्य कथयति । स्थानप्रत्ययात्तु वयमेवं तर्किणः । (यथाभ्यर्थितमुपतिष्ठन् बालस्पर्शमुपलभ्यात्मगतं)

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्याद्यस्यायमङ्गात् कृतिनः प्ररूढः ॥१९॥

तापसी—(उभौ निर्वर्ण्य) अच्छरिअम् ।

राजा—किमिव ।

तापसी—इमस्स अ तव अ सम्बन्धसंवादिणी आकिदित्ति विह्मापिदह्मि । अपरिइदस्स वि दे अप्पदिलोमो संवुत्तोत्ति अ ।

राजा—(बालमुपलालयन्) आर्ये न चेन्मुनिकुमारोऽयं अथ कोऽस्य व्यपदेशः ।

तापसी—पूरुवंसो ।

---

१. भद्रमुख न खल्वेष ऋषिकुमारः

२. आश्चर्यम् ।

३. अस्य च तव च संबन्धसंवादिनी आकृतिरिति विस्मापितास्मि । अपरिचितस्यापि ते अप्रतिलोमस्संवृत्त इति च ।

४. पूरुवंशः ।

सत्वस्य सत्वगुणस्य संश्रयेण सुखः सुखकरः । चन्दनद्रुमोऽपि सत्वानां प्राणिनां संश्रयच्छायादिना सुखकरः । न दूषणीयः । तस्मात् बालमृगेन्द्रं मुञ्चेति भावः । **कथयति** । आकारव्यापाराभ्यामवगम्यत एव न मुनिकुमारक इत्यर्थः । स्थानप्रत्ययात् । स्थानं ह्याश्रमः । **यथाभ्यर्थित**मिति । बालमृगेन्द्रं मोचयन्नित्यर्थः । "न वाससां न रामाणां नापां स्पर्शस्तथाविधः शिशुनालिङ्ग्यमानस्य सूनोः स्पर्शो यथाविधः" इति भारतोक्तेर्बालस्पर्शात् हृष्यन्त्वगिन्द्रियो विमृशति । **अनेने**ति । कस्यापि कुलांकुरेणेत्यनेन स्वस्य संम्बन्धित्वाभाव उक्तः । गात्रेष्विति बहुवचनेन सुखस्य सर्वाङ्गीणतोक्ता । कां निर्वृतिं प्रभूतां निर्वृतिमित्यर्थः । कृतिनस्सुकृतिनः । अर्थापत्तिरलङ्कारः । आश्चर्यं कुत इत्याह **अस्ये**त्यादि । **व्यपदेशः** वंशः । पूरुवं-

राजा— (आत्मगतं) कथमेकान्वयो मम । अतः खलु मदनुकारिणमत्रभवती मन्यते । अस्त्येतत् पौरवाणां अन्त्यं कुलव्रतम् ।

भवनेषु सुधासितेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम् ।
निरतैकपतिव्रतानि पश्चात्तरुमूलानि गृहीभवन्ति तेषाम् ॥ २० ॥

(प्रकाशं) न पुनरात्मगत्या मानुषाणामेष विषयः ।

तापसी—जह भद्दमुहो भणदि । अच्छरासंबन्धेण इमस्स बालस्स जणणी एत्थ देवगुरुणो तपोवणे पसूदा ।

राजा— (अपवार्य) हन्त द्वितीयमिदमाशाजननम् । (प्रकाशं) सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ।

तापसी—को तस्स धम्मदारपरिच्चाइणो णाम कित्तइस्सदि ।

राजा— (आत्मगतं) इयं खलु कथा मामेव लक्षीकरोति । यदि तावदस्य शिशोर्मातरं नामतः पृच्छेयम् । अथवा न न्याय्यः परदारव्यापारः ।

---

१. यथा भद्रमुखो भणति । अप्सरस्संबन्धेनास्य बालस्य जननी अत्र देवगुरोस्तपोवने प्रसूता ।

२. कस्तस्य धर्मदारपरित्यागिनो नाम कीर्तयिष्यति ।

इयस्य बालस्याश्रमे सम्भावनां वितर्कयति । अस्त्येतादिति । **अन्त्य**मिति । क्षत्रियाणां वानप्रस्थाश्रमोऽन्त्यः । "मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणं बाहुजातोरुजातानामयं धर्मो न विद्यते" इति स्मृतेः । सुधा भित्तिलेपनसाधनविशेषः । अत्र पूर्वार्द्धेन गृहस्थाश्रम उक्तः अन्येन वानप्रस्थाश्रमः । तत्र "वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा" इति पक्षद्वये द्वितीयं पक्षमाह **निरत**त्यादिना । निरता भर्तृशुश्रूषणे एका पतिव्रता येषु । एकेति व्यतिरिक्तपरिजनव्यपोहतत्परः । पूर्वं वार्द्धकादर्वाचीने वयसि । पश्चाद्वार्द्धके । उशन्ति इच्छन्ति । **नखल्वि**ति । आत्मगत्या मानुषगत्या । तत्कथमस्यात्र सङ्गतिरिति भावः । भणतीति । तत्तथेति शेषः । तस्य सङ्गतिमाह । अप्सर इत्यादि । **द्वितीय**मिति । द्वितीयत्वं पूरुवंश्यापेक्षया । इदमप्सरस्सम्बन्धकथनं शकुन्तलाया मेनकापत्यत्वात् । **कस्तस्ये**ति । पापिनस्तस्य नाम न कथयामीत्यर्थः । लक्षीकरोति विषयीकरोति । **यदि ताव**दिति । यद्येषा पितुर्नाम न कथयति तर्हि मातुर्नाम पृच्छामि । अथवेति । मातुर्नाम न पृच्छामी-

(प्रविश्य मयूरहस्ता तापसी)

स॑ब्वदमण सउन्दलावण्णं पेक्ख ।

बालः— (सदृष्टिक्षेपं) कहिं वा अज्जु ।

उभे—एसो णामसारिस्सेण वञ्चिदो मादुवच्छलो ।

सत्यव्रता—ईमस्स मित्तिआमोरस्स रम्मत्तणं देक्खेत्ति भणिदोसि ।

राजा— (आत्मगतं) किं वा शकुन्तलेत्यस्य मातुराख्या । सन्ति पुनर्नामधेयसादृश्यानि । अपिनाम मृगतृष्णिकेव नायमत्र प्रस्तावो विषादाय कल्पते ।

बालः— (विलोक्य) रोअदि मे मित्तिआमोरो । अज्जुए णेअदे एस भद्दमोरओ ।

[क्रीडनीयकमादत्ते]

सत्य— (विलोक्य सावेगं) अम्महे रक्खाकरण्डअं मणिबन्धे से ण दीसइ ।

१. सर्वदमन शकुन्तलावण्यं पश्य ।
२. कुत्र वा अंबा ।
३. एष नामसादृश्येन वञ्चितो मातृवत्सलः ।
४. अमुष्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि ।
५. रोचते मे मृत्तिकामयूरः । अंबायै नीयते एष भद्रमयूरः ।
६. अम्महे रक्षाकरण्डकं मणिबन्धेऽस्य न दृश्यते ।

त्यर्थः । कुत इत्याह **न न्याय्य** इति । शकुन्तस्य मृत्तिकामयूरस्य लावण्यम् । सउन्तलावण्णं इत्यस्य शकुन्तलावर्णमिति * च्छायेति मत्वा पृच्छति । **कहिं** इति । अन्यथाप्रतिपत्तिमपोहति **अमुष्ये**ति । भणितोऽसि । न शकुन्तलावर्णं पश्येतिभणितोऽसीति । बालस्य तापस्याश्च व्यवहारादवगतमर्थमनुभवति **किं वे**ति । माता ह्यस्य शकुन्तला अतोऽयं मम पुत्र एवेति निश्चिन्वानो व्यपायमाशङ्कते । **सन्ति पुन**रिति । अन्यस्या अप्येवं नाम सम्भवतीत्यर्थः । कल्पतेति सम्भावनायां लिङ् अपिनामेति तद्योतकः । काक्वात्र विकल्पो व्यज्यते । अत्र अस्मिन् बाले । अयं प्रस्तावः पुत्रधीः । मम विषादाय । तत्वज्ञानबाध्यत्वात् । मृगतृष्णिकेव सूर्य-

छायायां यादृशोऽर्थः तत्परं तद्वाक्यमिति मत्वेत्यर्थः

राजा—अलमलमावेगेन । नन्विदमस्य सिंहशावमर्दनात् परिभ्रष्टम् ।

[आदातुमिच्छति]

उभे—[1]मा खु मा खु इदं आलंबिअ । कहं गहिदं णेण ।

[विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः]

राजा—किमर्थं प्रतिषिद्धाः स्मः ।

सुव्रता—[2]सुणादु महाराओ एसा अवराजिदा णाम ओसही इमस्स जादकम्मसमए भअवदा मारीएण दिण्णा एदं किल मादापिदरो अत्ताणं वि वज्जिअ अपरो भूमिपडिदं ण गिह्णीअदुत्ति ।

राजा—अथ गृह्णाति ।

सुव्रता—[3]तदो सप्पो भविअ दंसदि ।

राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया? ।

उभे—[4]अणेअसो ।

---

१. मा खलु मा खलु इदमालंब्य । कथं गृहीतमनेन ।

२. श्रृणोतु महाराजः । एषा अपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल मातापितरावात्मानमपि वर्जयित्वा अपरो भूमिपतितां न गृह्णात्विति ।

३. ततस्सर्पो भूत्वा दशति ।

४. अनेकशः ।

मरीचिपूदकधीरिव । आवेगः अतिसम्भ्रमः । अम्मह इति खेदे । **इच्छति** उपक्रमते । ओषधिविकाराभावेनायमस्य बालस्य पितेति निश्चित्याह **महाराजे**ति । गृह्णात्विताति । इत्युक्त्वेत्यर्थः । **अथे**ति । अत्र काका यद्यन्यः कश्चित् गृह्णाति तर्हि किं स्यादित्यर्थः । निर्णेतुं पृच्छति **भवतीभ्या**मिति । विक्रिया सर्पभावः । **अनेकशः** । प्रत्यक्षीकृतेत्यर्थात् । ओषधिविकाराभावान्ममौरस एवायमिति निश्चित्याह

राजा— (सहर्षं) किमिदानीं पूर्णमपि मनोरथं नाभिनन्दामि ।

[बालं परिष्वजते]

सत्य—सुब्वदे एहि इमं वुत्तन्तं णिअमव्वावुदाए सउन्दलाए णिवेदेम ।

[निष्क्रान्ते]

बालः—मुञ्च मं अज्जूए सआसं गच्छेमि ।

राजा—पुत्रक मया सहैव मातरमभिनन्दिष्यसि ।

बालः—मम खु तादो दुस्सन्तो ण तुमम् ।

राजा— (सस्मितं स्वगतं) एष विवाद एव प्रत्याययति ।

[ततः प्रविशत्येकवेणीधरा शकुन्तला]

शकु—विआरकाले वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसंसा आसि अत्तणो भाअहेएसु । अहव जह साणुमदीए आचक्खिदं तह सम्भावीअदि एदम् ।

राजा— (शकुन्तलां दृष्ट्वा) अये इयमत्रभवती शकुन्तला ।

---

१. सुव्रते एहि इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः ।

२. मुञ्च मां अंबायास्सकाशं गच्छामि ।

३. मम खलु तातो दुष्यन्तः न त्वम् ।

४. विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न मे आशंसा आसीदात्मनो भागधेयेषु । अथवा यथा सानुमत्या आख्यातं तथा संभाव्यत एतत् ।

किमिति । मनोरथं पूर्णमपि अभिवाञ्छितं सिद्धमपि । "काङ्क्षा लिप्सा मनोरथ" इत्यमरः । किन्नाभिनन्दामि किन्नानुभवामि । अनुभवति परिष्वङ्गेन । ननूकालोचितां प्रतिपत्तिमाह **सुव्रते** इति । कथितेन सानुमत्या कान्तोदन्तेन किञ्चिदाश्वस्ता । आकर्ण्य बालकदशामसम्भवाच्चिन्तयत्येवं । **विआरे**ति । विकारकाले विकारयोग्ये काले । प्रकृतिस्थां अविकाराम् । भागधेयेष्विति कार्ये कारणोपचारः । भर्तरीत्यर्थः । **अथवा** आशंसा । कुत इत्याह **यथे**ति । एतत् प्रियतमागमनम् ।

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति ॥ २१ ॥

शकु— (पश्चात्तापविवर्णं राजानं दृष्ट्वा) ण खु[1] अज्जउत्तो विअ । को एसो दाणिं किदरक्खामङ्गलं दारअं गत्तसंसग्गेण दूसेइ ।

बालः— (मातरमुपेत्य) अज्जुए[2] एसो को पि मं पुत्तत्ति आलवदि ।

राजा—प्रिये क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तम् । यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि ।

शकु— (आत्मगतं) हिअअ[3] अस्ससिहि मच्छरिणा वि अणुकम्पिदह्मि देव्वेण । अज्जउत्तो एव्व एसो ।

---

१. न खल्वार्यपुत्र इव । क एष इदानीं कृतरक्षामङ्गलं दारकं गात्रसंसर्गेण दूषयति ।

२. अंब ! एष कोऽपि मां पुत्र इत्यालपति ।

३. हृदय आश्वासिहि । मत्सरिणाप्यनुकम्पितास्मि दैवेन । आर्यपुत्र एवैषः ।

वसने इति । अधरोत्तरे । परिधूसरे । संस्काराद्यभावात् । नियमेन भर्तृविरहोचितेन व्रतोपवासादिना क्षामं क्षीणं मुखं यस्याः । शुद्धशीला साध्वी । दीर्घं चिरकालम् । वहन्ती । अनेन दुष्करत्वं सावधानत्वं च व्यज्यते । तस्याश्शोचनीयां तामवस्थामवलोक्य तत्प्रयोजकमात्मानं प्रत्यमर्षिन आह अतिनिष्करुणस्येति । सम्बन्धमात्रे षष्ठी । मम क्रौर्यमेकमेवात्र हेतुरित्यर्थः । **दृष्ट्वे**ति । तमज्ञात्वेति शेषः । मामियं न जानातीत्यवधार्याह । **प्रिये** इति । क्रौर्यं तत्कार्यं प्रत्याख्यानम् । अनुकूलपरिणामं अनुकूलः परिणामः पश्चात्तापलक्षणो यस्य । परिणामस्तूपादानस्य स्वाकारपरित्यागेनाकारान्तरापत्तिः । यथा मृदो घटत्वापत्तिः । तथा प्रत्याख्यानं पश्चात्तापरूपतया परिणतम् । तस्यानुकूल्यं तुल्यदुःखकारित्वात् । तदाह प्रत्यभिज्ञातमिति । तुल्यदुःखहेतुवैवर्ण्यतानवादिना ह्यप्रत्यभिज्ञानमिति भावः * । स्वरेण तं प्रत्यभिज्ञायाह **हृदये**ति पूर्व-

---

* परिणामः पर्यवसानम् । मत्कृतं क्रौर्यं पात्रमाहात्म्यादनिष्टाय नाकल्पतेत्यर्थः । त्वदन्या नारी तथा निराकृता निराकर्तुर्मुखमपि पश्चान्न पश्येत् । त्वं पुनः सौमनस्यात्सम्मुखमागत्य मां प्रत्यभिजानासि इति वा व्याख्येयम् ।

राजा—प्रिये !

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि ।
उपरागान्ते शशिनस्समुपगता रोहिणीयोगः ॥ २२ ॥

शकु—जेदु अज्जउत्तो ।[1]

[इत्यर्धोक्ते बाष्पकण्ठी विरमति]

राजा—सुन्दरि ! ।

वाष्पेण प्रतिरुद्धेऽपि जयशब्दे जितं मया ।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम् ॥ २३ ॥

बालः—अज्जुए को एसो ।[2]

शकु—वच्छ भाअहेआइं दे पुच्छ ।[3]

[राजा शकुन्तलायाः पादयोः पतति]

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसस्सम्मोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाश्शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥ २४ ॥

१. जयत्वार्यपुत्रः ।

२. अंब क एषः

३. वत्स भागधेयानि ते पृच्छ ।

वृत्तान्तविस्मरणान्मया त्वयि क्रौर्यं कृतमित्याह **स्मृती**ति । स्मृत्या अनुभवसंस्कारोद्बोधेन भिन्नं मोहतमः तम इव मोहः विस्मृतिर्यस्य स स्मृतिभिन्नमोहतमाः तस्य । सुमुखीत्यनेनाश्चर्यं तव प्रत्याख्यानव्यलीकराहित्यमिति द्योत्यते । उपरागो राहुग्रसनम् । तस्यान्ते निवृत्तौ समुपगतः सङ्गतः । दृष्टान्तोऽयम् । चाटूक्तिं करोति **सुन्दरीत्या**दिना । सुन्दरि इदानीं विशेषदर्शयासि । स्त्रीणां किलिकिञ्चिताख्यो भावो विशेषदर्शयतामावहति । "क्रोधाश्रुहर्षभीत्यादेस्सङ्करः किलिकिञ्चितम्" इति । अविद्यमानस्संस्कारोऽलक्तकादिना यस्य । असंस्कारं पाटलं च ओष्ठपुटं यस्य तदसंस्कारपाटलोष्ठपुटम् । अत्र विभावनालङ्कारः । "क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना" इति । **भागधेया**नीति पूर्ववत् । **सुतन्वि**ति । सुतन्वित्यनेन व्यलीकस्य विहितकाराभावो व्यज्यते । हृदयादित्यनेन हृदये निगूढमस्तीति । व्यलीकमप्रियम् । किमपि । केनापि हेतुनेत्यर्थः । सम्मोहः अज्ञानम् । तदा त्वय्युपयातायाम् । अज्ञानान्मयैव कृतं तस्मात्

शकु—उट्ठेदु अज्जउत्तो । णूणं मम सुअरिदपडिबन्धअं पुराकिदं तेसु दिअहेसु परिणामाभिमुहं आसि जेण तह साणुक्कोसो वि अज्जउत्तो मइ तहविहो संवुत्तो ।

[राजा उत्तिष्ठति]

शकु—अह कहं अज्जउत्तेण सुमरिदो दुक्खभाई अअं जणो ।

राजा—उद्धृतविषादशल्यः कथयिष्यामि ।

मोहान्मया सुतनु पूर्वमुपेक्षितस्ते
यो बद्धबिन्दुरधरं परिबाधमानः ।
तं तावदाकुलितपक्ष्मविलग्नमद्य
बाष्पं प्रमृज्य विगतानुशयो भवामि ॥ २५ ॥

[यथोक्तमनुतिष्ठति]

शकु—(नाममुद्रां दृष्ट्वा) अज्जउत्त इदं दे अङ्गुलीअअम् ।

राजा—अथ किं । अस्मादङ्गुलीयोपलंभात् खलु मया स्मृतिरुपलब्धा ।

१. उत्तिष्ठत्वार्यपुत्रः । नूनं मम सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणामाभिमुखमासीत् । येन तथा सानुक्रोशोऽप्यार्यपुत्रो मयि तथाविधस्संवृत्तः ।

२. अथ कथमार्यपुत्रेण स्मृतो दुःखभागयं जनः ।

३. आर्यपुत्र इदं तदङ्गुलीयकम् ।

क्षन्तव्यमिति भावः । मम नामसत्वमत्र हेतुरित्यात्मानमधिक्षिपति **प्रबलेति** । प्रबलं प्रभूतं तमस्तमोगुणो येषां ते प्रबलतमसः । तेषां एवंप्रायाः अज्ञानादयः । यदुक्तं "सत्वं ज्ञानं तमोऽज्ञानं रजो मिश्र उदाहृतः" इति । शुभेषु श्रेयस्सूपनतेषु वृत्तयः । सन्ति ह्येति शेषः । अन्धः उपहतदृष्टिः । अहिशङ्कया सर्प इति भ्रान्त्या । **नूनम्** । तर्कयामीत्यर्थः "नूनं तर्केऽथ निश्चये" इत्यमरः । सुचरितस्य तत्कार्यस्य सुखस्य प्रतिबन्धकं पुराकृतम् । अर्थाद् दुष्कृतम् । अनुक्रोशोऽनुकम्पा । **उद्धृतेति** । उद्धृतः विषाद एव शल्यो यस्मात् स उद्धृतविषादशल्यः । शल्योद्धारप्रकारमाह **मोहा**दिति ।

शकु—विसमं किदं णेण । जं तदा अज्जउत्तस्स पच्चअकाळे दुल्ळहं आसि ।

राजा—तेन हि ऋतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम् ।

शकु—णं से विस्ससामि अज्जउत्तो एव्व णं धारेदु ।

[ततः प्रविशति मातलिः]

मात—दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान् वर्धते।

राजा—अभूत् सम्पादितस्वादुफलो मे मनोरथः । मातले न खलु विदितोऽयमाखण्डलस्यार्थः? अथवा किमीश्वराणां परोपक्षम्? ।

मात— (सस्मितं) अथकिम् । एह्यायुष्मन् भगवान्मारीचस्ते दर्शनं वितरति ।

राजा—शकुन्तले अवलंब्यतां पुत्रः । त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि ।

शकु—हिरिआमि अज्जउत्तेण सह गन्तुम् ।

राजा—आचरितव्यमभ्युदयकालेषु । एह्येहि ।

[सर्वे परिक्रामन्ति]

[ततः प्रविशत्यदित्या सार्द्धमासनस्थो मारीचः]

मारी— (राजानमवलोक्य) दाक्षायणि !

---

१. विषमं कृतमनेन । यत्तदा आर्यपुत्रस्य प्रत्ययकाले दुर्लभमासीत् ।

२. नास्य विश्वसिमि । आर्यपुत्र एवैनं धारयतु ।

३. जिह्रेम्यार्यपुत्रेण सह गन्तुम् ।

मोहादज्ञानात् । अत्र पुरातनाद्यतनयोर्बाष्पयोरेकत्वमभेदाध्यवसायात् । **विषमं** सङ्कटम् । कुत इत्याह यदिति । **तेने**ति । तेन हि लता ऋतुसमवायचिह्नं कुसुमं प्रतिपद्यतामित्यन्वयः । अत्राप्रस्तुतात्सदृशात् सदृशान्तरं प्रस्तुतं प्रतीयते । अतो मत्समागमाचिह्नं अंगुलीयकं धारयतु भवतीत्यर्थः । **न खल्वि**ति । काक्वा प्रश्नः । मनोरथावाप्तिराखण्डले न निवेद्यते किमु इत्यर्थः । अथवा विदितमेवेत्यर्थः । कुत

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्ता
चापेन यस्य विनिवर्तितकर्मजातं
तत् कोटिमत् कुलिशमाभरणं मघोनः ॥ २६ ॥

अदितिः--संभाविणिज्जाणुभावा से आकिदी ।

मातलिः--आयुष्मन् पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः । तदुपसर्प ।

राजा--मातले! एतौ-

प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं
भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम् ।
यस्मिन्नात्मभुवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसंभवमिदं तत्स्रष्टुरेकान्तरम् ॥ २७ ॥

मातलिः-- अथकिम् ।

राजा-- (उपेत्य) उभाभ्यामपि वासवनियोज्यो दुष्यन्तः प्रणमति ।

मारीचः--वत्स चिरं पृथिवीं पालय ।

---

१. संभावनीयानुभावास्याकृतिः ।

इत्याह **किमिति** । दर्शनं दर्शनावसरम् । **पुत्रस्येति** । विनिवर्तितं शमितं कर्मजातमसुरसंहारलक्षणं यस्य तद्विनिवर्तितकर्मजातम् । अत एव कोटिमत्प्रशस्ताश्रियुक्तम् । आभरणं हस्तालङ्कारः । भवतीति शेषः । अत्र चापकर्तृककुलिशकर्मजातविवर्तनात् कार्यादसुरवधलक्षणं कारणं प्रतीयते । अयं तव पुत्रस्य परिपन्थिनोऽसुरान् निहन्तीत्यर्थः । पर्यायोक्तमत्रालङ्कारः । **सम्भावनीयेति** । सम्भावनीय ऊह्यः अनुभावो यया कारणभूतया सा सम्भावनीयानुभावा । **एताविति** । अत्र काक्वा प्रश्नः । हे मातले एतौ तावद् द्वन्द्वं किमु इत्यन्वयः । यत् द्वन्द्वं द्वादशधा स्थितस्य तेजसः आदित्यानां कारणं प्राहुः । यज्ञभागेश्वरं यज्ञो भागो येषां तेषां देवानामीश्वरम् । देवेन्द्रम् । सुषुवे । यस्मिन्नात्मभुवो ब्रह्मणः पर उत्कृष्टः पुरुषः । पुरुषोत्तमः । भवाय जन्मने आस्पदं प्रतिष्ठां चक्रे । इन्द्रावरजत्वेन । दक्षमरीचिसम्भवम् । दक्षान्मरीचेश्च सम्भवो यस्य । दाक्षायणीमारीचनामकम् । स्रष्टुः एकान्तरं एकः दक्षः मारी-

अदितिः—अप्पदिरहो होहि ।

शकु—दारअसहिदा सउन्दला वो पादवन्दणं करेदि ।

मारी—वत्से ।

आखण्डलसमो भर्ता जयन्तप्रतिमस्सुतः ।
आशीरन्या न ते योग्या पौलम्या सदृशी भव ॥ २८ ॥

अदि—जादे भत्तुणो बहुमदा होहि । अवस्सं दे दीहाऊ वच्छो उभअकुलणन्दणो होदु । उपविसह ।

[सर्वे प्रजापतिमभित उपविशन्ति]

मारीचः—(एकैकं निर्दिशन्)

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान् ।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतम् ॥ २९ ॥

राजा—भगवन्! प्रागभिप्रेतसिद्धिः पश्चाद्दर्शनम् । अपूर्वः खलु वोऽनुग्रहः । पश्यतु भवान् ।

उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्तु संपदः ॥ ३० ॥

---

१. अप्रतिरथो भव ।

२. दारकसहिता शकुन्तला वां पादवन्दनं करोति ।

३. पुत्रि! भर्तुर्बहुमता भव । अवश्यं ते दीर्घायुर्वत्स उभयकुलनन्दनो भवतु । उपविशत ।

विश्रान्तरे मध्ये यस्य । **आखण्डले**ति । स्पष्टम् । **दिष्ट्ये**ति । अत्र साध्वी शकुन्तला इदं सदपत्यं भवान् इति त्रयं समागतमिति यत् एतच्छ्रद्धा वित्तं विधिश्चेति त्रयं समागतमित्यर्थः । **अभिप्रेतसिद्धिः** पुत्रदारसमागमः । अपूर्वः पूर्वं क्वचिदपि न दृष्टः । अपूर्वत्वमुपपादयति **उदेती**ति । अयं क्रमः । पूर्वं निमित्तं पश्चान्नैमित्तिकमित्येवंरूपः । तुशब्दो विशेषद्योतकः । निमित्तभूतः प्रसादः पश्चान्नैमित्तिकारम्पदः

मात—एवं विधातारः प्रसीदन्ति ।

राजा—भगवन्निमामाज्ञाकरीं वो गान्धर्वेण विधिनोपयम्य कस्यचित् कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात् प्रत्यादिशन्नपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य । पश्चादेनामङ्गुलीयदर्शनादूढपूर्वामवगतोऽहम् । तच्चित्रमिव मे प्रतिभाति ।

यथा गजो नेति समक्षरूपे तस्मिन्नतिक्रामति संशयस्स्यात् ।
पदानि दृष्ट्वा तु भवेत् प्रतीतिस्तथाविधो मे मनसो विकारः ॥ ३१ ॥

मारी—वत्स अलमात्मापचारशङ्कया । सम्मोहोऽपि त्वय्यनुपपन्नः श्रूयताम् ।

राजा—अवहितोऽस्मि ।

मारी—यदैवाप्सरस्तीर्थावतरणात् प्रत्यादेशविक्लवां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि दुर्वाससश्शापादियं तपस्विनी सहधर्मचारिणा त्वया प्रत्यादिष्टा नान्यथेति। स चायमंगुलीयदर्शनावसानः ।

राजा— (सोच्छ्वासं) एष वचनीयान्मुक्तोऽस्मि ।

शकु— (स्वगतं) दिट्ठिआ काळणप्पच्चादेसी अज्जउत्तो । ण खु सत्तं अत्ताणं सुमरामि । अहव पत्तो मए सावो विरहसुण्णहिअआए । अदो एव्व सहीहिं अच्चादरेण सन्दिट्ठम्हि भत्तुणो अङ्गुलीअअं दंसइदव्वं ति ।

---

१. दिष्ट्या कारणप्रत्यादेशी आर्यपुत्रः । न खलु शप्तमात्मानं स्मरामि । अथवा प्राप्तो मया शापो विरहशून्यहृदयया । अत एव सखीभ्यामत्यादरेण सन्दिष्टास्मि भर्तुरङ्गुलीयकं दर्शयितव्यमिति ।

पूर्वमिति भावः । **विधातारः** प्रजापतयः । (आज्ञाकरीं भवत इति शेषः) **यथे**ति । समक्षरूपे प्रत्यक्षरूपे । अतिक्रामति तिरोभवति । संशयः गजो न वेति । पदानि पदविन्यासप्रतिबिम्बानि । प्रतीतिः गज एव मया दृष्ट इति । मनोविकारः । अस्यामुपनतयां नेयं मम भार्येति पुनस्तिरोहितायां मम भार्या वा न वेति पुनरगुलीयकं दृष्ट्वा मम भार्यैवेयं एवंविधा प्रतीतिः । कण्वविषयापराधशङ्कां निरस्यति **अल**मिति । सदा प्रबुद्धस्य मे कथं तदा सम्मोहोऽभूदित्याशङ्कामपनयति **सम्मोहोऽपी**ति । उपप-

मारीचः—वत्से विदितार्थासि, सहधर्मचारिणं प्रति न त्वया मन्युः कार्यः । पश्य -

शापादसि प्रतिहता स्मृतिरोधरूक्षे भर्तर्यपेततमसि प्रभुता तवैव ।
छाया न मूर्छति मलोपहतप्रसादे शुद्धे तु दर्पणतले सुलभावकाशा ॥३२॥

राजा—यथाह भगवान् ।

मारीचः—वत्स कच्चिदभिनन्दितस्त्वया विधिवदस्माभिरनुष्ठित-जातकर्मा पुत्र एष शाकुन्तलेयः ? ।

राजा—भगवन्नत्र खलु मे वंशप्रतिष्ठा

मारीचः—तथाभाविनमेतं चक्रवर्तिनं पुत्रमवगच्छतु भवान् । पश्य—

रथेनानुत्खातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः ।
इहायं सत्त्वानां प्रसभदमनात् सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥ ३३ ॥

राजा—भगवता कृतसंस्कारे सर्वमस्मिन् वयमाशास्महे ।

अदितिः—भअवं तुए दुहिदुमणोरहसंम्पत्तीए कण्णो वि दाव तुह पस्सचरेहिं तापसेहिं सुदवित्थरो करीअदु । दुहिदुवल्लहा मेणआ इह एव्व मं उवअरन्ती चिट्ठइ ।

१. भगवन् त्वया दुहितृमनोरथसम्पत्त्या कण्वोऽपि तावत्तव पार्श्वचरैस्तापसैः श्रुतविस्तरः क्रियताम् । दुहितृवल्लभा मेनका इहैव मामुपचरन्ती तिष्ठति ।

त्तिमाह **यदेवे**ति । अवतरणात् । अवतरत्यनेनेत्यवतरणं सोपानमार्गः । **विदितार्था** विदितपरमार्था । **शापा**दिति । असीति त्वमर्थमव्ययम् । प्रतिहता अलब्धप्रवेशा । स्मृतिरोधरूक्षे । स्मृतेः स्मरणस्य रोधेन शापहेतुकेन । रूक्षे क्रूरे । प्रतिरोधरूक्ष इति वा पाठः । भर्तरि भर्तृमनसि । अपेततमसि अंगुलीयकदर्शनेन शापनिवृत्तावज्ञाने नष्टे । प्रभुता ?। लब्धप्रवेशा च्छाया प्रतिबिम्बम् । मूर्छति प्रतिफलति । दृष्टान्तोऽलङ्कारः । **तथाभाविनं** वंशप्रतिष्ठाकरम् । **रथेने**ति । अनुत्खातस्तिमितग-

शकु—मणोरहो खु मे भणिदो भअवदीए ।

मारीचः—तपःप्रभावात् प्रत्यक्षमेतत्सर्वं तत्रभवतः ।

राजा—अतः खलु मामनभिक्रुद्धो गुरुः ।

मारीचः—तथाप्यसौ प्रियमस्माभिः प्रष्टव्यः । कोऽत्र भोः ।

(प्रविश्य शिष्यः)

भगवन्नयमस्मि

मारीचः—गालव इदानीमेव हि विहायसा गत्वा तत्रभवते कण्वाय मद्वचनात् प्रियमावेदय यथा पुत्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति ।

शिष्यः—यदाज्ञापयति भगवान् ।

[इति निष्क्रान्तः]

मारीचः—वत्स त्वमपि स्वापत्यदारसहितः सख्युराखण्डलस्य रथमारुह्य राजधानीं प्रतिष्ठस्व ।

राजा—यदाज्ञापयति भगवान् ।

मारीचः—अपि च ।

तव भवतु बिडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञः स्वर्गिणो भावयालम् ।
युगशतपरिवर्तानेवमन्योन्यकृत्यै-
र्नयतमुभयलोकानुग्रहश्लाघनीयैः ॥ ३४ ॥

राजा—भगवन् यथाशक्ति श्रेयसि प्रयतिष्ये ।

मारीचः—किं ते भूयः प्रियमुपहरामि ?

राजा—अतः परमपि यदि मे भगवान् प्रसन्नः कर्तुमिच्छति । इदमस्तु ।

१. मनोरथः खलु मे भणितो भगवत्या ।

तिना आकाशचारिणत्यर्थः । पुरा [illegible] पुरे' इत्यादिना भविष्यति लट् । इह आश्रमे । सर्वदमनः [illegible] । सर्वेति । भावय सम्भावय ।

भरतवाक्यम्—

प्रवर्ततां प्रकृतिहिताय पार्थिव-
स्सरस्वती श्रुतिमहिता महीयसाम् ।
ममापिच क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥ ३५

[इति निष्क्रान्तास्सर्वे]

सप्तमोऽङ्कः ।

॥ समाप्तमिदं नाटकम्

परिवर्त आवृत्तिः । **भरतवाक्यम्** । भरतस्य नटस्य प्रस्तावानुकारिणो मङ्गला-शंसनतत्परं वाक्यम् । **प्रवर्तता**मिति । प्रकृतिहिताय । उपलक्षणमेतत् प्रजानामपि । पार्थिवः प्रजानां विनयाधानरक्षणभरणादिकं हितं कर्तुं प्रवर्तताम् । प्रवर्ततामिति द्वितीयपादेऽप्यनुषज्यते । महीयसां महाकवीनाम् । श्रुतिमहिता आह्लादकत्वादिना श्रोत्रियपूजिता । सरस्वती काव्यात्मिका प्रवर्तताम् । यदुक्तमनर्घराघवे "यावत् [illegible] वकितं यावत् भवानीपतेर्लक्ष्मीकण्ठहठग्रहप्रणयिता यावच्च दोष्णा [illegible] यावच्च प्रतिसामसारणीविधिव्यग्रौ करौ ब्रह्मणः स्थेयासुश्श्रुतिशुक्तिलेह्यमधवस्तावत् [illegible] सूक्तयः " इति । ममापि चेति । अपिच । आशंस्यान्तरमस्तीत्यर्थः । तदाह आत्मभूः श्रीपरमेश्वरः मम पुनर्भवं संसारदुःखं क्षपयतु । परिगतशक्तिः । परिगता [illegible] देहार्धतादात्म्यङ्गता शक्तिश्शिवा यस्येत्यर्थः । अत आह नीललोहित इति । यथा "वामे मरतकश्यामा दक्षिणे विद्रुमारुणा देवता दम्पतिमयी सा मे कामदुघा भवेत्" इति । अत्र महाकविना "आरम्भे मङ्गलं कुर्यात् समाप्तावपि मङ्गलम्" इति दर्शनानुसारेण आरम्भे 'या सृष्टि'रित्यादिना समाप्तावनेन च मङ्गलाचरणं कृतमिति शिवम् ।

इत्यभिरामविरचितेऽभिज्ञानशाकुन्तलदिङ्मात्रदर्शने

सप्तमोऽङ्कः ।

शुभमस्तु

श्लोकसूची ।

पृष्ठम्	पद्यम्
१५०	अक्लिष्टबाल—
१२२	अतः परीक्ष्य
२१	अधरः किसलयरागः
५६	अध्याक्रान्ता
४६	अनवरतधनु—
५२	अनाघ्रातं
५७	अनुकारिणि
९५	अनुमतगमना
३४	अनुयास्यन्
१७१	अनेन कस्यापि
१६१	अन्तर्गतप्रार्थितं
८६	अन्तर्हिते शशिनि
७७	अपरिक्षतकोमळ —
१०२	अभिजनवतो
५४	अभिमुखे मयि
१११	अभ्यक्तमिव
६४	अभ्युन्नता पुर—
९४	अमी वेदीं
७०	अयं स ते
१६३	अयमरविवरे—
१०४	अर्थो हि
१६८	अर्धपीत—
२३	असंशयं क्षत्र—
१५६	अस्मात् परं
१००	अस्मान् साधु
१५७	अहन्यह—
१०५	अहिणवमहु—
१३३	आअम्महरिअ—
१८१	आखण्डलसमो
१०७	आचारइत्य—
१२३	आजन्मनः
४	आपरितोषात्
१७०	आलक्ष्यदन्त—
१४१	इतः प्रत्यादिष्टा
१८	इदं किलाव्याज—
७४	इदमनन्यपरायण—
६९	इदमशिशिरैः
११६	इदमुपनत—
५	इसिचुंबि—
९६	उग्गलिअ—
९८	उत्पक्ष्मणो—
७६	उत्सृज्य कुसुम—
१८१	उदेति पूर्व
७१	उन्नमितैक—
१६५	उपोढशब्दा
१४४	एकैकमत्र
१७०	एवमाश्रमविरुद्ध—
१५८	एष त्वामभि—
१५०	एषा कुसुम—
९९	एसा वि पियेण
१०९	औत्सुक्यमात्र—
२५	कः पौरवे
१४५	कथं नु तं
६१	का कथा बाण—
१२६	कामं प्रत्यादिष्टां
४१	कामं प्रिया
१४८	कार्या सैकत—
११२	कास्विदवकुण्ठन—
११६	किं कृतकार्य—
११०	किं तावदत्र—

पृष्ठम्	पद्यम्
७५	किं शीतलैः
११३	कुतो धर्मक्रिया
१२४	कुमुदान्येव
१४९	कृतं न
११७	कृताभिमर्शा—
१५९	कृतानुकारव्या
५९	कृत्ययोर्भिन्न—
८	कृष्णसारे
६०	क वयं क
६६	क्षामक्षामक—
९२	क्षौमं केन—
३८	गच्छति पुरः
७७	गान्धर्वेण
४८	गाहन्तां महिषा
९	ग्रीवाभङ्गा
२४	चलापाङ्गां
५१	चित्रे निवेश्य
१३५	चूतानां चिर—
१२	जन्म यस्य पुरोः
६२	जाने तप—
१३०	ज्वलति चलिते—
१२	तत्साधुकृत—
१२३	तदेषा भवतः
७२	तपति तनु—
६२	तव कुसुम—
१८४	तव भवतु
१४३	तव सुचरित—
७	तवास्मिगीत—
७९	तस्याः पुष्पमयी
३६	तीव्राघात—
७२	तुज्झ ण आणे
१३५	तुमसि मए
३६	तुरगखुरहत—
१६३	त्रिस्रोतसं
१६०	त्वन्मतिः केवला
११४	त्वमर्हतां प्रा—
५४	दर्भाङ्कुरेण
१५१	दर्शनसुख
८९	दुःषन्तेना—
४४	न नमयितु—
११०	नियमयसि
१४	नीवाराः शुक—
५६	नैतच्चित्रं
७४	परिग्रहबहु—
९५	पातुं न प्रथमं
१८०	पुत्रस्य ते
६७	पृष्टा जनेन
१०८	प्रजाः प्रजास्स्वा-
१५२	प्रजागरात्
१३७	प्रत्यादिष्टवि—
१३८	प्रथमं सारङ्गाक्ष्या
१६१	प्रथमोपकृतं
१६९	प्रलोभ्यवस्तु—
१८५	प्रवर्ततां
१६६	प्राणानामनिलेन
१८०	प्रादुर्भावदशधा
१७७	बाष्पेण प्रति—
१७२	भवनेषु
११२	भवन्ति नम्रा—
३३	भव हृदय
१०८	भानुः सकृ—
१०३	भूत्वा चिराय
१६७	मनोरथाय

पृष्ठम्	पद्यम्
१२१	मय्येव विस्मरण—
१६९	महतस्तेजसो
१११	महाभागः कामं
३१	मानुषीषु कथं
१०	मुक्तेषु रश्मिषु
१३९	मुनिसुताप्रणय—
७९	मुहुरंगुलि—
१२४	मूढःस्यामह—
४७	मेदश्छेद—
१७८	मोहान्मया
१८२	यथा गजो नेति
११	यदालोके
१२४	यदि यथा वदति
५५	यदुत्तिष्ठति
१४६	यद्यत्साधु
९४	ययातेरिव
९७	यस्य त्वया
८५	यात्येकतो—
१	या सृष्टिः
९३	यास्यत्यद्य
१५४	येन येन
१५९	यो हनिष्यति
१८३	रथेनानुत्खाता
१३७	रम्यं द्वेष्टि
१०७	रम्याणि वीक्ष्य
९५	रम्यान्तरः कमलिनी
१३	रम्यास्तपोधनानां
१६५	वल्मीकार्ध —
१७६	वसने परिधूसरे
३६	वाचं न मिश्रयति
८२	विचिन्तयन्ती
१६२	विच्छित्तिशेषैः
३२	वैखानसं

पृष्ठम्	पद्यम्
११८	व्यपदेशमा—
६३	शक्यमरविन्द—
४९	शमप्रधानेषु
१०४	शममेष्यति
१२८	शहजे किल
१६	शान्तमिदमाश्रम—
१८३	शापादसि
१६	शुद्धान्तदुर्लभ—
१०१	शुश्रूषस्व
१६४	शैलानामव—
१५५	संरोपिते—
१६०	सख्युस्ते स किल
९६	सङ्कल्पितं प्रथम —
११५	सतीमपि ज्ञाति—
१९	सरसिजमनुविद्धं
७२	सन्दष्टकुसुम—
१४८	साक्षात्प्रिया—
७९	सायन्तने सवन—
१६२	सिध्यन्ति कर्मसु
१६१	सुखपरस्य हरेः
१७७	सुतनु हृदयात्
६	सुभगसलिला—
५१	सुरयुवतिसंभवं
६५	स्तनन्यस्तोशीरं
१२०	स्त्रीणामशिक्षित—
४२	स्निग्धं वीक्षितं
६७	स्मर एव ताप—
१७७	स्मृतिभिन्नमोह—
३४	स्रस्तांसा—
१४३	स्वप्नो नु
१०९	स्वसुखनिरभि—
१६५	स्वायंभुवान्मरीचेः
१४७	स्विन्नांगुलि—

शुद्धिपत्रम् ।

पृष्ठम्	मूले व्याख्यायां वेति	पङ्क्ति	अशुद्धम्	शुद्धम्
१	व्या	२	नेयार्थतया	नेयानभिनेयार्थतया
६	,,	१७	मुखवाद्य	मुरजवाद्य
८	,,	२३	तिङन्तने	तिङन्तेन
११	,,	१६	पदत्रये	पादत्रये
१५	,,	१०	शंसत्प्रास्पन्दत	शंसन् प्रास्पन्दत
२१	,,	७	सहकारावस्थेतिभावः	सहकारवरस्येत्यर्थः
,,	,,	९	हळा इति	नवमालिकासहकारयोस्सव्यारोपितं वधूवरत्वमनुस्मृत्याह हळा इति
२४	मू	३	मधुर	मधुरं
,,	व्या	४	राङ्ग	पाङ्ग
२५	मू	४	राजभाव	अथवा राजभाव
,,	व्या	२	करवाणीत्याह	करणं यमित्याह
३३	,,	१०	हविपर्ला	हविपर्णा
३४	मू	२	तथाहि	अर्हहि
३५	,,	१५	विसृष्टव्यस्य	विस्रष्टव्यस्य
३९	,,	७	दासीपुण्तेहि	दासीएपुत्तेहिं
४७	,,	२	स्थिरप्रतिज्ञो	स्थिरप्रतिबन्धो
,,	व्या	२	बन्धमुपरोधः	बन्ध उपरोधः
६३	,,	९	उग्रातपामित्य	उग्रातपामित्य
,,	,,	१५	लिङ्गवचन	विलिङ्गवचन
६६	,,	५	क्षार्मामि	क्षामोंन
६७	,,	४	लितमुखी	वलितमुखी
७०	,,	५	मानो स्थानेऽतवा	मानोऽस्थाने तवा
७१	मू	५	प्रीया	प्रिया
७५	व्या	५	साध्वाम	साध्वस
,,	,,	१०	सर्वागीण	सर्वाङ्गीणं
७६	मू	१	यथा सुखं	यथासुखं
,,	,,	१३	प्रमवामि	प्रभवामि
७८	,,	२०	सुखोपनते मनोरथे	सुखोपनते ते मनोरथे
८०	,,	११	निवृत्त	निर्वृत्त
,	व्या	६	गतुं	गतं
८१	मू	१	पक्खोमि	पेक्खामि

पृष्टम्	मूले व्याख्यायां वेति	पङ्क्ति	अशुद्धम्	शुद्धम्
८४	मू.	१२	तन	तेन
,,	,,	१८	रक्षणांया	रक्षणीयाखलु
८६	व्या	५	समारोऽपित	समारोपित
८७	मू.	२	असच्चसन्ध	असच्चसन्धं
८८	,,	१	णिवत्तेदु	णिव्वत्तेदुं
,,	,,	२	विसृजामिति	विसृजामीति
१०२	,,	१९	सन्देहेने	सन्देहेन
१०५	व्या	७	षळजादीनां	षड्जादीनां
१०६	मू.	६	वरकेरणहि	परकेरणहिम् ।
,,	व्या	७	देवकार्यार्थ (?) चेत्यर्थः	देवकार्यार्थं चेत्यर्थं
१०७	मू.	१६	प्रतिपालयमि	प्रतिपालयामि
१११	व्या	१०	स्त्रीणामनिष्ट	स्त्रीणामनिष्ट
११३	मू.	१	तक्क न	तक्को न
११४	व्या	८	समवायस्मं	समवायस्य
११७	मू.	११	व्रतिग्राहयता	प्रतिग्राहयता
११९	व्या	६	वोधयं	बोधयं
१२०	मू.	३	विवर्दुन्ति	पिवर्दुत्ति
१२१	व्या	५	परिणयनेऽनुमन्य	परिणयनेऽननुमन्य
१३२	मू.	१६	प्रियवस्य	प्रियवयस्य
१३३	,,	१७	सान्दष्ट	सन्दिष्ट
१३५	,,	८	चूदङ्कुर	चूदङ्कुर
१३६	व्या	२	साङ्गति	सङ्गति
१४०	मू.	१८	सम्दिष्टा	सन्दिष्टा
१४१	,,	३	बलवइ	बलवई
१४२	व्या	४	तन्नेत्येहि	तन्नेत्याह
१४३	टिप्पण्यां	८	मगतिन	मगतिर्न
,,	,,	५	भङ्गयान्तर	भङ्ग्यन्तर
१४४	मू.	११	तावम्	तावत्
१४७	व्या	१	यातीयर्थः	यातीत्यर्थ
,,	,,	६	स्वद	स्वेद
,,	मू.	३	मोहदिद्दा	मोहदिद्दी
१५०	व्या	८	स्पर्शास	स्पृशामि
१५२	मू.	१२	पिङ्ग्रलिआ	पिङ्गलिआ
१५६	व्या	६	करोमि	कारयामि
१५८	मू.	३	पश्चा	पचा
१६१	व्या	७	तान्त्वष्वि"ति	तन्तुष्वि"ति
१६३	,,	२	वान्ववह	वानुवह

पृष्टम्	मूले व्याख्यायां वेति	पङ्क्तिः	अशुद्धम्	शुद्धम्
१६४	मू	७	भवनं	भुवनं
१६६	,,	८	निर्वृतिस्थानं	निर्वृत स्थानं
१६८	,,	१६	निर्विशेषानि	निर्विशेषाणि
१६९	व्या	५	स्त्रांया	स्त्रिया
१७३	मू	१२	रक्णा	रक्खा
१८०	व्या	११	मारा	मर्रा
१८२	,,	८	मुपनतयां	मुपनताया
१८५	,,	५	वाचाङ्गं	वामाङ्गं
१८५	,,	७	स्तेयामुरश्रुात	स्थेयासुरश्रुति